नं: २-घ

महाभाष्य प्रदीपः

(प्रमोऽध्यायः)

पत्राणि १०२

नं० २

महाभाष्य प्रदीप:
(प्रथमोऽध्याय:)

पत्राणि १०२



=प्रागित्यवयवद्वारा समुदायाक्षेपेनात्मर्थमित्याह॰ छइतीति॰ [redacted] प्राकरणाभावे क्रीतादित्यस्य व्यर्थत्वादिति भावः॰१=ननु छइत्येव नानावाक्यत्वाभावात्सकृद्विधानं सिद्धमेवेत्यत आह॰ प्राक्क्रीतादिति॰२=ननु विहितो विहित इति पुनरुक्तमत आह॰ पुनरिति॰३=

भा०कै०५ श्रीगणेशाय नमः ॥ प्राक् क्रीताच्छः ॥ प्राग्वचनमिति । छइत्येवाधिकारोऽस्त्विति प्रश्नः । प्राग्वचनमुक्तमिति । अस्मिन्प्राग्वचने यदुक्तं यत्तदन्यत्रोक्तं न्यायस्य तुल्यत्वात् प्रा

१ ग्दीव्यतोऽणित्यत्र यदुक्तं तदेवेहापि द्रष्टव्यमित्यर्थः । सकृद्विधानार्थमिति । प्राक्क्रीताद्ये र्थास्तानपेक्ष्य सकृदेवानेन तेष्वर्थेषु छस्य विधानं यथा स्यादित्यर्थः ॥ विहितो य

था स्यादिति । पुनः श्रुत्यापकर्षं प्रतिपत्तिः । लघुत्वाद्यर्थेन विहितो यथा स्यादित्यर्थः ॥ योगे योग इति । असति सकृद्विधाने तस्मै हितं छ इत्येवं प्रसक्ते निर्देशात्सूत्रं छोऽवक्त

श्रीगणेशाय नमः ॥ प्राक् क्रीताच्छः ॥ प्राग्वचनं किमर्थं ॥ प्राग्वचन उक्तं किमुक्तं ॥ तत्र तावदुक्तं प्राग्वचनं सकृद्विधानार्थं अधिकारास्सि

द्धमिति चेदपवादविषयेऽणप्रसङ्ग इति इहापि प्राग्वचनं क्रियते सकृद्विधानार्थं सकृद्विहितः प्रत्ययो विहितो यथा स्यात् ॥ योगे योगे तस्य

ग्रहणं मा कर्षमिति । नैतदस्ति प्रयोजनमधिकारादप्येतत्सिद्धं अधिकारः ॥ प्रतियोगं तस्यानिर्देशार्थ इति योगे योग उपतिष्ठते । अधि

कारात्सिद्धमिति चेदपवादविषये छप्रसंगः ॥ अधिकारात्सिद्धमिति चेदपवादविषये छः प्राप्नोति ॥ ॥ ॥ ॥

यस्तथा च शाङ्ख्यगौरव प्रसंगः ॥ अधिकारादिति । छइत्येतावदेव सूत्रमस्तु नार्थः प्राक्क्रीतादित्यनेनेत्यर्थैव प्रत्ययमादयोऽधिकारः अवधिविशेषोपादानमन्तरेणार

ष्टं साधयन्तिएवमयमपि साधयिष्यतीत्यर्थः ॥ प्रतियोगमित्यनेनलाघवार्थत्वमधिकारस्य दर्शयति योगे योग उपतिष्ठत इत्यनेन त्वधिकारस्य व्यापारः प्रद राम०

(दर्श्यते ॥ ॥ श्री ॥ ॥ श्री ॥ १

=ननु प्रतियोगमिति योगे योग इति च पुनरुक्तमत आह॰ प्रतियोगमिति॰ २=

=परस्परासंबंधादिति॰ संज्ञापरिभाषयोः परस्परसंबंधदर्शनार्थ्यापि स्यादिमत्रारुचिः। २=

उगवादिभ्योयत् छश्चेति। नदी स्रोतोन्यायेन प्रतिसूत्रमधिकारस्योप स्थानात् उत्सर्गोपवादयोस्सन्निधानाविशेषात्रयानीपराग्निवद्विकल्पं स्यादित्यर्थः॥ केचिदाहुः। उ गवादिभ्योयदित्ययमप्यधिकारस्ततो द्वयोरपि पारार्थ्यात् [redacted] परस्परासंबंधा दुपलक्षणमेतत्। इदं तु प्रदर्शनीयं शरीरावयवाद्यच्छश्चेति। स एव दोष इति तस्मै हितमित्यादिष्वर्थनिर्देशेषु द्व्याख्यातिपरिकादितिसामान्यप्रकृतिरधिकारात्तत्सन्निहिता शरीरावयवाद्यदित्यादौ तु विशेषप्रकृतिस्तत्र प्राक्क्रीतात् प्रकृतिभ्यो विधी यमानः छो विशेषप्रकृतेरपि प्राप्नोतीत्यर्थः। समानेर्थे इति। तस्मै हितमित्यस्मिन्नर्थे शरीरावयवाद्यत् विधीयमानः प्रकृसंतरेसावकाशं छं बाधते। तत्क्रमिवक्रौ

उगवादिभ्योयत् छश्चेति छोपि प्राप्नोति तस्मात्प्राग्वचनं कर्त्तव्यं। अथ क्रियमाणेपि प्राग्वचने कथमिदं विज्ञायते प्राक्क्रीताद्याः प्रकृतय आहोस्वित्प्राक्क्री ताद्येर्था इति किं चातः यदि विज्ञायते प्राक्क्रीताद्याः प्रकृतय इति स एव दोषः। अपवादविषयेपि छप्रसंग इति। अथ विज्ञायते। प्राक्क्रीताद्येर्था इति न दोषो भवति। समानेर्थे प्रकृतिविशेषादुत्प यमानोयच्छं बाधिष्यते। यथा न दोषस्तथास्तु। प्राक्क्रीताद्येर्था इति विज्ञायते। कुत एतत्। तथा ह्ययं प्रधा न्येनार्थं प्रतिनिर्दिशति। इतरथा हि बह्व्यस्तत्र प्रकृतयः पठ्यंते ततो यां कांचिदेव प्रकृतिमवधित्वेनोपाददीत। अथवा पुनरस्तु प्राक्क्रीताद्याः प्रकृ

तय इति। ननु चोक्तमपवादविषयेपि छप्रसंग इति नवाधकचिद्॥ ॥ ॥

दिभ्येदधीत्यर्थः तथा ह्याहेति। यथा जातीयो वधिस्तथाजातीयेनावधिमता भाव्यं यथा मासात् परइक्षुरके कालः प्रतीयते ग्रामात् पूर्वे इक्षुरके देशः अत्रत्योप्यन्यत्प्र्वे इत्येव। यां कांचिदिति। आपरीरवायाछ्छ इत्येवं वाच्यं स्यादित्यर्थः। अथ वेति। अभ्युपगम्यवादोयं न त्वयं पक्षो मुक्तः। अवधिविजातीयत्वात् नन्वस्मिन्प क्षे छस्यार्थानिर्दिष्टः स्यात् न न स्वार्थे [redacted] प्राप्नोति नैष दोषः न स्मैहितमित्यादीनामर्थनिर्देशानां प्रत्ययं प्रतिसाकांक्षत्वात् सन्निहितेन निराकांक्षीकर

दि॰ णादर्थस्य लाभात् स्वार्थे प्रत्ययाप्रसंगात्॥ ॥ ॥

=अथ कस्मिन्नर्थे इति प्रथमसामर्थ्य=

भाष्ये० ५ २ वावचनादिति। विकल्पवचनादित्यर्थः। अर्थे इति। अंपरोर्थः प्रकृतिर्वा प्राक्क्रीतान्नास्तीति लाघवार्थं प्राकृठञः इति वक्तव्यं प्राग्वते ष्ठञिति प्रसिद्धा सन्न्यस्यहीयन इख थे। अर्थे द्विति। तेन ज्ञापकाश्रयं मंतरेणान्याये नापवाद विषये छस्य प्रवृत्तिः सिद्धेति प्राकृठञः इति नूच्यमाने तु तज्जातीयस्यावधिमतो भावादर्थाः प्रकृतयो वा वधिमत्वेन संगृह्येरन्। उगवादिभ्यो यत् ज्ञाविति छापवाद्दानां परविप्रतिषेध बाधनायेदं। छदिर्नाम इति। छाद्यतेनेन छदिस्तच्चर्मविकारोपि संभवति। अचारु छ

वावचनात्। न वा एष दोषः किं कारणं क्वचिद्वावचनात् यदयं क्वचिद्वावचनं करोति विभाषा हविरपूपादिभ्य इति तज्ज्ञापयति नापवादविषये छो भवतीति। यद्येवं नार्थः प्राग्वचनेन। अधिकारात् सिद्धं। ननु चोक्तं अधिकारात्सिद्धमिति चेदपवादविषये छप्रसंग इति। परिहृतमेतत् न वा क्वचिद्वावचनादिति। अथ किमर्थमियानवधिर्गृह्यते न प्राकृठञ इत्येवोच्येत। एतद् ज्ञापयत्याचार्यः अर्थे छो भवतीति। किमेतस्य ज्ञापने प्रयोजनं। स माने र्थे प्रकृतिविशेषादुत्पद्यमानो यत् छं बाधते। उगवादिभ्यो यत्। यज्ञाविजः पूर्वविप्रतिषिद्धं सनं गूपानहो प्रयोजनं। यज्ञो भवतः अजः पूर्वविप्रतिषेधेन। किं प्रयोजनं। सनं गूपानहो प्रयोजनं। यतोवकाशः। शंकव्यं दारु पिचव्यः कार्पासः अजो वकाशः। वाध्रं वारत्रं। सनं गुर्नाम चर्मविकारः तस्मादुभयं प्राप्नोति। सनं गव्यं चर्म। ज्यस्यावकाशः औपानह्यं दारु। अजः स एव। उपानन्नाम चर्मविकारः तस्मादुभयं प्राप्नोति औपानह्यं च र्मं। ठञ्च भवति अञः पूर्वविप्रतिषेधेन। ठञोवकाशः छादिषेयं तृणं। अजः स एव। छदिर्नाम चर्मविकारः तस्मादुभयं प्राप्नोति। छादिषेयं चर्म। ठञ् भवति पूर्वविप्रतिषेधेन॥ हविरपूपादिभ्यो विभाषायाय यत्। हविरपूपादिभ्यो विभाषा यायद्भवति पूर्वविप्रतिषेधेन हविरपूपादिभ्यो विभा [redacted] षाया अवकाशः॥ आमिक्ष्यं आमिक्षीयं पुरोडाशीयं। यतः स एव। इहोभयं प्राप्नोति। चर्व्या चा

पुरोडाश्यं

रिरपूपानहो प्रतिपदं प्रत्ययविधानाद्युक्तो विप्रतिषेधः तथा चोक्तं। परनित्यान्तरंगप्रतिपदविधयो विरोधिसन्निपाते तेषामिष्टः प्रसंगे परवृत्तीयस्त्वमितिनार्थः पूर्वविप्रतिषेधेनेति चिंत्यमेतत् हविरपूपादिभ्य इति सूत्रपाठानुपूर्वीप्रदर्शनार्थमस्य परिग्रहात् अन्यथा स्वरूपादिषु प्रतिपदं कश्चिद्रुक्तान्तः पठ्येत पाठेपि वा पवादो सोमवृत्तुत्सर्गापवादयो न्याय्यो विप्रतिषेधस्तस्माद्विधिर्दिशो वावश्चिद्विषयएव विप्रतिषेधो भिमतः गवादिगरोहविः शब्दस्य पाठात् स्वरूपग्रहणाच्च विभाषाह

=ननु यथाबादि हि ठत्रं प्रति परं विप्रतिषेधनयनका बाधित्विमर्त्य तब तिरं मर्दितनावीजं= ८=

=स्वरूपेति अपसंज्ञातविरोधित्वेन तत्र स्वरूपग्रहणम्मन्याय्यत्वात् इह तु स्वरूपग्रहणे निसविधिरनर्थकः स्यादिति विशेषदर्शनादा शाम्

आप० २

[redacted] =नन्वेवमप्रपादीनामन्नविकारत्वे विप्रतिषेधपाठक्लृप्तं विप्रतिषेधउच्यते तत्राह नन्वेति ॥१=

=सत्कादपदर्थ ॥२=

अन्नविकारेभ्यश्चेति अपूपादिभ्य अन्नविकारेभ्यश्चेति पठ्यते तद्विषयोऽयं विप्रतिषेध उच्यते प्रपंचार्थश्चायं पाठो हविरपूपादिभ्यो विभाषा यदिसुकृत्वात् तत्रसामर्थ्या
दपूपादिभ्य इत्यो नानिर्दिष्टेरित विशेषाअन्नविकाराएव ग्रहीष्यन्ते प्रकृतस्य भावादिति यद्यपि हिना येन भंते लं नभं लो हवंधनेरतिसिध्यति तथापि नभं च कमिति न सि
ध्यति नहि च कस्य नाभिर्विकृतिरपितु वयवः नापि तादर्थ्यमस्ति अवयवविनो वयवार्थत्वाभावादिति पर्यनुयोगः यस्तु शरीरावयवो नाभिस्तत्र परत्वा द्विता र्थे
शरीरावयवाद्यदिति यता भाविनाभ्यं तैलमिति मंडलचक्राणामिति नेयं निर्दिष्टा रतो षष्ठी सामान्यविशेषान् । न हि मवतिगवां गोः संपन्नं क्षीरत मेनितस्मार
=गवादिष्वतासन्नियुक्तोनजआवोन्यत्रन भवति नचेति मध्यपि द्राकलक्षणा प्रकृतिर्नाभेरस्ति तथापि नभ्यशब्दवाच्यं चक्रं नाभेः प्रकृतिर्नास्ती सर्थः ॥४=

अन्नविकारेभ्यश्चा अन्नविकारेभ्यश्च विभाषायायद्भवति पूर्वविप्रतिषेधेन अन्नविकारेभ्यो विभाषा यापवका शः । सुयोः सुरीयाः यतः सएव । =
दहोभयं प्राप्नोति सकृत्याधानादिति यद्भवति पूर्वविप्रतिषेधेन तर्हिपूर्वविप्रतिषेधो वक्तव्यः नवक्तव्यः इष्टवाची परशब्दः विप्रतिषेधे परं यदिष्टं
तद्भवतीति ॥ अयं नाभिशब्दो गवादिषु पठ्यते तत्रैव चोद्यते नाभिनभं चेतितच्चो द्यते नाभेनेम भावेप्रत्ययानुपपत्तिः प्रकृत्सभावात् । नाभेर्न
भभावे प्रत्ययस्यानुपपत्तिः किं कारणं प्रकृत्य भावात् । विकृतेः प्रकृतावभिधेयायां प्रत्ययेन भवितव्यं न च नाभिसंज्ञाया विकृतेः प्रकृतिरस्ति यरेकेहि
तन्मंडलचक्राणां मंडलचक्रं तन्नभ्यमित्युच्यते । सिद्धं तु शरीरादिषु वचनात् तुल्यत्वं च सिद्धमेतत्कथं शरीरादिषु नाभिशब्दः पठितव्यः तुल्यत्वं च वक्तव्यं नाभि
रिन भ्यमिति ॥ कः पुनरिहो यमार्थः । यत्नरक्षधारणां परिवृत्तिं च । अपरआह । यत्नरं जनो पांजनमिति । नतर्हिदानीमिदं वक्तव्यं नाभिनभं चेति वक्तव्यं
वयवावयविभावे षष्ठी मंडलाकारं चक्रं येषां तानि मंडलचक्राणि शकटानि तेषां मंडलाकारं यच्चक्रं तन्नभ्यमुच्यते । तच्च नाभेः प्रकृतिर्न भवतीति तत्र प्रत्ययो न प्राप्नोती
सर्थः ॥ कः पुनरिति । अवयवावयविनोः सादृश्याभावादिति प्रश्नः इतरः क्रियाद्वारकं सादृश्यं प्रतिपादयति । यत्नेति । छिद्रवान् रथांगविशेषो नाभिशब्दवाच्यः स
यथाक्षाख्यं काष्ठविशेषं धारयति परिवर्तते चैवं चक्रमपीति तत्सादृश्यान्नभ्यशब्दे नाभिवाच्यस्तर इसर्थः । अंजनो पांजनमिति । अंजनं तैलाभ्यंगः उपांजनं समीपा
॥ भ्यंगः ॥ ॥ ॥

=एवमिति अवयवविनोर्धारणाद्यभावे वयवस्यापि तद्वत्भावप्रसंगादितिभावः ॥१= =नाभिसमीपे यद्वर्तते तस्याभ्यंजनं ॥१=

भा० कै० ५ यान्येतानीति। एतच्चोपलक्षणं नभ्यो लोहबंधो नभ्यो ष्टरइसाद्यर्थमपि पठितव्यमेव। अरकस्तु चक्रेषु पृथग्व्यवस्थितेभ्यः काष्ठेभ्यः पृथग्भूता एव नाभ्यादयोऽवयवाउ
३ संघटितेऽत्र नाभिप्रकृतिः काष्ठं नभ्यं भवत्येव। अररहितं तु चक्रमेकस्मादेव काष्ठादुत्तक्ष्यत इति पृथग्भूनाभेः प्रकृतिभूतकाष्ठाभावात्प्रसक्त्या प्रसंगादित्यर्थः
यानि चापीति। अनयोरीति वृक्षमेव चक्रजातिविशेषप्रतिपत्त्यर्थमनुपनिर्देशः। अन एणीति ह्युक्ते भ्रमाएणपि चक्राणि प्रतीयेरन्न तस्माद्रथतत्पर्यु
दासेनानुपजातारचक्रप्रतीतिरनरथं नीलनेनभवति। ननु यथा वृक्षा एव बहवो वनं ननु तद्व्यतिरिक्तं एवं नाभ्यादय एव चक्रं तत्र भेदनिबंधनो
नाभिचक्रयोः प्रकृतिविकारभावो न स्यादित्याशंक्य भेदं तावदवयवावयविनोस्साधयति दृश्यत इति। भेदेनापि व्यवहारेऽवयवावयविनोर्दृश्यते

=नाभेर्विकारत्वं चक्रस्य प्रकृतित्वं।१=

यान्येतान्यरथंतिचक्राणि तदर्थे। तत्र नाभिसंज्ञाया विकृतेः प्रकृतिरस्ति। यानि चाप्यनरथंतिचक्राणि तदर्थमपीदं वक्तव्यं दृश्यते हि
समुदायादवयवस्य पृथक्त्वं। न यथा वा स्त्री शाखेति। गुणान्तरयोगाच्च विकारशब्दो दृश्यते न यथा वै भीतको यूपः खादिरं चषालमिति।
तत्रावयवात्समुदाये वृत्तिर्भविष्यति अथ यो नभ्यार्थो वृक्षः कथं तत्र भवितव्यं नभ्यो वृक्षः। नभ्या शिंशपा येति। नभ्यान्लं कुर्वचनान =अयमर्थः।२=
=अंजनादियुक्तनाभेरंजनादिरहिता नाभिः प्रकृतिस्तद्द्वारा च चक्रमपि प्रकृतिः॥२= ऽभ्यान्लग्वक्तव्यः। सतर्हि लग्वक्तव्यः। नार्थ्या ताछव्यं भविष्यति नभ्यार्थो नभ्य इति॥०
नवक्तव्यः

नकेवलमभेदे नैवेयमर्थः। ननु प्रकृत्युच्छेदे विकारस्य दर्शनं यथा काष्ठोच्छेदे भस्मनः न चेह चक्रोच्छेदे नाभिदर्शनमित्याशंक्याह। गुणान्तरयोगादिति।
तत्रावयवो यश्चक्रस्य नाभिसंज्ञकः सोंऽजनादिगुणयुक्तनाभिसंज्ञावयवप्रकृतिस्तद्द्वारेण चक्रमपि प्रकृतिर्दृश्यते त्ववयवनिबंधनो व्यपदेशः समु
दाये पटो दग्ध इत्यादौ नत्र बुद्धिपरिगृहीतभाविविकारापेक्षालब्धप्रकृतिव्यपदेशनाभिलक्षणावयवद्वारकश्चक्रस्य नभ्यव्यपदेशः। नार्थ्यादिति। अनेनैव पाम०
न्यायेन चरत्वतं तुल्यार्था व्रीहयोपि चारव्या अङ्गारीयकाष्ठार्थो वृक्षोऽप्यंगारीय एवेति प्रकृतौ छो न भवतीति वेदितव्यं॥ ॥ ॥ ३

=नकेवलं प्रकृतेः प्रस्तावित्यर्थः।१=

=स्त्रीयेषु चैस्वर्येणपाठाभावेन पक्षाद्दं· ९= ननु परिमाणमर्थः संज्ञा तु शब्द इति कथं तयोः सामानाधिकरण्यमत आह· संज्ञायत इति· परिमाणं रूढ्या कंबल्यशब्देनगम्यत इत्यर्थः ।। २=

कंबल्या निपातनादिति। अन्ये तु स्वरितपाठाच्चपदं तत्त्वं विज्ञायते परिमाणपर्युदासेनेति। अपरिमाणांताद्द्विगोस्तद्धितलुकि पंचाश्वे सा दो ङीपि प्रतिषिद्धे कंबल्यग्रहणं तत्र परिमाणार्थमेवेत्यर्थः ।। परिमाणं च संज्ञैवेति संज्ञायत इति संज्ञा। विभाषाकिमिय मिति। यद्यपि हविरपूपादिभ्यो विभाषायायदिति सूत्रे विप्रतिषेधप्रदर्शना

=निपातनेस्यर्थविशेषस्याप्रतीतेः दिक्‌पितृत्स्मादेवंच छोतनक्ष्येतेनिगादः ।। ३=

कंबलाच्च सं। अयं योगः शक्यो वक्तुं कथमशीतिशतं कंबल्यमिति निपातनादेतत्सिद्धं। किं निपातनं अपरिमाणविस्तारितकंबल्येभ्यो न तद्धितलुकीति। इदं तर्हि प्रयोजनं संज्ञायामिति वक्ष्यामीति इह माभूत् कंबलीया ऊर्णाः एतदपि नास्ति प्रयोजनं परिमाणपर्युदासेन पर्युदस्ये प्राप्ते तत्र कंबल्यग्रहणं क्रियते परिमाणार्थं परिमाणं च संज्ञैव विभाषा हविर। किमिदं प्राप्ते विभाषा आहोस्विदप्राप्ते। कथं च प्राप्ते कथं वा अप्राप्ते उवर्णान्तादिति वा नित्ये प्राप्ते अन्यत्र वा अप्राप्ते हविरपूपादिभ्यः प्राप्ते। हविरपूपादिभ्यः अप्राप्ते विभाषा प्राप्ते नि सो विधिः। चरव्याख्तदुला शरीरावयवाद्यत्। यत्प्रकरणे रथाच्च। यत्प्रकरणे रथाच्चोपसंख्यानं कर्तव्यं रथ्याय हिता रथ्या ।। ।। ।।

दप्राप्ते विभाषात्वमिहावगन्तव्यं तथापि शिष्याणां सुखाव बोधनायोयन्यासः शरीरावयवाये तिहितायेवं रथ्यात्यद्यथास्यादर्थो न रेमाभूदिसेवमर्थे मुगवादिभ्यो यदिसत्रोपसंख्यानं न कृतं केचिद्रथसीताहलेभ्यो यद्विधाविति तदन्तविधिमिच्छन्ति ।। अन्ये तु हलसीताशब्दयोस्ता हृयां चतुर्थ्याशयायविहित एव यतितदन्तविधिनेत्यस्मिन्नित्यसाधुः ।। ।। ।। ।।

=स्वरूपस्य साक्षाच्छब्देन बोधनार्थं·१=

खलु वृषशब्दोयमिति। ननु कृतनलोपो ऽकारान्तो मघवा ऽस्यंदेहा (या) कृतनलोपो निर्दिष्टेनेति भावः॥ वृषन्‌छब्द इति। उच्चारणादेव नान्तत्वे ज्ञातेनकारान्त इति वचनं स्वरूपनिरूपणार्थं नत्वसेति। अन्यथा तत मच्छः प्रसज्येत। वृषशब्दादेशइति। अध्याये चाभावकर्मणोरिति प्रकृतिभावाद् घृणपमितिस्यात्। कुतोनुचरसीति ब्रह्मशब्दस्यानेकार्थत्वात् ब्राह्मण

खलु एव वृषशब्दोयमकारान्तो गृह्यते। वृषन्‌शब्दोपि नकारान्तोस्ति। तस्योपसंख्यानं कर्त्तव्यं वृषशब्दस्यादेशः। वृषशब्दोस्यादेशो वक्तव्यः। वृषस्येहि
तमितिविग्रहस्य वृषस्यमिसेव यथास्यात्। तथा ब्रह्मन्‌शब्दोनकारान्तो गृह्यते ब्राह्मणशब्दस्याकारान्तोस्ति तस्योपसंख्यानं कर्त्तव्यं ब्रह्मन्‌शब्दस्यादे
शोवक्तव्यः ब्राह्मणेभ्यो हितमितिविग्रहस्य ब्रह्मण्य इत्येव यथास्यात्। तत्र हि वक्तव्यं न वक्तव्यं। समानार्थावेतौ वृषशब्दः वृषन्‌शब्दश्च। ब्रह्म
न्‌शब्दो ब्राह्मणशब्दश्च। ज्ञातश्च समानार्थावेवं ह्याह। कुतोनुचरसि ब्रह्मन्‌ कुतोनुचरसि ब्राह्मणेति। तत्रद्वयोः शब्दयोः समानार्थयोरेके
नविग्रहः अपरस्मादुत्पत्तिर्भविष्यति अविरविकन्यायेन। तद्यथा अवेर्मांसमितिविग्रहस्य अविकशब्दादुत्पत्तिर्भवति आविकमिति। एव
[redacted] मिहापि वृषाय हितमितिविग्रहस्य वृष्यं इति भविष्यति। ब्रह्मे
हितमितिविग्रहस्य वाक्यमेव तथा ब्राह्मणेभ्यो हितमितिविग्रहस्य ब्रह्मण्यमितिभविष्यति ब्रह्मन्‌शब्दं चेहसाधुं। तच्चैवं सति सिद्धं भवति॥ ॥

एकेनविग्रहइति· ×ब्राह्मणेभ्योहितमितिविग्रहस्यवाक्यमेव·×१

शब्दपर्यायत्वं नातिप्रसिद्धमिति सूत्रमुत्पादयति। एकेन विग्रह एवेत्सर्थः। विग्रहस्तद्वाभ्यामपि भवतीति नासौ नियम्यते। विग्रहेति। भिन्नकर्त्तृकत्वात्क्त्वानुपपत्तिः नैष दोषः। उत्प एम०
त्तिशब्देनोत्पादनमुच्यते सेतभाविनणपर्थत्वात्परेः परावृत्ययोगे चेति वा क्त्वाप्रत्ययः॥ वृषन्‌ब्राह्मणशब्दाभ्यामनभिधानाच्छप्रत्ययो न भवतीत्यर्थः॥ ४

=एवं च वृषन्‌शब्दे युक्त्यनुक्तिदर्शनं संगच्छते·२= विग्रहएवेति· ननु प्रत्ययस्तस्मादपरस्मात्तु विग्रहः प्रत्ययश्चेति भावः। नासाविति· एकेनैव विग्रह इत्येव मित्यर्थः॥ २= भिन्नेति· विग्रहप्रयोक्तृकर्तृत्वात्क्त्वाप्रत्ययस्य ह८

आत्म इन निर्देश इति। योयं हितमिति प्रत्ययार्थनिर्देशः स भोगोत्तरपदात् खविधाने विवक्षितार्थप्रत्यायनासामर्थ्याद् निर्दिष्टः। न त्वायो करणात्तथा हि लोके पितृ
भोगीणा इति शब्दैः पित्रादिहितस्यार्थस्य प्रतिपत्तिः पित्रादिभोगहितस्य तु प्रतिपत्तिप्रसंगः। द्विवचनमिति॥ अन्यथा भोगीन एको वा ध्येत भोगोत्तरपदात् खविधाने

आत्मन्विश्वजनभोग। भोगोत्तरपदात्खविधाने। निर्देशः पूर्वपदार्थे हितत्वात्। भोगोत्तरपदात्खविधाने। निर्देशः आगमको निर्देशो। निर्देशः।
किं कारणं पूर्वपदार्थे हितत्वात्। उत्तरपदार्थप्रधानस्तत्पुरुषः सर्वपदार्थप्रधाने च प्रत्यय इष्यते पितृभोगाय हिते प्राप्नोति पित्रे चैव हित इष्यते। एवं तर्
हि भोगीनर् प्रत्ययो विधास्यते भोगीनरिति चेद् द्विवचनं। भोगीनरिति चेद् द्विवचनं कर्तव्यं। मात्रीयः पित्रीय इत्यपि यथा स्यात्। राजाचार्याभ्यां नि
त्यं। राजाचार्याभ्यां नित्यमिति वक्तव्यं। राजभोगीनः। आचार्योदराणं च। आचार्यभोगीनः। किं भोगीनर् प्रत्ययो विधीयत इत्यतः राजाचार्या
भ्यां नित्यमिति वक्तव्यं। नेत्याह। सर्वथा राजाचार्याभ्यां नित्यमिति वक्तव्यं॥ ॥ ॥

। =सामर्थ्यमिति। सामर्थ्यं सर्वभावानां लिंगमित्यभिधीयते इति वचनात्सामर्थ्यं लिंगमित्यनर्थान्तरं श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमुप्रमाणेषु उत्तरमुत्तरं प्रति पूर्वं पूर्वं बलीय इति निर्णयात्=

केवलेभ्यः पित्रादिभ्यो बाधकाभावाच्छः सिद्ध्यति। किं भोगीनरिति प्रत्यासत्त्याश्रयेण प्रश्नः सर्वेषेति। सामर्थ्यं बलवदित्युत्तरं न नु भोगोत्तरपदात्खविधाने क्रियमाणे पि
नित्यग्रहणे केवलाभ्यां राजाचार्याभ्यां छस्य निवृत्तिर्न सिद्ध्यति एवं तर्हि तथा पाठः कर्तव्यः यथेष्टं सिद्ध्यति राजाचार्याभ्यां नित्यं भोगोत्तरपदाभ्यामेव हिते प्रत्यय इति॥ ॥

=नित्यमिति। नित्यमित्यस्य प्रत्ययेन संबंधान्महाकिनावानिवृत्तिरेव स्यादित्यर्थः। राजेति। राजाचार्याभ्यां यदि हिते प्रत्ययस्तर्हि भोगोत्तरपदाभ्यामेवेत्यर्थादिष्टसिद्धिरिति भावः। नित्यमित्यस्येव विवरणं भोगोत्तरपदाभ्यामेवेति। १८=

= पुत्रोरीति भोगरदित्युक्तात्मा दः२ सु धनेति अनेन धनवाचिनो नरग्रहणमित्युच्यते २२

भा०कै०५ ग्रामणिभोगीन इति ग्रामण्यो भोग इति षष्ठीसमासः इको ह्रस्वो ङ्यो गालवस्येति ह्रस्वः नत्वं प्राप्नोतीति भकारादौ प्रत्यये गस्य विधीयमानमिति भावः द्रव्यपदार्थक
५ इति भोगो धनमुच्यते भोगवानयं ब्राह्मण इति धनवानपि रूपणोति भोग उच्यते तस्मादत्र क्रिया भोगशब्दवाच्या संबंधारि ति यस्य पित धनाय हितो नासावव

इह च ग्रामणिभोगीनः सेनानिभोगीन इति उत्तरपद इति ह्रस्वत्वं न प्राप्नोति। इह च भोगीन इति रूपोभीति नत्वं प्राप्नोति। सूत्रं च भिद्यते।
यथान्यासमेवास्तु। ननु चोक्तं भोगोत्तरपदात्खविधाने अनिर्देशः पूर्वपदार्थहितत्वादिति। नैष दोषः। अयं भोगशब्दः अस्त्येव द्रव्यपदा
र्थकस्तद्यथा भोगवानयं देश इत्युच्यते। यस्मिन्भावाः सस्यानि च वर्तन्ते। अस्ति क्रियापदार्थकः। तद्यथा भोगवानयं ब्राह्मण इत्युच्यते यः
सम्यक्स्नानादिक्रियाः अनुभवति। तद्यः क्रियापदार्थकः तस्येदं ग्रहणं। यश्च पितरस्य भोगः क्रियाभ्यो हितः संबंधादसौ पित्रे हितो भव
ति। यदि संबंधादस्य द्रव्यपदार्थकस्यापि ग्रहणं योपि हि पितद्रव्याय हितः संबंधादसौ पित्रे हितो भवति॥ अथ वा भोगशब्दः शरीरवाच्यपि
दृश्यते। तद्यथा॥ ॥ ॥ ॥

॥ = ममैतद्भविष्यतीत्युक्तं तद्दूषयति पत्त्विति यदि हि ममैतद्भविष्यतीत्येवं स्वार्थबुद्ध्यापि ग्राधनस्य विशेषणमयुक्तं स्यात्तदा तु पितुरेतद्धनं ममापि तद्धितार्थं रक्षणीयं

रूपं पितर[redacted]हितो भवति ममैतद्धनं भविष्यतीत्येवं बुद्ध्या पितृधनरक्षणादिति भावः स्योहीति यस्त्कमेतद्भविष्यतीति मन्यते नासौ पित्रे तद्धनमिति रक्षति रामा०
किं तर्हि ममैतदित्यभिमानेन॥ ॥२॥ ॥७॥ ॥ ५

।=अत एव भोगशब्दः शरीरवाच्यपीति सामान्येन भाष्योक्तिः।२=रथकार इति रथकारेण तद्देव किंतु निषादाद्योनुलोमाः कृतादयश्च प्रतिलोमाः सर्वे गृह्यन्ते।२=

अहिरिवेति। समुदाये वृत्तो भोगशब्दः एकदेशे षु फणेषु प्रयुज्यते। केचिदाहुः। भुजंगांगमेव भोगशब्देनोच्यते न तु सर्वे शरीरमिति। तदयुक्तं। अनंतत्वात्प्रयोग विषयस्यावधारणस्य कर्तुमशक्यत्वात् पंचजनादिरिति। मनुष्याः पंचजना उच्यंते चत्वारो वर्णा रथकारः पंचमाः॥ पंचजनायेति। दिक्संख्ये संज्ञायामिति समासः। स मुदाये वृत्तस्यावयवे पि वृत्ता एकवचनं यथा सप्तर्षिरिति॥ यो हि पंचानामिति। ननु सापेक्षत्वादत्र समासेन न भाव्यं। संख्या हि संख्येयविशेषमपेक्षते संख्येयं वृत्त यस्मै

अहिरिव भोगैः पर्येति। अहिरिव शरीरैरिति गम्यते। एवं पितृशरीराय हितः पितृभोगीण इति। खविधाने पंचजनादुपसंख्यानं। खविधाने पंचजनादुपसंख्यानं कर्तव्यं। पंचजनाय हितः पंचजनीनः समानाधिकरणादिति वक्तव्यं यो हि पंचानां जनाय हितः पंचजनीयः स भवति। सर्वजनाट्ठञ्च। सर्वजनाट्ठञ्च वक्तव्यः खश्च। सर्वजनाय हितः सार्वजनीनः॥ समानाधिकरणादिति च वक्तव्यं। यो हि सर्वेषां जनाय हितः सर्वजनीयः स भवति॥ श्री ॥ ॥

=भेदपूर्वकः संबंधः।१= =संख्येयमनपेक्ष्य संबंधाभावात्।१= ×निकः।सार्वज×२

नापेक्ष्यमाणमितिरेक स्तद्वारेणानु संख्यायागुणास्येति साक्षात्संबंधाभावात्समासप्रसंगः। नैष दोषः। प्रकरणादिवशाद्यदा विशिष्टसंख्येयवृत्तित्वावसायः संख्याशब्दानां तदा जनादिना साक्षात्संबंधा[redacted]त् भवतिवृत्तिः। सर्वजनायेति। सर्वो जन इति पूर्वकालैकसर्वेति समासः। सर्वेषां जनायेति। सर्वसाधारणायेत्यप्यादिजनाये सर्वेः॥

भा०कै०५ ६ महाजनादिति। निसग्रहणं सर्वे जना इत्यतः खोमाभूदित्येवमर्थं महाजनशब्दस्य समानाधिकरणपदस्यात्वनिर्देशादेव वुसीयतने सर्वे सर्वाद्दिति। अनुकरणत्वात् सर्वेना
म कार्याभावः सर्वेनामानी सन्त्वर्थे संज्ञाविज्ञानात् अनाश्रितार्थस्य च शब्दरूपस्यानुकरणमिति प्रकृतिवद्भावादपि सर्वनामत्वं न भवति। पुरुषाद्वधेति। प्रत्ययार्थसाम

महाजनाच्चिसंठञ्वक्तव्यः महाजनाय हितो माहाजनिकः तत्पुरुष इति वक्तव्यं। बहुव्रीहौ माभूदिति महान् जनोऽस्य महाजनः महाजनाय
हितो महाजनीयः। यदितर्ह्यतिप्रसंगाः सन्ती सुपाधिः क्रियते आघन्यासेऽप्युपाधिः कर्तव्यः अन्यत्र विश्वजनसमानाधिकरणादिति वक्तव्यं।
यो हि विश्वेषां जनानां हितः विश्वजनीयः स भवति। अथ मतमेतद् नाभिधानादाघन्यासे न भवतीति इहापि नार्थ उपाधिग्रहणेन। इहापि
नाभिधानान्न भविष्यति। सर्वे पुरुषाभ्यां। सर्वोऽस्य स्वावचनं सर्वात्मस्य वेतिवक्तव्यं। सार्वः सर्वीयः। पुरुषात् वध इति वक्तव्यं पौरुषेयो वधः। अस
त्समिदमुच्यते पुरुषाद्वध इति पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यं। पौरुषेयो वधः। पौरुषेयो विकारः। पौरुषेयः समूहः तेन कृतं पौरुषेयं। न दैवं =नदैवेनकृतमित्यर्थः।३=
तं तदर्थे विकृतेः प्रकृतौ। तदर्थमिति कृसनाममप्यष्टव्यं। तदर्थमिति कृसनाममप्यष्टव्यम् इद्धमहार्थं ऐन्द्रमहिकं। गांगामहिकं। काशेहूपज्ञिकं। न
वा प्रयोजनेन कृतत्वात्। न वा वक्तव्यं किं कारणं प्रयोजनेन कृतत्वात्। यद्ध्येद्धमहार्थं इन्द्रमहस्तस्य प्रयोजनं भवति। तत्र प्रयोजनमित्येव सि
१६॥ ॥

र्थेन षष्ठी समर्थविभक्तिर्लभ्यते। कृतेतु तेनेति तृतीयोपात्तैव पुरुषस्य लोकप्रसिद्धः पाणिपादिमुक्तइहगृह्यते। न तु संख्यादिशास्त्रप्रसिद्धः तत्र प्रत्ययस्यादर्शना
दिसादुः। तदं कृसनाममप्य इति। अवश्यकर्तव्यत्वात्कारणार्हत्वात्तवांकृसाउत्तवास्तन्नाममप्य इत्यर्थः॥ न वेति। प्रयुज्यते अनेनेति प्रयोजनं फलमप्यभिधीयते क्वा राम० ६

=इहफलस्यग्रहणमितिभावः।१=

द्धिः। उपध्यभावादिति उपधिशब्दो विकृतिवाची नास्ति एकस्यैव रथाङ्गविशेषस्योपधेयोपधेयशब्दाभ्यामभिधानात् प्रकृतिप्रत्ययार्थेऽस्य प्रकृतिविकारभावाभावादित्यर्थः। प
सिद्धं त्विति। उपधेयशब्दात्कर्मसाधनयदन्तात्स्वार्थे ञ्यन्तरे कन्मन् दस्यर्थः। तयोर्भावसाधन इति। तत्र हि नाद्यर्थे संभवति। उपधानं क्रियापार्थ्यात् तद्रथाङ्गविशेषस्य। एवमपीति। य

=औपधेयपदव्याख्या।२=

द्धिरूपधिवृत्तेर्दुः। उपध्यर्थमितिप्रत्ययानुपपत्तिः उपध्यभावात्। उपध्यर्थमितिप्रत्ययस्येहानुपपत्तिः। किं कारणम्। उपध्यभावात्। विकृतेः प्रकृताविभि
धेयायां प्रत्ययेन भवितव्यम्। न च उपधिसंज्ञिका या विकृतेः प्रकृतिरस्ति। यद्धि तद्रथाङ्गं तदौपधेयमित्युच्यते। सिद्धं तु रूढं तस्य स्वार्थे ञ्यवचनात्। सि
द्धमेतत्। कथम्। रूढं तस्य स्वार्थे ञ्य वक्तव्यः। उपधीयत इति उपधेयम्। उपधेयमेवौपधेयम्। सिध्यति सूत्रं तर्हि भिद्यते यथान्यासमेवास्तु। ननु चो
क्तमुपध्यर्थमितिप्रत्ययानुपपत्तिरुपध्यभावादिति। नैतदस्ति। अयमुपधिशब्दोऽस्त्येव कर्मसाधनः। उपधीयत इति उपधिरिति। अस्ति भाव
साधनः। उपधानमुपधिरिति। तयोर्भावसाधनस्येदं ग्रहणम्। एवमपि न सिध्यति। किं कारणम्। विकृतेः प्रकृताविति वर्तते। प्रकृतिविकृति
ग्रहणं निवर्तिष्यते। तच्चावश्यं निवर्त्यम्। इहार्थमुत्तरार्थं च इहार्थं तावत्॥ ॥ ॥

घपि लोके क्रियाविकारत्वेन क्वचिन्निर्दिश्यते बहुविकारोऽयं मनुष्यो हसति गायति नृत्यतीति तथापि प्रत्ययविधौ विशिष्ट एव प्रकृतिविकारभावो गृह्यते यत्र प्र
कृत्युच्छेदो यत्र वा प्रकृते रूपान्तरापत्तिः॥ ॥ ॥ ॥

भा०कै०५ बालेया इति। अत्र तण्डुलानां तादर्थ्यमस्ति। ननु प्रकृतिविकारभावो वत्सावस्थायामपि तण्डुलान्त्यतरवस्थत्वादिति भावः। आर्षभ्य इति। यथा पक्वमात्रफले आम्रफलविकार

७ लेनन प्रसिद्धं। अपितु प्रसिद्धिरात्रा नवशाखले नैवमृषभोपि न वत्सविकारः। अर्थेति। तदर्थग्रहणं ननु प्रकृत्यौ स्वार्थे प्रत्यय उपाधि शब्दान्न सिद्ध्यतीति भावः। ऋषभोपा

नहोरत्राण्यचश्च शब्दान्तादर्थ्यात् वत्सादिषु वर्तमानाः स्वार्थ एव प्रत्ययमुत्पादयिष्यन्ति। प्रासाद इति। अत्र संभावनामात्रं गम्यते न तु तादर्थ्यमिति प्रत्ययो नेष्यते इति

करणापरामर्शेनेदमुच्यते यदि तर्हि न दस्येत्सनेन न तादर्थ्ये प्रत्ययः क्रियते तदा योग्यतामात्रविवक्षायां प्रत्ययप्रसंगः अरणीयं सूर्यकाष्ठमिति अत्रापि बुद्धि

बालेयास्तण्डुलाः। उत्तरार्थं नावृत्। ऋषभोपानहोर्ञ्यः। आर्षभ्यो वत्स इति। अथ तदर्थमित्यनुवर्तते उताहो न। किंचार्थो नु वत्सो बाढमयं न

दस्मिन्नुत्पत्स्यते तादर्थ्ये यथा स्यात् इह माभूत् प्रासादो देवदत्तस्य स्यात् प्राकारो नगरस्य स्यादिति। यदि तदर्थमित्यनुवर्तते। ऋषभोपानहोर्ञ्यः। ऋ

षभार्थो घासः उपानदर्थस्तिलकल्क इत्यत्रापि प्राप्नोति। एवं तर्हि अनुवर्तते प्रकृतिविकृतिग्रहणं। ननु चोक्तं वत्सर्षभयोर्न सिध्यतीति। किं पु

नर्भवान् विकारं मत्वा आह वत्सर्षभयोर्न सिध्यतीति यदि तावद्यः प्रकृत्युपमर्देन भवति स विकारः। वैभीतिको यूपः खादिरं चषालमिति न सि

ध्यति। अथ मतमेतत् अन्यदेव गुणान्तरयुक्तं विकार इति। वत्सर्षभयोरपि सिद्धं भवति गुणान्तरयुक्ता हि तण्डुलाः बालेया गुणान्तरयुक्तश्च वत्स

परिकल्पिता येऽपि तत्तादर्थ्यमाश्रयणे प्रत्ययो भविष्यतीत्यादुः गुणान्तरयुक्ता हीति वत्सावस्थायां योगगुणाः सन्निवेशलक्षणो लाङ्गलादिकृतलौहित्यादिलक्ष

णो वा नदपेक्ष्य प्राकृतगुणयुक्ता इत्यर्थः। गुणान्तरयुक्तश्च वत्स इति। स जातावयवः संहननवान् महाप्राण ऋषभावस्थां प्राप्नोति यदा परियोज्यते न तु दानवि

क्रियार्थं तदा तादर्थ्यस्य संभवः। आम्रं तु पक्वं यद्यप्याम्रविकारो गुणभेदात् तथापि तत्र लघुत्वेन साद्यल्लोके प्रकृतिविकारभावस्याप्रसिद्धत्वात् तत्र प्रत्ययाभावः। एम०

॥ आम्रपक्वावस्थयोराम्रशब्द एव वाचकत्वेन प्रवर्तते न तु शब्दान्तरं वत्सर्षभशब्दवत्॥ ७

= वैषम्यं नरत्नपाद· भ्रांमेति· १ =

=अस्येति॰ एतेनास्येति षष्ठ्या संबंधसामान्यप्रतिपादनात्संबंधविशेषप्रतिपत्तौ प्रवृत्ती कि नयांकमीयं॰ २

औपधेयं त्विति। सत्यपि क्रियापेक्षे द्रव्यस्य तादर्थ्ये प्रकृतिविकारभावाभावात्। वचनादिति। कर्मसाधनत्वे प्रत्ययान्ता उपधिशब्दात्स्वार्थे ठक्। प्रत्ययं उपधौपधेयशब्दयोर्लौके पर्यायत्वादेकस्यार्थस्यासापेक्षत्वात्तादर्थ्यप्रकृतिविकारभावाभावात्। तदर्थस्य प्राप्त्यग्रहणमिति क्रियमाणेऽपि स्यात्। ग्रहणे नैवास्ति प्रसंगनिवृत्तिरिति करणादेव चस्यास्तीति प्रसंगनिवृत्तिरस्ते स्पतौ इति प्रत्यय प्रासादो देवदत्तस्येति। क्रियमाणे स्यात्। ग्रहणे तु स्वामिसंबंधा दावति प्रसंग उक्तः। देवदत्तस्येति षष्ठ्या संबंधमात्रस्य प्रतिपादनात्तस्मान्ये च सर्वविशेषाणां तद्भावात्। ननु तदर्थग्रहणानुवृत्तात्र न भविष्यति तथा च छदिरुपधिवलेर्ढञिति तत्र भाष्यं वा ढमर्थेर्द्रस्यादि। एवं तदर्थसति स्यात्। ग्रहणेऽप्रासादार्थोयं देवदत्त उत्पन्नो योग्यो यं प्रासादलाभे इति तादर्थ्यसंभवात्। प्रत्ययप्रसंगः। यथेति। यदा देवदत्तनाम्ना केनचिदीश्वरो दृष्टः। ततः प्रासादं विस्तीर्णं दृष्ट्वा सौ

=दित्युदृशं अनेकस्मिन्प्रत्ययार्थे प्रत्येकं समर्थविभक्तिः संबंधनीये तिन्यायस्य चनार्थी। यदीदं नस्यात्तदा समर्थविभक्ति संबंधस्तदस्यास्मिन्निति समुदायेन विज्ञायेत। तत्र प्राकारीयाइष्टकाइत्यत्र चाभ्यां प्रत्ययार्थाभ्यां समर्थविभक्तेः संबंधः स्यात् तत्रैव स्यादयत्वन्यतरेण संबंधः

औपधेयं तु न सिध्यति। वचनात्स्वार्थिको भविष्यति। तदस्य तदस्मिन्स्यादिति। स्याद्ग्रहणं किमर्थं। इह माभूत्प्रासादो देवदत्तस्य प्राकारो नगरस्येति

अथ क्रियमाणेऽपि स्याद्ग्रहणे इह कस्मान्न भवति। प्रासादो देवदत्तस्य स्यात् प्राकारो नगरस्य स्यादिति शक्यार्थे लिङ्‌ इति वक्ष्यते। नैवं शक्यं॥

संभावयति नायं प्रासादोऽन्यस्य संभवति देवदत्तस्यायं प्रासादः स्यादिति तदा प्रत्ययः प्राप्नोतीत्यर्थः॥ नन्वत्र तादर्थ्यं न प्रतीयत इति प्रत्ययो न भविष्यति। एवं तर्हि प्रासादलाभयोग्योऽसौ देवदत्तः प्रासादार्थ इत्येवं विवक्षायामिदमुदाहरणं। अथवा तदर्थग्रहणमत्र नानुवर्तते इति कारणेनानिष्टनिवृत्तेः साधयिष्यमाणत्वात्सर्वस्त्वेतु भाष्यकारेणोक्तं इति करणपरामर्शेन प्रसंगं तदेणात तदर्थग्रहणस्यैवानुवृत्तिर्दर्शितानतत्सौ सिद्धांतस्तथा चान्यार्थमपि दारूयोग्यतामात्रेण प्रासादीयमुच्यते न च तत्र तादर्थ्यलेशोऽप्यस्ति न च प्रतीयते येनास्य पितादर्थ्यं बुद्ध्या परिकल्प्य प्रयोगः क्रियेत शक्यार्थे इति। स्यात् शक्यार्थे इति पठितव्यमित्यर्थः॥ ॥

=औपधेयेऽतदर्थग्रहणानुवृत्तावपि प्रत्ययस्य स्वार्थिकत्वमुत्पादनप्रसंगेने सर्पः॥ २२ =यथा स्युलश्रृंकिलिङ्गितिस्य गेणेव शक्यार्थे लिङः सिद्धत्वाद्धन्त्वतायोगात्॰ १=

=तदन्तवाच्यः प्रत्ययान्तवाच्यः। अत एव समानशब्दः समानाधिकरणशब्दः। यथा दृतिहरिः पशुरिति कर्तुः प्रत्ययेनाभिधानात्सोपपादितं। अतोन्यः प्रत्ययावाच्यः अत एव व्यधिकरणशब्दः। यथा गार्गिकया श्लाघते इति श्लाघानुभावाभिधीयत इति विशेषणं। ४=अयोग्यमिति। तथा हि। प्रथमासन=
=र्थाद्देशेति यच्छन्देऽस्मिन्निति सप्तम्यर्थे च यथाविहितः प्रत्ययो भवतीत्येकं वाक्यं। यत्तत्प्रथमासमर्थं च तत्स्मादिति द्वितीयं। तन्न द्वितीये प्रकृत्यर्थः प्रधानं विशेष्यत्वात्स्मादेशेन द्विशेषणत्वादप्रधानमिति तस्य विशेषणांतरेण योगो न संभवतीति भावः। नन्विति। गुणः कृतात्मसंस्कार इति न्यायात्। ६=

भा०कै०५
८

=यपापगुणसाम्येनिर्भानैरे अ
=धिकारशेषलात्प्रत्ययसंज्ञा
=क्रियतेभावग्रहणमुपपादि
=धीनामेनिषाप्रयोगेनोस्तवः

इदानीमेवेति। चिरवृत्तम[redacted]पि वस्तु बुध्याभावितत्वात्प्रत्यासन्नमिव प्रतीयते। उपदेशे जनुनासिक इदित्यत्रेदमुक्तं प्रायग्रहणादसंज्ञायामपि घञ् भवति
प्रायवचनात्संज्ञायामेव घञ् त्यसाधानवानद्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति। तत्र हि घञो विधेयत्वात्प्रधानेन तस्यैव प्रायग्रहणं संज्ञाग्रह
णं च विशेषणं स्यात्। न तु संज्ञायां प्रायग्रहणं विशेषणं परार्थस्य स्वसंस्कारप्रतिपत्त्यां व योग्यत्वाच्छब्देन प्राप्तौ प्रयाप्य तस्यैव प्रत्यायनादेक वाक्यत्वाच्चोपा
धिविशेषणशब्दयोश्च एकं चित्सर्वार्थत्वं क्रियाभावशब्दयोरिवाक्षेचिन्नुभेदेन व्यवहारः। तदुक्तं। अथ विशेषउपाधिरस्तदन्तवाच्यः समानशब्दोयः। अ
नुपाधिरतोन्यः स्याच्छ्लाघादिविशेषणं यद्वदिति। तत्र स्यादित्येतत्प्रकृत्यर्थे विशेषणायोपात्तं परतंत्रं न योग्यं शब्दस्यार्थे इत्यनेन विशेषणेन संबंधानुभ
वे। ननु विशेषणसंबंधमनुभूयप्रकृत्यर्थविशेषयिष्यति। नेतरदस्ति विशेषणासंबंधानुभवे प्रधानत्वं तस्य स्यान्न तूपाधित्वं प्रतीतिकालएव चेतस्योपाध्य

इदानीमेव स्युक्तं न ह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणमिति। एवं तर्हि इतिकरणः क्रियते। ततश्चेद्विवक्षा भवति विवक्षा च द्वयी अस्से वप्रायोक्ती
विवक्षा। अस्ति लौकिकी। प्रायोक्तीविवक्षा प्रयोक्ता हि मृद्यास्निग्धया श्लक्ष्णाया जिहया मृदूस्निग्धा श्लक्ष्णा न शब्दान्प्रयुंक्ते लौकिकी विवक्षा यत्प्रा
यस्य संप्रसयः। प्राय इति लोकोयं परिदृश्यते। न च प्रासादो देवदत्तस्य स्यात् प्राकारो नगरस्य स्यादित्यत्रो त्पद्यमानेन प्रत्ययेन प्रायस्य संप्रत्ययः स्यात्।
यद्येवं नार्थः स्याद्ग्रहणेन नहि प्रासादो देवदत्तस्य प्राकारो नगरस्येत्यत्रोत्पद्यमानेन प्रत्ययेन प्रायस्य संप्रत्ययः स्यात्॥ ॥ ॥ ॥

मवगतमिति कुतो विशेषणसंबंधः। अथ योपाधिद्वयेन प्रत्यर्थः संबंध्येत नदेहापि प्रसज्येत शक्यः प्रासादो देवदत्तस्य स्यादिति। तत्र ज्ञातुमुपमोक्तुं वा शक्य इति प्रकृत्यर्थस्य
शक्यार्थत्वविशेषणसंबंधसंभवः॥ मृद्वीति। अपभ्रंशानित्यर्थः॥ तस्मात्प्रयोक्तृविवक्षानाश्रीयते प्रयोक्तुः स्वातंत्र्यान्नियमाभावात्॥ प्रायस्येति। समग्रकृत्स्यैत्यर्थः
॥ तस्मात्यत्रार्थे लोकाः शब्दान्[redacted]प्रयुंजते तदर्थाभिधायिनस्त एव शास्त्रेणानुविधीयंते प्रयोगमूलत्वात्व्याकरणस्य। तेः अयमेव न्यायः के चिदिति॥
रणेनोपसंगृह्यते तत्रेति शब्दो हेत्वर्थः स विवक्षामनुसार प्रतीयायमर्थस्तद्रस्य तदस्मिन्स्यादिति तदर्थं प्रमाय नायस्यदा विवक्षा भवति उक्तो हेतोरयमर्थः प्रत्ययोत्प
त्तिनिमित्तत्वेनाश्रीयत इति। अथवा एवमयं न्नित्येति शब्दो विवक्षामनुसारयति। एवं चेति लोकस्य विवक्षा भवति तत्र प्रत्यय इत्यर्थः। न च लोके कृत्स्नप्रासादो देवदत्तस्य स्यादित्यर्थे

=विसर्गप्रतीत्यर्थं। न त्वपूर्वः कश्चिदर्थः प्रतिपाद्यते। २=योग्यमिति। तदस्य तदस्मिन्स्यादिति योग्यमर्थस्तादृशार्थ प्रत्ययनायप्रायविवक्षा भवति अतो विवक्षायाहेतोः। २= =ननु कथं प्रासादस्य शक्यार्थरूपविशेषणसंबंधः स्वरूपेणाशक्यत्वादत आह। तत्रेति। ५=

॥ सन्निधापित्वात्प्रायोगिकेन विवक्षितस्य सम्यक्प्रत्ययार्थत्वं॥
राम०
८

आर्हात्। किमर्थमिति। परिमीयते अनेनेति परिमाणमिति क्रियाशब्दत्वात् परिमाणशब्दस्य संख्यायामपि परिच्छेदहेतुत्वात् पृथक्संख्याग्रहणं न कर्त्तव्यमिति मत्वा प्रश्नः। एवं तर्हीति। आचार्यदेशीयः परिहरति। यथा प्राच्यत्वात् भरतानां ग्रहणे सिद्धे बह्वच इञत्र भेदेनोपादानमन्यत्र प्राच्यग्रहणे भरतग्रहणनिवारणार्थं तेनेञः प्राचामिति भरतेभ्यो युवप्रत्ययस्य लुङ् न भवति। औद्दालकिः पिता औद्दालकायनः पुत्र इति। एवमिहापि संख्याग्रहणमन्यत्र परिमाणग्रहणे संख्याया अग्रहणार्थं तेन द्वा

=अङ्क्रियेघस्य यः पर्युदासः स न भवति ङी क्रियेव एव भवतीत्यर्थः।२=

आर्हादगोपुच्छ। किमर्थं संख्यायाः पृथग्ग्रहणं क्रियते। न संख्यापि परिमाणमेव। तत्र परिमाणपर्युदासो भविष्यति। एवं तर्हि सिद्धे सति यत् संख्यायाः पृथग्ग्रहणं करोति तज्ज्ञापयत्याचार्यः अन्या संख्या अन्यत्परिमाणमिति। किमेतस्य ज्ञापने प्रयोजनं। अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकीति द्वाभ्यां शताभ्यां क्रीता द्विशता त्रिशता परिमाणपर्युदासेन पर्युदासो न भवतीति। यद्येतत् ज्ञाप्यते तदस्य परिमाणं संख्यायाः संघसूत्राध्ययनेष्विति विशेषणं न प्रकल्पते परिमाणं या संख्येति। इह च क्रीतवत्परिमाणादिति संख्याविहितस्य प्रत्ययस्यातिदेशो न प्रकल्पते शतस्य विकारः शात्यः शतिकः साहस्र इति॥ ॥ ॥

भ्यां शताभ्यां क्रीता द्विशते त्यत्र द्विगुलक्षणस्य ङीपो परिमाणान्तत्वात् प्रतिषेधः सिध्यति यथा पंचाश्वेति॥ पणपादेति नित्ये यति प्राप्ते शाणाद्वेत्यत्र शतशाणाभ्यां वेति वचनाद्यत्प्रसङ्गाभावात्पक्षे शताच्च ठन्यतावशत इत्यत्र असमासग्रहणानुवृत्तेः संख्यालक्षणस्य कनो अध्यर्द्धपूर्वेति लुकि कृते द्विशते इति भवति। यद्येतदिति शिष्य आचार्यदेशीयेनोक्ते दूषणमुद्भावयति इदानीमाचार्य आह॥ ॥ ॥ ॥

=शताच्च ठन्यतावशत इत्येतावपत्यपक्षे न संभव इत्याह शताच्चेति। असमासे इति एवं च समासे तदन्तविधेरिति भावः।२=

=अ.लप्सप्रहतोवा.१=

भा०कै०५ यत्तावदिति। परिमाणशब्दः क्रियाशब्दत्वेपि विशिष्टपरिच्छेदहेतौ द्रोणादौ रूढोनसंख्याममभिधेयत्वेन गृह्णातियथा पंकजशब्दः पद्ममेवाभिदधाति। ननु कुमुदादिकमपी
ए पीत्यर्थः॥भेदमात्रमिति। भेदः पदार्थानां वैलक्षण्यं तन्मात्रे संख्याशब्दः प्रतिपादयति। मूर्तामूर्तगणनात्मकत्वात्संख्यायाः॥ एको घट इत्यत्रापिघ्रादिनिरासाद्भेदावगति
रस्त्येवा। यच्चेषीकांतमिति। उपचितपरिमाणोपलक्षणमिषीकांत [redacted] ग्रहणं तेनायमर्थः। हिमवदादिमहापरिमाणमपि
संख्ययागण्यते सप्तकुलाचला इति उपचितपरिमाणमपित्र्यः परमाणव इति। यच्चापरिमाणमिति। अमूर्तमप्यात्मादिगण्यत इत्यर्थः। उन्मानप्रमाणपरिमा

यत्तावदुच्यते एतत्तापयसाचार्यैः अन्यासंख्याअन्यत्परिमाणमिति नैतत्तापकसाध्यं अन्यासंख्याअन्यत्परिमाणमित्यन्यापसिद्धमेवैत
त्। भेदमात्रं संख्याभ्याह॥ यच्चेषीकांतं यच्चापरिमाणं सर्वस्य संख्याभेदमात्रे ब्रवीति॥ परिमाणं तु सर्वतः सर्वतोमानमिति चातः परिमाणमिति।
प्रस्थस्य च समानाकृते नैकुतश्चिद्विशेषोगम्यते न चोन्मानतो न परिमाणतो न प्रमाणतः॥ ॥ ॥ ॥

=इयत्यपरिमाणवत्वमिपमेपित्संदृव्यविषयत्व.एतेन ताद्दशक्रियमानुते धाराम्ननिपरमसहत्परिमाणसाधपंतःप्रयुक्ताः॥परिमाणभावदलेनवानादृशव्यवहारोमेलाणप्रमाणुः१=अमर्वगतद्रव्यपरिमाणंतर्निः१=

णानि तु मूर्तद्रव्यविषयाण्येवं कश्चित्साठः यच्च परिमाणमिति। तत्रायमर्थः द्रोणादिपरिमाणमपि संख्यया परिच्छिद्यते द्वौ द्रोणाविति परिमाणग्रहणं चोपलक्षणं
सर्वस्य संख्यापरिच्छेद्यत्वात् न तु उक्तं। दृष्टिप्रस्थस्य वर्णादिमूर्तिभेदा यत्कल्पते क्रियाभेदा यकालस्य संख्या सर्वस्य भेदिकेति। सर्वत इति। आरोहपरिणाहाभ्यां सगाताभ्यां
धान्यादियेन मीयते काष्ठादिमयेन तत्परिमाणं प्रस्थादिकमुच्यते। प्रस्थस्य चेति संख्ययैव विशेषोगण्यते द्वौ प्रस्थौ त्रयः प्रस्था इति न त्वन्यत इत्यर्थः॥ भिन्न सन्निवे राम०
शस्य हस्त्यादेर्नापि परिच्छेदो भवतीति समानाकृतिग्रहणं समानसन्निवेशप्रतिपादनार्थं प्रसंगेन उन्मानप्रमाणयोरपि स्वरूपप्रतिपादनं प्रश्नपूर्वकं करोति॥ ॥ ए

=प्रस्थांतरादिन्नसन्निवेशस्यप्रस्थस्येत्यर्थः१=

=अथावृष्टिवीनतेवमतिपुरुषदघ्नमितिसत्रमात्रमालोलहृत्रिकंसंलुगाप्तकि:।२=

किं पुनरिति। उद्देशमिति॥ ऊर्ध्वं दिग्वस्थितं परिच्छेदकमुन्मा नमुच्यते। यथा हास्तिनमुदकमपि स त्रहस्ती जिह्वे चिदाहुः। अन्ये तु हस्त्यादेः प्रमाणमेवं तर्भावाच्चुल्लादेद्दाद्दावा रोप्ययेन द्वयं नरपरिच्छिन्नं गुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना स्वर्णादेर्गुरुत्वं मीयते तेन तदुन्मानं तेच्चोर्द्ध्वारोपणाद्दूर्ध्वमुच्यत इत्याहुः। आयाम इति। विस्तारो येन मीयते दारुवस्त्रादीनां तत्प्रमाणं हस्तादि तच्छायामपरिच्छेदित्वादुपचारादायामशब्देनोच्यते॥ नैषेति। न कुतश्चित्सन्निवेशादेस्तत्संख्यामात्रं सन्निवेशादिनिरपेक्षं मानमितस्य

=दिवादेर्मात्रकर्त्तर्दिकृपं:ऊर्ध्वंसंघद्वयांनरंपरिच्छिन्नत्तीसर्थ:।१= × सर्वतः१

किं पुनरुन्मानं किं परिमाणं किं प्रमाणं। ऊर्द्ध्वमानं किलोन्मानं। ऊर्ध्वं यन्मीयते तेन तदुन्मानं। परिमाणं तु सर्वतो मानमिति चातः परिमाणं कुत एतत्सरिः सर्वतोभावेवर्तते आयामस्तु प्रमाणं स्यात्॥ आयाम इति विवक्षायां प्रमाणमिसे न ऊवति॥ संख्यावाद्यानुसर्वतः। आतश्च सर्वतः संख्या बाह्याभेदमात्रं ब्रवीले षानैषामानं कुतश्च न एवं च कृत्वा संख्यायाः पृथग्ग्रहणं क्रियते। यदप्युच्यते। तरस्य परिमाणं संख्यायाः संज्ञा संघसूत्राध्ययने षितिविशेषणान प्रकल्पत इति आह। ये परिमाणं या संख्येति न चास्ति संख्या परिमाणं तत्र वचनादिष्यते विवक्षा भविष्यति। यदप्युच्यते। क्रीतवत्परिमाणादिति च संख्याविहितस्य प्रत्ययस्यातिदेशो न प्रकल्पत इति। संख्याया इति वक्तव्ये किं पुनरिमे ठगादयः प्राग् अर्हादेर्वति आहो स्वित्तसह हेणा कस्मात्रविशेषः ठगादयः प्राग् अर्हाच्चेदर्हे नद्विधिः ठगादयः प्राग् अर्हाच्चेत् तत्र अर्हे तद्विधिः अर्हे ठगादयो विधेयाः शतमर्हति शत्यः शतिकः साहस्र

=कर्त्तव्यमिति:आरब्धानंकर्तव्यमितिसर्थ:।क्रीतवत्परिमाणदिति...परिमाणभिन्नसंख्यो...

यः॥ तथा हि। द्वौ मे रसषे पावित्स्यपि भवति इयती विवक्षेति हि विपरिसागे न परिच्छेदकत्वमात्रमाश्रीयत इत्यर्थः। नन्वेवमप्यव्यभिचारात्संख्याया विशेषणमनर्थकं। नैष दोषः। अन्यया अर्थस्य यदा परिच्छेदिका संख्या तदा मत्स्ययोयथास्यात् पञ्चको गोसंघ इति यदा तु प्रकृत्यर्थस्यैव परिच्छेदिका संख्या पञ्च गावो यस्य संघस्येति तदा मा भूदिसेवमर्थं संख्यापरिमाणग्रहणेन विशेष्यते॥ संख्याया इति ते नेति लक्ष्यसिद्धये संख्याग्रहणं त्राधिकं कं कं ने व्यमित्यर्थः॥ किं पुनरिति॥ किं मर्यादायामाङ् उत अभिविधौ इति प्रश्नः

॥ अर्हतीति शब्दे कृते शानुकारणं चात्रा हेशब्दः॥ विधा १ ॥

=पंचपरिमाणमस्यगोसंघस्येत्यर्थः।पंचसंख्यापरिच्छेदपरत्विमावत्रे:१=

=अथाधिकानांसंख्येयेसबन्धादत्र...परिमाणं...संख्या...१=

=यदितस्तर्हिमित्यर्हशरदृएवावधि:...१=

भा०कै०५ वस्नेवचनादिति। पटादेरर्थस्य शसादिशब्दैरभिधानादिति भावः। मांसौदनिक इति। न हि मांसौदनो भृतिर्येन्मूल्यं इति भावः॥ अस्मिन्दीयत इति अधिकरणत्वेसंप्रदान
१० त्वं वा विवक्षित्वा प्रत्ययो विधास्यत इति विकल्पप्रदर्शनार्थमुभयोरुपादानं तत्र तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयत इति योगविभागः क्रियते तेन तदस्मिन्नित्येको
योगः वृद्ध्यायलाभशुल्कोपदा इति द्वितीयः पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थं दीयत इति तृतीयो योगः उभयोर्योगयोः शेषः ततो दीयते तदस्मिन्निति सप्तम्यर्थे ठ

वस्नेवचनात्सिद्धं। इहयः शतमर्हति शतं तस्य वस्नो भवति। तत्रसेप्स्यां वा वस्नमत यइ सेव [redacted] सिद्धं [redacted] वस्ने वचनात्सिद्धमिति
चेन्मांसौदनिकादिषु प्राप्तिः मांसौदनिको तिथिः भवेतच्छत्रिकः कालायस्मृपिकः तथा गुणानां परिप्रश्नो भवति किमयं ब्राह्मणोऽर्हति शतमर्हति शासः
शातिकः साहस्रः नैष्किक इति न सिद्ध्यति संतुतर्हि समर्हेण। आर्हीच्चेद्भोजनादिषु तिप्रसंगः आर्हीच्चेद्भोजनादिषु अतिप्रसंगो भवति भोजनम
र्हतियानमर्हतीति। किमुच्यते भोजनादिषु तिप्रसंगः ... ति यदाच्छेदादिभ्य इत्युच्यते। अवशेषं मांसौदनिकाद्यर्थे योगविभागः कर्तव्यः तदर्हतीति ततः
छेदादिभ्यो नित्यमिति तस्मिन्क्रियमाणे भोजनादिषु तिप्रसंगो भवति। उक्तं वार्तिकेषु उक्तं॰ अनभिधानादिति। अनभिधानाद्भोजनादिषु तिप्रसंगो भ
वति अथवा योगविभागो न करिष्यते कथं मांसौदनिको तिथिः भवेतच्छत्रिकः कालायस्मृपिकः अस्मिन्दीयते अस्मा इति च एवमेतस्मिन्सिद्धं अथवा
पुनःसंतु प्रागर्हीय न नु चोक्तं ठगादयः प्रागर्हीयाच्चेत्तदर्हन्तद्विधिरिति परिहृतमेतत्। वस्नेवचनात्सिद्धमिति ननु चोक्तं वस्नेवचनात्सिद्धमिति चेत्तन्मां
सौदनिकादिषु प्राप्तिरिति। तथा गुणानां परिप्रश्नो भवति किमयं ब्राह्मणोऽर्हति शतमर्हति शासः शातिकः साहस्रः नैष्किक इति न सिध्यतीति नैष दो
॥ षः अस्मिन्दीयते अस्मा इति च एवमेतत्सिद्धं॥ ॥ ॥
गादयः प्रत्यया भवन्तीति तदस्मिन्दीयते तदस्मा इति चोपसंख्यानमिति वचनाच्च तुल्यार्थेऽपि भवन्तीति सर्वे प्रतिद्विः यद्यप्यर्हते पि न दीयते तथापि योग्यतया संभावि एम०
तदानां त्यय प्रत्ययोत्सादनेन विशिष्टस्वरूपनिसराकृत्य सतिरविरहेति मन्यते॥ ॥ ॥ ॥ १०
=जोधोसादनेन-१ =तदस्मिन्दीयतइत्युपकल्पतदस्मादित्युपसंख्यानमितदर्थः।२=

=परिमाणवाचित्वादिति· पूर्वसूत्रे परिमाणशब्देन मूर्तिभेदकं दिशा दिग्रूपं परिच्छेदकं गृह्यते न तु उन्मानादेरपि ग्रहणादिति भावः। ऊर्ध्वमानमित्यादि लक्षणं न स्येदकथनं॥ १= इत्यर्थे आर्हादिप्रयेनेन· १= आमासेति· तदीजं तु न च ठञ्विधौ काचित्प्रकृतिर्निर्दिश्यते इत्युक्तं भाष्ये· ३= ...भेण
...मेणं असमासग्रहणस्य ज्ञापकत्वपरं भाष्यं· अन्यथा केवलनिष्कशब्दस्य सर्वतो मानरूपपरिमाणार्थकत्वाभावात्

असमासे। असमास इति वक्ष्यमाणः प्रकृतेरभिप्रायः। परमनैष्किकमिति। ठञेवात्र भवति। निष्कशब्दस्य परिमाणवाचित्वात् पूर्वेणाप्राप्तेनेन ठग्विधीयते। निष्कादिभ्य इति। एवं च ग्रहणं वार्त्तिककारः पठन्न लक्षयति। त्यादिसिद्धिमेव प्रयोजनं मेने भाष्यकारस्तन्न्यायानुसारं न्यायः एवं च ग्रहणमविवक्षितार्थं मत्वा प्रयोजनानि प्रदर्शयितुमपि लाघवं लक्षयति त्यादि ग्रहणमेव न्यायकृतस्य स्थापयिष्यति। प्रागवतेष्ठञित्यत्रेति तेन परमनिष्कशब्दात् ठञ् सिद्धो भवति केवलात्प्रातिपदिकात् ठञ्विधीयमानः समासान्न स्यादिति साभा समाते गोरमुक्तं न च ठञ्विधाविति। यत्र विशिष्टा प्रकृतिरुपादीयते तत्र तदन्तविधेः प्रतिषेधः ठञ्विधौ तु उक्ता प्रातिपदिकात् प्रातिपदिकमात्रं गृह्यत इति वेनाश्री

असमासे निष्कादिभ्यः। असमास इति किमर्थम्। परमनिष्केण क्रीतं परमनैष्किकं नैतदस्ति प्रयोजनं निष्कशब्दात्सत्ययो विधीयते तत्र कः प्रसङ्गो यत्परमनिष्कशब्दात्स्यात् नैव प्राप्नोतीति नार्थः प्रतिषेधेन तदन्तविधिना प्राप्नोति ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। अत उत्तरं पठति निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्ताप्रतिषेधस्य। निष्कादिष्वसमासग्रहणं क्रियते ज्ञापकार्थं किं ज्ञाप्यमेतत् ज्ञापयत्याचार्यः पूर्वत्र तदन्तविधेः प्रतिषेधो न भवतीति किमेतस्य ज्ञापने प्रयोजनं प्राग्वतेष्ठञित्यत्र तदन्तविधिः सिद्धो भवति। नैतदस्ति प्रयोजनं ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते न च ठञ्विधौ काचित्प्रकृतिर्निर्दिश्यते। इदं तर्हि प्रयोजनं आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् परमगोपुच्छेन क्रीतं पारमगोपुच्छिकं एतदपि नास्ति

१ प्रयोजनं॥ ॥

यते तत्र समासस्यापि प्रातिपदिकत्वात्तदन्तविधेनेति विधिन्नेप्रतिषेध इति ठञ् सिध्यतीति भावः॥ पारमगोपुच्छिकमिति। ठक्प्रतिषेधात् ठञ् भवति। यद्येवं केवलस्य प्रतिषेधो न प्राप्नोति गोपुच्छिक इति नैष दोषः यस्यां परिभाषायां प्रातिपदिकस्य श्रुतिरस्ति सेह नोपतिष्ठत इति सामान्यापेक्षं ज्ञापकमाश्रीयते तेन ग्रहणवता प्राति[पदि]केन तदन्तविधिर्नास्ति व्यपदेशिवद्भावोऽप्रातिपदिकेनेति द्वयोरप्यत्रानुपपत्त्या नात् तदन्तविधिना तदन्तस्य कार्यं केवलस्यापि व्यपदेशिवद्भावेन॥ ॥ ॥

=व्यपदेशिवद्भावस्य प्रातिपदिकेनेति निषिद्ध इति भावः।२=

=पूर्वादिनिदिति·यदिग्रहणं कृताग्रातिपदिकेन न दंतविधिः स्यात्पूर्वादिनिरिसेवेवाच्यं स्यात्क्वसपूर्वाच्चेति कृतपूर्वी कटमित्यादौ तदंतविधिनैव सिद्धत्वात्सतस्तु तदंतविधेरज्ञापकं शक्ति·तथाय्यदिग्रपदे पि ग्रहणे प्रातिपदिकेनेति न स्यात्सपूर्वात्पूर्वादिसेवेवाच्यं न तु पूर्वादिनिदिति पृथक् तं कृतं तु शा=
=तदभावे इति·तदंतविध्यभावे तदंतप्रतिषेधो ज्ञापयितुमशक्य इति भावः·ननु विधितिनास्वरसः स्वत्वाते·विधावप्येवमेव पनो ग्रहणवतेस्मनि दिवमद्वं स्याज्ञाप्य विरोधश्चेति·२= प्रकं भवति·१=

भा०कौ०५ विधौ प्रतिषेध इति। पूर्वादिनिस्सपूर्वाच्चेति प्रत्ययविधौ ग्रहणवत्ते सेतस्याः परिभाषायाः ज्ञापितत्वात् यत्रैव प्रत्ययो विधीयते तत्रैवानयातदंतविधिः प्रतिषिध्यते लुगो पु
११ छंगराका परिमाणादिस्वनेनठक्प्रतिषिध्यत इति न तदंतविधिप्रतिषेधः नापि प्र परेषि वहुभावप्रतिषेधः अन्यथा लुगोपुच्छात्परष्ठकुसाधुर्न भवतीत्येवं प्रतिषेधे
विज्ञायमाने गोपुच्छश्रुतेस्सर्वत्राविशेषात् केवलात् तदंताच्च ठको साधुत्वं सिध्यतीति नात्र तदंतविधिनाप्रयोजनमिति तदभावे तत्प्रतिषेधस्याप्रसंग इति ज्ञापनस्यापि न
प्रयोजनं वक्ष्यते तदिति। तच्चावश्यं वक्तव्यं अस्मिन् ज्ञापके विध्यर्थे सति तु नियमार्थे संख्यापूर्वपदानामेव यथा स्यात् इहमाभूत् परमपारायणं वर्त्तयतीति त

विधौ प्रतिषेधः प्रतिषेध उच्यते। एवं तर्हि ज्ञापयत्याचार्य इतउत्तरं तदंतविधि प्रतिषेधो न भवतीति किमेतस्य ज्ञापने प्रयोजनं। पारायणतुरायणा
चांद्रायणं वर्त्तयति [redacted]
द्वैपारायणिकः त्रैपारायणिकः अत्र तदंतविधिः सिद्धो भवति एतदपि नास्ति प्रयोजनं॥ वक्ष्यते तत्। प्राग्वतेः संख्यापूर्वपदानां तदंतग्रहणमलुकीति।
प्रयोजनं तर्हि प्रयोजनं खलयवमाषतिलवृषब्रह्मणश्च। राजमाषेभ्यो हितं राजमाष्यं क्षेमतिलेभ्यो हितः क्षेमतिल्य। प्राग्वतेः संख्यापूर्वपदानां तदं
ग्रहणमलुकि। प्राग्वतेः संख्यापूर्वपदानां तदंतग्रहणमलुकि कर्त्तव्यं। पारायणतुरायणचांद्रायणं वर्त्तयति द्वैपारायणिकः। अलुकीति किमर्थं। द्वा =लुगंतायाप्रकृतेर्न तदंतविधि= =दित्यर्थः।२=
१ भ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं त्रिशूर्पं। द्विशूर्पेण क्रीतं द्विशौर्पिकं त्रिशौर्पिकं॥ ॥ ॥

भ्यां लुगंतायाः प्रकृतेर्मा भूत् द्विशूर्पेण क्रीतं द्विशौर्पिकमिति। राजमाष्यमिति। ननु राजमाषशब्दस्य जातं तरवाचित्वात्माषशब्दस्यानर्थकत्वात् प्रत्ययो न प्राप्नोति। नैष दोषः
यथैककविंशतिनेरसिंहो गौरखरो लोहितशालिरिसाहीनां समुदायानामर्थान्तराभिधायित्वे पि नावयवानामानर्थक्यं तत्स्यापि शब्दसंस्कारार्थत्वाद्यद्दिशाद्यैस्सर्वैरपरिकल्पितार्थ
यत्नात्स्वीपतेनालिकीतुवाक्यस्यैवार्थस्य प्रसाधनाय प्रयोगात्। द्वाभ्यामिति। तद्धितार्थेति समासे कृते शूर्पाद अन्यतरस्यामिति सञ् ठञोरतस्माद्यदेतिलुक् कृते नो द्विशूर्पेण एम०
क्रीतमिति सञोभावे सामान्यविहितष्ठञ् भवतितस्य द्विगुनिमित्तत्वाभावाल्लुगभावः परिमाणांतस्य स्युत्तरपदवृद्धिः॥ ॥ ११ ॥ ॥

=पर्याद्अन्यतरस्यामिति सञ्लुगंत प्रकृतेस्तदंतविधिनाग्रहणसभावात्=   =अलुकीत्युक्तेः फलं दर्शयति·समासे कृतेनेदिति·२=

=प्रत्ययार्थस्यैकत्वात्कथं शतत्वमत आह· अत्र हीति· आद्येपि न भेद इत्याशयेन प्रत्ययोत्पत्तिरिति भावः।१=अद्वयमिति· शतं शाटकद्वयमित्यस्यापि संभवात्तस्य हेयत्वं अत एव संख्यान्तरसाधारणं तदित्याहुः।५=

शताच्च संख्याया इति कन्निषिद्धे ठन्यतौ विधीयेते। तत्राशत इति प्रत्ययार्थस्य विशेषणं न प्रकृतेरसंभवात्। न हि शतशब्दस्य शतेन वृत्तिः संभवति। तत्र प्रत्ययार्थस्य द्वि-
विधं शतत्वं प्रकृत्यर्थव्यतिरिक्तसंख्येयान्तरविषयं प्रकृत्यर्थविषयं च। तत्र द्वितीयं यथा शतेन क्रीतं शतं शाटकशतमिति। अपरं तु शतमध्यायाः परिमाणमस्य ग्रन्थस्य श-
तकः इति। अत्र हि केवलं प्रत्ययोत्पादनाय प्रकृतिप्रत्ययार्थयोर्भेदविवक्षा तात्त्विकस्त्वभेद इति प्रत्ययार्थस्य एकत्वेपि शतत्वमस्त्येव यथा शतमित्येकत्वे विभक्तिर्वा-
च्येमसपि शतत्वं न निवर्त्तते तत्राद्यस्य निषेधो मा भूदित्याह शतप्रतिषेध इति। तत्र केचिदाहुः। न्यायसिद्ध एवार्थो वार्त्तिककारेण प्रतिपादितः। प्रकृत्यर्थस्य प्र-
नस्य यत्र प्रत्ययार्थत्वं तत्रान्तरंगमहेयं संख्यान्तरसाधारणं च शतत्वमन्यत्र तु शतं शाटकशतमित्यादौ शाटकान्तरप्रयोगसमधिगम्यत्वाद्बहिरंगमिति तत्र प्रतिषे-

शताच्च ठन्यतावशते॥ ॥ शतप्रतिषेधेन्यशतत्वेऽप्रतिषेधः। शतप्रतिषेधेऽन्यशतत्वे प्रतिषेधो न भवतीति वक्तव्यमिह मा भू-
त्॥ शतेन क्रीतं शतं शाटकशतमिति। अन्यशतत्व इति किं। शतकं निदानमिति॥ ॥ ॥ ॥

=एकसंख्यत्वादिति· एवं चैकत्वं प्रत्ययार्थः शब्दप्रतीतेर्विषय इत्युक्तं· नेदं शतत्वमित्याह· अनुमीयत इति· अवयवगतं तद्वारेण्यशब्दबोधोत्तरं प्रतीतिविषयीक्रियत इत्यर्थः। न भवतीति· बहुत्वस्य शब्दजप्रतीतिविषयत्वाभावादिति भावः।१=

धाप्रसंगः। अन्ये त्वाहुः। शतकोऽयं ग्रन्थ इत्यत्र ग्रन्थस्यैकसंख्यत्वाच्छतत्वमनुमीयते तत्र यथा वृक्षा इत्यत्र मूलाद्यवयवसमवेतबहुत्वसंख्याश्रयं बहुवचनं भवत्येवम-
शत इति प्रतिषेधोऽयं शब्देनाप्राप्तोऽस्यान्यशतत्वे च प्राप्नोतीति वार्त्तिकारंभः। ततोऽन्यशतत्वे प्रतिषेधाभावात्सामर्थ्यादनुमीयमानशतत्वविषयः प्रतिषेधः संपद्यते एवं
च सति शतं गावः परिमाणमस्य गोसंघस्य शतको गोसंघ इति। अत्रापि प्रतिषेधो भवति। अपिशब्दकाशकृत्स्नयोस्त्वयं ग्रन्थ इति वचनाद्धन्यत्र प्रतिषेधाभावो नि-
यतकालत्वाच्च स्मृतयोर्व्यवस्थाहेतव इति मुनित्रयमते नाद्यत्वे साध्वसाधुप्रविभागः॥ ॥ ॥

=यथा कलौ पाराशरी स्मृतिरिति·१= =अस्य शतत्वस्य प्रत्ययार्थस्य न तथा शब्देनाप्रतीतेरिति भावः।२=

=उतेस्त्वंतत्वादभ्रामोवचनंङ्तेश्चेति॰ एवमपि विंशतिशब्दान्नस्यादतआह॰ विंशतीति॰ ९=शतिचइति॰ द्वयोर्दशनोर्विन्भावः॰ शतिच्प्रत्ययश्चत्ताश्रयणात॰ यत्तु विंशतेर्देशत् क्तिप्रत्ययश्चत तत्ज्ञापकमेवाश्रयणीयं॰ ९=

भा०कै०५ संख्या॑ इतेश्चेति। विंशतिशब्दानुविंशतिकात् खइति ज्ञापकात् कन्न भवति। नचइतेरिति। समुदायस्यार्थवत्वात् तदवयवत्तिशब्देनार्थकः॑ अतएव विंशतिशब्दे शतिचः

१२ प्रत्ययत्वान्निशब्दस्यानर्थकात् ज्ञापकमंतरेणापि कन्न सिद्धः॑ नैषेति। लौकिकार्थवत्ताप्रकृतीनां प्रत्ययानां च नास्ति केवलानामप्रयोगादिति भावः। यान्येता

नीति। यद्यपि प्रत्ययाऽपि शब्दसंघातास्तथापि तेषामानर्थक्यादर्थवंतः शब्दसंघाता इहविवक्षिताः॑ यथोक्तं संग्रहणोपायं संकरोतीति स्त्रणं न भवति उऊह

संख्याया अतिशदंतेश्चइतेश्चेति वक्तव्यं। इहापि यथा स्यात्। कतिभिः क्रीतं कतिकं किं पुनः कारणं न सिध्यति संतायानेतिप्रतिषेधः

प्राप्नोतीति प्रतिषेधाद् इति ग्रहणमिति चेदर्थवद्ग्रहणात्सिद्धं अर्थवतः तिशब्दस्य ग्रहणं। नचइतेः तिशब्दोऽर्थवान् नैषापरिभाषा इह श

क्या विज्ञातुं नहि केवलेन प्रत्ययेनार्थोगम्यते केनतर्हि सप्रकृतिकेन तेनैषापरिभाषाकर्तव्या भवति यान्येतानि शब्दसंघातग्रहणा

नि तत्र तर्हि वक्तव्यं न वक्तव्यं। अर्थवद्ग्रहणात्सिद्धं ननु चोक्तं नैषापरिभाषा इह शक्या विज्ञातुं नहि केवलेन प्रत्ययेनार्थो गम्य

ते केन तर्हि सप्रकृतिकेनेति। केवलेनापि प्रत्ययेनार्थो गम्यते। कथं उक्तमन्वयव्यतिरेकाभ्यां। वतोरिड्वा कस्मायमिड्विधीयते॥॰

णोगमेर्मुउकृहणं न भवति गमेर्मुत स्वास्यतीति हनग्रहणे लीहनग्रहणं न भवति प्लीहानावितिकेवलेनापी तिशास्त्रव्यवस्थाहेतुरन्वयव्यतिरेकगम्या

र्थवत्ताश्रीयत इत्यर्थः। अतएव प्रोर्थवत् ग्रहणात्का प्रोकुशेइत्यादौ प्रेशब्दस्य ग्रहाभावः उपसर्गाणामपि केवलानां प्रयोगाभावाल्लौकिक्या अर्थ

वत्ता याऽभावादन्वयव्यतिरेकव्यवस्थाप्यैवासावाश्रीयते। वतोरिकस्मायमितिरित्वादस्यागमत्वं निश्चितं आगमी तु न निर्दिष्ट इति तद्विषयप्रश्नः॑ व एम०

९ तोरितिपंचमीनिर्देशात्तत्वं तस्यागमित्वमयुक्तं॥ ॥ ॥ १२

कन इति। वृत्तं तस्य संख्यातात् पूर्वेण विहितस्येति भावः। आनंतर्याच्च कृन्मागमिनमन्यते। तदिति। संख्यायास्तावद्दने कस्य प्रत्ययस्य विधानाद्रागमिविशेषो दुर्लभः। प्रत्ययाधिकाराच्च चरेष्ट इसादिवृद्धिः प्रत्ययलप्रसंगः। अनकारांतादिति। यथा डि समस्यापि टिलोपः। अप्रयोजनाभावात्। टकारस्येत्संज्ञा न भवतीति कस्मान्नोच्यते। नैतदस्ति। हलंत्यमिति श्रुतेर्वेलीयस्त्वादित्ततदिति प्रकरणस्य दुर्बलस्य बाधोपपत्तेः प्रयोजनत्वाभावान्नचेति। पंचमी हि प्रत्ययस्य रूपमुत्पादयतीति यथा गुणो किड्ङः सन्नि

कन इत्याह। तत्कनो ग्रहणं कर्त्तव्यं अक्रियमाणे हि प्रत्ययाधिकारात् प्रत्ययो यं विज्ञायेत। टित्करणसामर्थ्याद्दादिर्भविष्यति। अस्य न्यदित्करणस्य प्रयोजनं। टित इति ईकारो यथा स्यात्। अकारांतप्रकरणे ईकारः। न चैषोकारांतः एवमपि कृत एतत्टित्करणसामर्थ्याद्दादिर्भविष्यति न पुनः अकारांतप्रकरणे अनकारांतादपि ईकारः स्यात्। तस्मात्कनो ग्रहणं कर्त्तव्यं। न कर्त्तव्यं प्रकृतमनुवर्त्तते क्व प्रकृतं। संख्यायाः अतिशदंतायाः कन्निति तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः। उत्तरार्थमेषा पंचमी कन्निति प्रथमायाः षष्ठी कल्पयिष्यति तस्मादित्युत्तरस्येति। प्रत्ययविधिरयं न च प्रत्ययविधौ पंचम्यः प्रकल्पिका भवंतीत्यायं प्रत्ययविधिः विहितः प्रत्ययः प्रकृतश्चानुवर्त्तते॥ ॥ ॥

तिन तु षष्ठी प्रकल्पयतीत्यत आह। षष्ठीप्रकल्पनाभावादिति भावः। प्रकृतश्चेति स्वरितत्वप्रतिज्ञानादिति भावः। ननु विधानार्थोपि कनोनुवृत्तिरस्तं भवति इत्याबाधीतितत्र इट्कनो वा भवतः पक्षेऽरन्निति प्रत्ययत्रयं स्यात्॥ नैष दोषः। पूर्वेसूत्रेणानावतः कन्विहित इति नत्र एहानुवृत्तिर्विधानार्था न भवतीति प्रतीतिरुपजायते। तस्मादित्युत्तरस्येत्येषा च परिभाषा वृत्तिस्थते तत्र किमनिष्टप्रकल्पनया अनेकवाधोत्स अपेक्षप्रकल्पनया सर्वानुग्रहोन्याप्यः लक्ष्यस्यानंतयागस्यानाच्च॥ ॥ ॥

=अनेकेति॰ विधानार्थत्वाभाव [redacted] प्रतीतेस्तस्मादितिपरिभाषायाश्चेत्यर्थः।१= नयेति॰ मावनिक स्वावलक्ष्यैव मेवावस्थानादित्यर्थः। एवं चलक्ष्यानुसारिव्याख्यानमेवात्रशरणमिति भावः।१=

भा॰कै॰५ विंशतिः प्रत्ययांतनिपातनमिति। कन् प्रत्ययांतोच्चारणमित्यर्थः। ननु विंशतिशब्दे शतिचः प्रत्ययत्वात् त्रिंशच्छब्दस्यानर्थकत्वात् प्रतिषेधप्रसंगाभावात् किं ज्ञापकाश्र
13 यणेन उच्यते। द्विशब्दस्य विंशादेशः शतिप्रत्ययः इत्येषा प्रक्रिया श्रीपतेः एवं हि ज्ञापकाश्रयणेन त्रिंशत्कशब्दोऽपि सिध्यति अन्यथा त्रिंशच्छब्दैकदेशोऽर्थवत्त्वाद् शदं
तायाः इति निषेधः स्यात्। ननु विंशतिशब्दादर्हत्याद्यर्थविवक्षायां कन्प्रत्यये विंशतिकशब्दः स्यादिति कथं ज्ञापकं नैतदस्ति स्वार्थिके कन्प्रत्यये विंशतिका

नि॰

विंशतित्रिंशद्भ्यां ड्वुन् असंज्ञायामिति किमर्थं त्रिंशत्को विंशतिकः कथं चात्र कन् भवति संख्यायाः कन् भवतीति अतिशदन्तायाः इति प्र
तिषेधः प्राप्नोति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्यत्र कन्निति यदयं विंशतिकात्खः इति प्रत्ययान्तनिपातनं करोति विंशतेरेतत् ज्ञा
पकं स्यात् नेत्याह योगापेक्षं ज्ञापकं अथवा योगविभागः करिष्यते विंशतित्रिंशद्भ्यां कन् भवतीति। ततो ड्वुन् असंज्ञायामिति। कंसाट्टि
ठन्। टिठन्नर्द्धाच्च। टिठन्नर्द्धाच्चेति वक्तव्यं। अर्द्धकः अर्द्धिकी। कार्षापणाद्वा प्रतिश्च। कार्षापणाट्टिठन् वक्तव्यः वा च प्रतिरादेशो व
क्तव्यः। कार्षापणिकं। कार्षापणिकी। प्रतिकः प्रतिकी॥ ॥ ॥

याः इति निर्देशः स्यात् असंज्ञायां ड्वुनो विधानात् संज्ञाविषय एव ज्ञापकमाश्रयणीयं। योगापेक्षमिति। यथा पुंवदिति योगापेक्षत्वात् ज्ञापकस्य तस्यार्थेन स्त्र
स्त्र्योरप्रवृत्तौ स्त्रीवदित्यपि भवति एवमेतद्योगापेक्षं विंशतिकादिति ज्ञापकमिति त्रिंशत्कशब्दोऽपि संज्ञायां भवतीत्यर्थः। कंसात् अर्द्धिक इति॥ अर्द्धशब्दः
कार्षापणस्यार्द्धे रूढ इति भाष्यवदपेक्षायामसामर्थ्यं नाशंकनीयमिति केचित्। अन्ये तु प्रकरणादिवशाद्यदा निर्ज्ञातो भागविशेषो भवति तदा नासाम राम॰

=अर्द्धशब्दस्य भागवाचित्वात् ८=

र्थ्यमिति सर्वस्यैवार्द्धस्य ग्रहणे न भाष्यमित्याहुः॥ ॥ 13

त् ष्यञ्नेभवतिकृते तु नञ्समासे ब्रास्तणादेराकृतिगणत्वात् ष्यञिसत्या चतुर्थ्येमित्यादि भवति यथातथयथापुरयोः पर्यायेणोसेतत् सूत्रं विवक्षाभेदे
न रूपद्वयसिद्धिं मत्वामाष्यकारेण प्रत्याख्यातस्तत्र यदा पूर्वं भावविवक्षा पश्चात्प्रतिषेधविवक्षा तदा नञ्या याथातथ्यं-इ याथापुर्य्यमिति भवति पूर्वं तु प्रतिषे
धविवक्षायामायथातथ्यमायथापुर्यमिति भवति न पस्तु भावइत्युत्र पतिशब्दः केवलं प्रातिपदिकं न पस्तं तमितियगभावेत्वं तत्स्यां नञ्समास इति वचना

=नञ्यतीति-त्वततोनुभवतएव-त्वतस्यामितिवचनात्-२=ननेवंकृते नञ्समासात्ष्यञपिमस्यारन आह-कृते विशिष्ट समासात्यञिष्यतस्तत्रप्रमाणमाह-पर्य्येति न नुसापेक्षादपि न द्धितोत्पत्तौ चतुरादिभ्योऽगपदुभयविवक्षायां परत्वात्समये-चातुर्यमितिस्या=

=इत्यत्राह-सामाचतुर्यमिती ष्यञेऽतआह-चतुरादिभ्यइति-४=

पर्य्यं नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिता इत्याह ॥ ॥

=तत्तौभवतइति-नञ्समासे कृते यकृतुल-ननञ्पूर्वादिति निषेधात्-अस्मादेव वचनैयटादेन तद्देशेभ्रसास्यानुएवस्र्वं कैयट तासर्यं नस्व वृथाप्रत्याख्यानमइति विवरणकाराः।

=अशुचिशब्दादिष्यतएवास्तत्रप्रमाणमाह-नञइति-आशौचम् शप्रावमतीतेदितिभावः।२=

=यथात्मतानिति-अपादवममानुष्यकमित्यादौ-४=कविस्रर्वनिति-अयाथातथ्यमित्यादौ-निषेधात-आचतुर्यमाशेचमित्यादौ-४=

नञ्समासे कृते त्वं तत्वौ भवतः नपरोभावो नमनुष्यस्य भावो नद्विहायनस्य भाव इत्यादौ पूर्वोक्तज्ञापकात् नञर्थापेक्षत्वेपि पूर्वं प्रसयः पश्चात् नञ्समासः आपा
दवममानुष्यकमद्वैहायनमिति अशुचि शब्दान्तत्पुरुषादिगं तादिति इष्यत एवा णऽऽशौचमशौचमिति नञ् शुचीश्वरेति पूर्वपदस्य वा वृद्धिः जरपद
स्य नितसंनपुल्कस्य भाव इत्यादौ मापेक्षात् ष्यञ्नुसञ्जो वाशौल्पमित्यादि भवति तदेवं तत्त्वे स्मिन् प्रत्याख्याते लक्ष्यं रक्षणवणात् केचिद्भाव निषेधयोर्युगप
द्विवक्षायां ज्ञापकात् नञर्थापेक्षत्वेपि पूर्वं यथा प्राप्तं भावप्रसयः पश्चान्नञ्समासः त्वतत्वौ नञ्कृते नञ्समासे केचित्पूर्वं भावविवक्षा केचित्पूर्वं निषेधविवक्षा ॥

पृथ्वादि। वावचनमिति। वक्ष्यमाणोभिप्रायः। आचार्यदेशीयः परिहरति। वाक्यमपीति। अणसमावेशार्थमिति यत्नोत्सर्गोपवादौ विभाषा तत्रापवा
देन मुक्ते उत्सर्गो न प्रवर्त्तेते वाक्यानुत्तानार्थत्वाद्विभाषायाः लिंगं च पारे मध्ये षष्ठ्या वा पीलाया वेत्यादिषु विकल्पवचनमसमार्थस्येत्स अणसमावेशा
र्थमिह वावचनं। गुणं चातुर्वर्ण्यादीनामिति प्रसंख्यानोच्चारणं भावकर्मसंबंधनिवृत्त्यर्थमिति स्वार्थ एव ष्यञ् भवतीति चत्वारो वर्णाश्चातुर्वर्ण्यं

पृथ्वादिभ्य इमनिज्वा। वावचनं किमर्थं। वाक्यमपि यथा स्यात्। नैतदस्ति प्रयोजनं। प्रकृता महाविभाषा तया वाक्यमपि भविष्यति।
इदं तर्हि प्रयोजनं। त्वतलावपि यथा स्यातां। एतदपि नास्ति प्रयोजनं। आ च त्वादित्येतस्मादा त्वात्त्वतलावपि भविष्यतः। अ
त उत्तरं पठति पृथ्वादिभ्यो वावचनमणसमावेशार्थं। पृथ्वादिभ्यो वावचनं क्रियते। अणसमावेशो यथा स्यात्। पार्थवं। प्रथि
मा। गुणवचनब्राह्मणादिभ्यः कर्मणि च। ब्राह्मणादिषु चातुर्वर्ण्यादीनामुपसंख्यानं। ब्राह्मणादिषु चातुर्वर्ण्यादीनामुप
संख्यानं कर्त्तव्यं। चातुर्वर्ण्यं चातुर्वैद्यं। चातुराश्रम्यं। अर्हतो नुम् च। अर्हतो नुम् ष्यञ् च वक्तव्यः। अर्हतो भावः आर्हन्त्यं आर्ह

चतुर्वेदमेव चातुर्वैद्यं। अथवा चतस्रो विद्या अधीते विद्यालक्षणकल्पसूत्रान्तादकल्पादेरिति ठकः सर्वसादेर्द्विगोश्च ल इति लुक्। चतुर्विद्य एव चातुर्वैद्यम
नुशतिकादेराकृतिगणत्वादुभयपदवृद्धिः। अर्हतो नुम् चेति। अर्हः प्रशंसायामिति शतृप्रत्ययान्तो ह्यर्हच्छब्दः पूजार्थाभिधायी। आर्हन्तीति षित्वकरणात् स्त्रि
यामपि ष्यञः प्रयोगः। तथा चौचिती मैत्री सादिमयुज्यते॥ ॥ ॥

स्तेना। अयादेशः प्राप्नोतीति। यस्येतस्काकारलोपस्य पूर्वविधौ स्थानिवद्भावात्। अथेति। नानर्थके अलोन्त्यविधिरित्येषा परिभाषा प्रयोजनाभावात्। नादृता तद्धारं भसामर्थ्यादिति अलोन्त्यस्येत्यनुसंहारो बाध्यते इत्यर्थः। हायनान्त। यलोपश्चेति। यद्यप्यछन्दसः श्रोत्रभावो घञ्प्रत्यय इति पक्षस्तदा घञ्प्रत्ययलोपो परदात्वाकार्थे पदवच

स्तेनाद्यन्नलोपश्च। किमिदं नलोपे वर्णग्रहणं आहोस्वित्संघातग्रहणं। किंचातः यदि वर्णग्रहणं स्तेयं नलोपे कृते अयादेशः प्राप्नोति। अथ संघातग्रहणमंतस्य लोपः कस्मान्न भवति। सिद्धोंतस्य लोपः। यस्येति च। तद्धारं भसामर्थ्यात्सर्वस्य भविष्यति। हायनांतयुवादिभ्योण्। अणेप्रकरणे श्रोत्रियस्य यलोपश्च। अणेप्रकरणे श्रोत्रियस्योपसंख्यानं कर्तव्यं यलोपश्च वक्तव्यः। श्रोत्रियस्य भावः श्रौत्रं॥ ॥ इति श्री भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये पंचमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं॥ पादश्च समाप्तः॥ ॥

=यलोपश्चेति। संघातग्रहणं वर्णग्रहणे तकारस्य यस्येति लोपे सती कारस्य यणादेशः प्रसंगः॥ १=

न्मिति दर्शनेनं तदा घञ्शब्दे न इयेति हूपं लक्ष्यते वृद्धिश्चिन्त्या पलोपश्चेति पाठः॥ ॥ इत्युपाध्यायजय्यटपुत्रकैय्यटकृते भाष्यप्रदीपे पंचमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं॥ पादश्च समाप्तः॥ ॥ ॥ ॥ ७॥

भा०कै०५
४०

श्रीगणेशाय नमः॥ धान्यानां विभाषा। नयता मुक्त इति महाविभाषया वा कोऽपि द्वे विभाषाग्रहणमुत्सर्गप्राप्त्यर्थमेवेति भावः उमाभंगयोरिति निमित्ता
भावात् नाप्यां खञोऽप्राप्तिः विभाषाग्रहणं नुतिमाषाणुभ्य एव खञ्प्राप्त्यर्थं स्यात्। चमेष्विति। यवाश्च मे माषाश्च म इति च मेशब्दस्य पुनः पुनरुच्चारणा
च्च मेशब्देन तद्धेतोऽनुवाका उच्यन्ते। अथवा च मे शब्दस्य च मिति पन्नमकारेणेन तदनुकरणे च्च मिति श्रोगं तेनाचाकारेण च मशब्दो भवति च मशब्दो

=एकारांतानुकरणे स्वरूपस्य लुक् किंत्विह ... =धान्यत्वभावादित्यर्थः।३= ...
... विवरणकाराः। चिंताबीजं।५

श्रीगणेशाय नमः॥ विभाषा तिलमाषोमाभंगाणुभ्यः। तिलादिभ्यः [redacted] खञ्। तिलादिभ्यः खञ्चेति वक्तव्यम्। तिलानां ... तैलीनं। किमर्थमि
दमुच्यते नयतामुक्ते धान्यानां भवने क्षेत्रे खञित्येव सिद्धं न सिध्यति। किं कारणं। उमाभंगयोरधान्यत्वात्। धान्यानां भवने क्षेत्रे ख
ञित्युच्यते। न चोमाभंगे धान्ये च मेषु यस्य ... तद्धान्यं न चैते तत्र पठ्यते। तत्र हि खञ्ग्रहणं कर्तव्यं। न कर्तव्यं। प्रकृतमनुव
र्तते। क्व प्रकृतं धान्यानां भवने क्षेत्रे खञिति। यदि तदनुवर्तते। व्रीहिशाल्योर्ढक्। यवयवकषष्टिकाद्यदिति खञ्चेति खञपि प्राप्नो
ति। संबंधमनुवर्तिष्यते। धान्यानां भवने क्षेत्रे खञ्। व्रीहिशाल्योर्ढक् भवति। धान्यानां भवने क्षेत्रे खञ्। यवयवकषष्टिकाद्यद्भवति। धा
न्यानां भवने क्षेत्रे खञ् भवति। विभाषा तिलमाषोमाभंगाणुभ्यः भवने क्षेत्रे खञ्ग्रहणमनुवर्तते॥ धान्यानामिति निवृत्तं॥ ॥

विद्यन्ते येष्वनुवाकेषु ते च माः। अथवा आयानुवाकपो... गिति छस्य लुक्। संबंधमनुवर्तिष्यत इति धान्यग्रहणेन संबंधमनुरोत्स्यत इत्यर्थः॥ अथवा संब
ध्यत इति संबंधं धान्यग्रहणसंबद्धमनुवर्तिष्यत इत्यर्थः। ततो धान्यसामान्यसंबद्धं खञ्ग्रहणं व्रीह्यादिभिर्वाक्यविशेषैर्न संबध्यते। भवने क्षेत्रे ॥ एम०
इत्येतत्प्रत्ययेनाभिधायकेन संबध्यते॥ ॥ ४०

=खञ्ग्रहणं।२=

=तस्यार्थाकांक्षित्वादित्यर्थः।१=

अथ वेति। यत्रैवार्थित्वं तत्रैवाधिकारः संबध्यते नान्यत्रेत्यर्थः। यथोत्सर्गेणेति। उत्सर्गेणान्यत्र चरितार्थत्वादपवादविषये प्रवृत्तिः संदिग्धेत्यसंदिग्धेनापवादेना सौ बाध्यते एवं खन्नउत्तरार्थो यामनुवर्त्तनां तरीयकोपस्थानसंभवात् संदिग्धप्रवृत्तित्वात् संदिग्धप्रवृत्तिभ्यां ठण्ठञ्भ्यां बाधः धान्यानामिति नेन प्राप्तस्य खञो ठण्णबाधवयवादीनत्वे नन्तु तत्रानुवृत्तासन्निहितस्येति साधर्म्ये वैधर्म्ये संभवाद्यथोत् सर्गेण प्रसक्तस्येत्युक्तं। अथ वेति विभाषाग्रहणमेव ज्ञापयति। अनुव

=नन्वत्रापुत्सर्गापवादभावसत्ताहृष्टांतदर्शितिकभावोनुपपन्नेत आह· धान्यानामिति नेनेति· संदिग्धप्रवृत्तिकत्वात्साधर्म्यं· अनुवृत्तासन्निहितस्यानुवृत्तिसामर्थ्याद्बाधासंभवाद्वैधर्म्यंचबोध्यं·२=

अथवा मंडूकप्लुतयोधिकारः। यथा मंडूका उत्प्लुत्योत्प्लुत्य गच्छंतितद्वदधिकारः। अथवा अन्यवचनाच्चकाराकरणात् प्रकृतस्यापवादो विज्ञास्यते। यथोत्सर्गेण प्रसक्तस्यापवादः॥ अन्यस्य प्रत्ययस्य वचनात् चकारस्य चानुकर्षणा र्थस्याकरणात् प्रकृतस्य खञः ठण्ठञौ बाधको भविष्यतः यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति। अथवा एतत् ज्ञापयति अनुवर्त्तते चेना म विधयोन चानु[redacted]वर्त्ते नादेव भवंति। किं तर्हि यत्ना द्भवंति। अथ [redacted] वायत्तामुक्ते धान्यानां भवने क्षेत्रे खञित्येव सिद्धं नन्व चोक्तं न सिध्यति। किं कारणं। उमाभंग्योरधान्यत्वादिति। नैष दोषः। धिनोते र्धान्यं [redacted] एते चापि धिनुतः अथवा शाणसप्त

त्नमाना अप्यधिकारा यत्र यत्नो विभाषाग्रहणादिकस्तत्रैव भवंति नान्यत्रेति अन्यथा विभाषाग्रहणमनर्थकं स्यादनुवर्त्तनादेव खञः सिद्धत्वात् धिनोते रितियोगरूढिरियं उमाभंगयोरपीति भावः चमके पुत्व धान्यान्यपिकानि षि त्सकते धान्यान्यपिकानि चित्पत्र्यंते न हि तद्धान्यपरिगणनार्थमिति तत्राप्य उमाभंग

योरधान्यत्वं न भवति। शणसप्तदशानीति धान्यपरिगणनार्थोस्मृतिरियं ॥ ॥ ॥

भा॰ वै॰ ५
४१

यथामुखं । समसांतलोप इति संमुखं यत्रादर्शादौ प्रतिबिंबाश्रये दृश्यते स संमुखीन इति प्रयोगदर्शनात् निपातनमाश्रितं संशब्दस्य निपातस्यार्थसंगसभावा
दनाश्रयणं प्रत्ययस्य नियोगेनाकारलोपो निपात्यमानस्तदभावे न भवतीति संमुखीनादर्शो दिसाद्दृश्यात्यान्यो प्यभिमुखावस्थानः संमुखीन उच्यत इत्यादुः । अनु
पद । तत्र ज्ञापत इति अयानमय इति गमनमात्रमपशब्देनोच्यते तत्र प्रतिषेधस्तु न यशब्दे नेति विरुद्धार्थाभिधानाद्यानयं नेय इति समन्वयात् शंकया प्रश्नः
अयः प्रदक्षिणमिति एकद्यूतकारापेक्षया शारस्य प्रदक्षिणं गमनमयो द्वितीयापेक्षया प्रसव्यं वामापरपर्यायं गमनमनयो हि ... शारा उच्यते । परैरिति
द्वितीयद्यूतकारसंबंधिभिः शारैः पदानां छाना नांग हा परपर्यायाणामनाक्रमणमनवधानमिसर्थः ॥ ससहायस्य शारस्य परैर्न्नो क्रम्यते यस्मसहाय

यथामुखसंमुखस्य दर्शनः खः । संमुखेति किं नियास्यते । संमुखेति समसांतलोपः संमुखेति समसांतलोपो नियास्यते समसुखस्य दर्शनः संमुखी
नः । अनुपरसव्याद्यानयं बद्धामक्षयतिनेयेषु । अयानयन्नेय इत्युच्यते । तत्र न ज्ञापतेकः अयः कः अनय इति । अयः प्रदक्षिणं अनयः प्रसव्यं ।
प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्परैः पदानामसमावेशः सोयानयः । अयानयं नेयः अयानयीनः शारः । परोवरपरंपर ॥ परो
वरेति किं निपात्यते । परोवरेति परस्यो त्ववचनं । परोवरेति परस्मै त्वं निपात्यते । यद्येवं परस्मै त्ववचनमिति प्राप्नोति ॥ ॥

स्य शारान्तरेणावाध्यत इति द्यूतव्यवहारः अयसहितो नय इत्युत्तरपदलोपी समासः तत्पुरुषः अथवा यश्चासावनयोऽयानय इत्येकदेशद्वारेण समुदायस्य
लक्ष्नाकृत्वा दिवद्यपदेशात् समानाधिकरणसमाससमाहारद्वंद्वो वा अयानयमितिन्नयते द्विकमेकत्वाद्यानयमिति प्रधानेपि कर्मणि द्वितीयामधानेतु ल
स प्रसयस्तत्र केचित्फलककोष्ठस्थस्येव शारवर्ज्जमानेयस्यापीनमिसभिधानमिच्छंति यस्य शारएकपार्श्वे एव संचरति तत्र न भवति प्रसयोयोहि शारः
पार्श्वोत्तरेमानीयते स एवायानयं नीयते अन्यस्त्वयमेव नीयते । अनयमेव वा ॥ परोपरस्योत्ववचनमिति परशब्दस्यांतस्य ओकारो निपात्यत इत्यर्थः तत्र एउः प

एम॰
४१

शाकंधुन्धायेनेति शाकंध्वादिषु पररूपं वक्तव्यमिति पररूपेण निर्देशः परस्येति। अपवरशब्दस्यादेरकारस्येत्यर्थः॥ तत्र अपात्(?)गुणाः तत्र केचित्सामान्येन निपा[redacted]तनमिच्छन्ति ते
न खप्रत्ययाभावेऽपि प्रयोग उपपन्नो भवति परोवर्यैर्विदितिपारं पर्यमविच्छिन्नमिति च। अन्ये तु परंपराशब्दमव्युत्पन्नमाचक्षते तेन तस्मात्स्वार्थे ष्यञि पारंपर्य[redacted]मिति
भवति परोवर्यैर्विदितिस्तस्य साधुत्वमाहुः प्रत्ययप एतन्नियोगे नैव निपातनमयुक्तत्वं मन्यमानाः समां विजायते प्रसूयत इत्यर्थः। तत्र समायां समायामित्यस्मा

शाकंधुन्धायेन निर्देशः अपयवा नैवं विज्ञायते परस्योत्वं निपात्यते इति किं कथं तर्हि परस्य शब्दरूपस्य आदेरत्वं निपात्यत इति। परांश्च अवरांश्च अनुभव
ति। परोवरीणाः। अपपरंपरेति किं निपात्यते। परपरतराणां परंपरभावः परपरतराणां परंपरभावो निपात्यते। परांश्च परतरांश्च। अनुभवति। पारंपरी
णाः। समां समां विजायते। इह समां समीनां गौः स्कपो धातुप्रातिपदिकयोरिति स्कलुक्प्राप्नोति। समां समां विजायत इति यल्लोपवचनादलुग्विज्ञानं।
समां समां विजायत इति यल्लोपवचनादलुग्विज्ञानं भविष्यति। यद्ययं यल्लोपं शास्ति तज्ज्ञापयत्याचार्यः। नात्र लुग्भवतीति॥ समां समां विजायत इति
यल्लोपवचनादलुग्विज्ञानमिति चेदुत्तर[redacted]स्यलुग्वचनं समांसमां विजर्ययत इति यल्लोपवचनादलुग्विज्ञानमिति चेत उत्तरपदस्यालुक्वक्तव्यः॥ सि
११ द्धं तु पूर्वपदस्य यल्लोपवचनात्। सिद्धमेतत्कथं पूर्वपदस्य यल्लोपो वक्तव्यः॥ ॥ ॥

त्पदसमुदायात्प्रत्ययोवचनात् भवतितद्धितान्तत्वात्प्रातिपदिकत्वे सतितदवयवस्योत्तरपदवत्पूर्वपदेऽपि स्कपोलुक्प्राप्नोति यल्लोपवचनान्न भवति पाटः स्कञ्च्रकत्वात्स्क
लुकैवयल्लोपेऽपि सिद्धे सूत्रे यल्लोपवचनं नियमार्थं यकारस्यैव लोपो भवति न तु सर्वस्य प्रत्ययस्येत्यर्थः उत्तरस्यालुग्वचनमिति। यल्लोपनिपातनात्पूर्वपदवदुत्तरपदे
ऽपि लुक्। न प्राप्नोतीति भावः। सिद्धं त्विति तेन पूर्वपदस्य यल्लोपनिपातनादागमः एवं तं भवति उत्तरपदे तु सुब्लुक्प्रसङ्ग एवेत्यर्थः॥ ॥ ॥

भा० कै० ५ अनुसन्नाविति वाकोपरवौत्तरपदयो र्वा यल्लोपो वक्तव्यः तेन द्वैरूप्यं भवति। आगवीनः। किं निपात्यत इति का प्रकृतिः कः प्रत्ययः कः प्रत्ययार्थ इति प्रश्नः। गो आङ् पूर्वो दितिः।
४२ योगवाम तः आगोः प्रत्यर्पणात् कर्मकरोति स आगवीन उच्यते तत्र वृत्तिविषये गोशब्दो गोप्रत्यर्पणे वर्तते तत्र आङ् गो शब्दयोराङ् मर्यादाभिविध्योरि ति
अव्ययीभावे ह्रस्वत्वे च कृते खो निपात्यते। शालीनकौपीने। किं यः शालायामिति। असंकल्पनायां शालाकूपशब्दयो र्मुख्यार्थत्वमाश्रितं भवतीति भावः॥ शा
लायामधृष्ट इति अन्यत्र धृष्टः कूप इति। लंघनादिकमित्यर्थः॥ उत्तरपदलोप इति लोकप्रसिद्धार्थानुवादेन साधुत्वान्वाख्यानार्थः धृष्टाकार्ययोर्मात्रे च शाली

अनुसन्नावुत्तरपदस्य च वा वचनं। अनुसन्नौ पूर्वपदस्य उत्तरपदस्य च यल्लोपो वा वक्तव्यः॥ समें समां विजायते समायां समायां विजायत इति।
आगवीनः आगवीन इति किं निपात्यते। गो आ पूर्वो दातस्य गोः प्रतिहानात्कारिणि खः। गो आ पूर्वो दानस्य गोः प्रतिदानात्कारिणि खो निपात्यते। आत
स्य गोः प्रतिदानात्कर्मकारी आगवीनः कर्मकरः शालीनकौपीने अधृष्टाकार्ययोः किं यः शालायां अधृष्टः स शालीनः कूपे वा यदकार्यं तत्कौ
पीनं। नेत्याह। उत्तरपदलोपोत्र द्रष्टव्यः। शालाप्रवेशनमर्हे स धृष्टः स शालीनः कूपावतरणमर्हतीति। अकार्यं तत्कौपीनं॥ ॥

नकौपीनशब्दयोः प्रयोगादिति भावः तत्र वृत्तिविषये शालाकूपशब्दौ तत्कर्मिकायां क्रियायां वर्तेते इति गम्यमानार्थत्वादप्रयोग एवोत्तरपदस्य लोपः शा
लाप्रवेशनमिति अन्यत्र प्रागल्भ्याभावादासितुमशक्यत्वाच्छालामेव प्रवेष्टुमर्हतीत्यर्थः॥ कूपावतरणमिति यदकार्यं तत्प्रच्छादनीयत्वात् कूपावतरणम राम०
र्हतीत्यर्थः। अकार्ययोग्यत्वाच्च पुरुषलिंगमपि कौपीनमुच्यते तत्साहचर्यात्तदाच्छादनमपि कौपीनं अपवा अपकार्यशब्दे करोतिं क्रियासामान्यवचनः ॥ ॥ ४२
॥ तेनाद्रष्टव्यत्वाल्लज्जाहेतुदर्शनत्वात्पुरुषलिंगं कौपीनमस्पृश्यत्वाच्च तच्छादनम्॥

व्राते नाकिं व्रातं नामेति व्रातशब्दस्तावत्संघवचनस्तत्रयः संघेन जीवति तत्र व्रातीन शब्दो न प्रयुज्यते व्रातकर्मणा जीवति तु प्रयुज्यते व्रातकर्मणि च व्रातीय शब्देन भाव्यमिति
प्रश्नः। नानाजातीया इति। एकजातीय क्षत्रियादि संघनिराकरणं। अनियतवृत्तय इति नियतवृत्तसाधुषु जीवि संघनिषेधः। उत्सेधजीन इति उत्सेधः शरीरं तदायासेन
भारवहनादिना जीवंति न तु बुद्धिविभवेनेत्यर्थः व्राताना कर्मेत्येवं निपातनाच्छेबाधिताण भवति। तेषामेवान्यतमो व्रातीन उच्यते एतस्य स्वस्य कर्मणा जीवतीत्य

॥ हैयंगवीनं संज्ञायां॥२

व्रातेन जीवति। व्रातेन जीवती त्युच्यते। किं व्रातं नाम। नानाजातीयाः अनियतवृत्तयः उत्सेधजीविनः संघाः व्राताः तेषां कर्म व्रातं। व्रातकर्मणा जी
वतीति व्रातीनः। हैयंगवीनमिति किं निपात्यते। ह्योगोदोहस्य हियंगु आदेशः संज्ञायां विकारे ह्योगोदोहस्य हियंगु आदेशो निपात्यते संज्ञायां विषये। त
स्य विकार इत्येतस्मिन्नर्थे। ह्योगोदोहस्य विकारः हैयंगवीनं घृतं। संज्ञायामिति किमर्थं ह्योगोदोहस्य विकारः उदश्वित्तक्रमभूदिति। पक्षात्तिः मू
ल इति वक्तव्यं। पक्षस्य मूलं पक्षतिः। तत्त्वं हि वक्तव्यं। न वक्तव्यं। मूल इति वर्त्तते। कथं कृतं तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाह चावित्यत्र
परितः नुवर्त्तते। पाकेपि प्राप्नोति। मूल इत्यनुवर्त्तते पाक इति निवृत्तं। कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोनुवर्त्तते॥
=यथाऽऽतइति त्यादितद्युक्तानुवृत्तिमाचमुतरत्रऽऽ५=

नोच्यते॥ हैयंगवी। किं निपात्यत इति। प्रकृतिसंदेहात्प्रश्नः। ह्योगोदोहस्येति। ह्यस् शब्दस्य गोदोह[redacted] शब्देन सुप्सुपेति समासः उद्घृत इति दोहः क्षीरमुच्यते यथा दे
न काल प्रत्यासत्तिः प्रतिपाद्यते तेनाविकृतरूपं गंधमेव घृतं हैयंगवीनमुच्यते इत्याहुः। पक्षान्मूल इति वक्तव्यमिति। अन्यथा अनिर्दिष्टार्थत्वात्स्वार्थे प्रत्यय[redacted]
प्रसंगः कथं पुनरिति। एकस्मिन्नर्थे योगः संबंधः तेन निर्दिष्टयोः समुदायाभिधायि द्वंद्वनिर्दिष्टयोरित्यर्थः। द्वंद्वस्यतदर्थस्य चैकत्वादेकदेशानुवृत्तिर्न संभवतीति
=एकार्थीभावरूपे ९=
ऽऽभावः एकसूत्रे निर्दिष्टानां त्वेकदेशानुवृत्तिर्दृश्यते॥

=द्वंद्वेपि एतेन शब्दार्थो नयानुवृत्तेस्संभवत्यऽऽ॥२

=अर्थाधिकारमाश्रित्य पूर्वः पक्षः शब्दाधिकारमाश्रित्योत्तर इति सारः अर्थाधीति ।१= तत्सद्भावोति तथा च द्वंद्वशब्दस्यैकत्वादेकदेशानुवृत्त्यसंभवे येषु केषुचित्स्वरितत्वसामर्थ्यात्तत्सद्भावे शब्दान्तरयोगांतरे प्रतीयत इत्युक्तं भवति ।२=

भा०कै०५ एकयोगनिर्दिष्टानामपीति । अर्थाधिकारपक्षे अर्थस्यैकत्वात् विच्छेदाभावान्न स्यादेकदेशानुवृत्तिः शब्दाधिकारपक्षे तु यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञा

४३ तं तत्सदृशशब्दांतरसन्निधानं योगांतरे प्रतीयत इति दोषाभावः । विनञ्भ्यां । सहार्थो गम्यत इति । न सहेति प्रसज्यार्थे निर्देशमभ्युपेत्य प्रकृतस्य नञ्प्र

सज्यार्थो विशेषणीयः । ततः प्रतिषेधस्य प्रतिषेधाद्विधिर्नाभाव इति भावः । नायमिति लोकप्रसिद्धार्थो नांशब्दानामिह साधुत्वान्वाख्याना

न्लोके च नानाशब्दस्य पृथग्भावाभिधायित्वान्न सहेति प्रकृतस्यार्थनिर्देशः यद्येवं सहेत्येवं प्रसज्यार्थो निर्देशः विनञ्भ्यां प्रतिषेधार्थत्वाद्विगा

एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिर्भवति । न यथासंख्यमयादेशीपादामहायनांताच्च संख्यादेरित्यनुवर्तते । अव्ययादेरी

ति निवृत्तं ॥ विनञ्भ्यां नानाञौ न सह । इह नानेति सहार्थो गम्यते द्वौहि प्रतिषेधौ प्रकृतमर्थं गमयतः । न न सह सहैवेति । नै

षदोषः नायं प्रसज्यार्थः । किं तर्हि प्रकृतिविशेषणमेतत् । विनञ् इत्येताभ्यां असहवाचिभ्यां नानाञौ भवतः । कस्मिन्नर्थे

स्वार्थ इति । वेः शालच्छंकटचौ । कस्मिन्नर्थे शालजादयो भवंति । न सह इत्यनुवर्तते । भवेत्तिदं विशाले शृंगे । संकटमिति इ

हखलु संगतो योगम्यते । प्रकटमिति प्रगतार्थो गम्यते । उत्कटमिति उद्गतार्थो गम्यते । एवं तर्हि साधने शालजादयो भवंति ॥

दृष्टमरथिक इत्यादौ विशब्दस्य गुणप्रतिषेधवृत्तित्वदर्शनान्नैतदस्तीति क्रियावाचिनोपि विशब्दात्सहार्थे प्रत्ययो विज्ञायेत विगतौ सह विकृतौ सहेति =

इहतु विनादेवदत्तेन नादेवदत्तेनेत्यसाम्प्रत्यभूतस्याप्यर्थस्य व्यतिरेकहेतुत्वं भवति यथा मातृस्मरतीति ॥ वेश्शाल । कस्मिन्नर्थे शालजादय इति = एम०

वक्ष्यमाणप्रसज्यापेक्षं बहुवचनं असहार्थस्य सर्वत्रासंभवादर्थानुपादानाच्च प्रश्नः विशाले इति नानादेशगमनादस्त्रासहार्थत्वमिति ४३

=तथा च सहार्थस्य गुणस्य प्रतिषेधसंबंधनार्थसंगतिः ।३=

=नन्वेवं विना नाना शब्दयोरसत्त्वात्तार्थाभिधायित्वेन चादिवद्व्यतिरेकहेतुत्वं विति देवदत्तेन विनेत्यादयःप्रयोगा न स्युः ।१= पर्यीति सरतीति स्मरणमस्ति तत्रत्वं ।२=

नस्या

किंवत्कमिति। शब्दान्तरवाच्यक्रियाविशेषस्य द्योतका उपसर्गाः वाचकाभावे द्योत्याभावात् न एकाकिन एवेति भावः। ससाधनामिति क्रियोपसर्जनं साधनमाहु-
रित्यर्थः। निपतन्ति विषयाः शब्दानां शक्त्योर्दृश्यन्ते यथा द्विरशब्दस्य द्वौ रलौ यस्याभिधानमिति भावः। उपसर्गेभ्य इति। अस्मत्रोपसर्गसंज्ञादर्शनाद्विषयान्तरेऽपि योगप्र-
नामात्रा ग्रथं पसादीनामिदमभिधानं विशाल इति शृङ्गयोरेव विगमनक्रियाकर्तृत्वं न तु गोरिति भावः। विशाले त्वस्येति। मतुप्प्रत्ययस्य गवयनभिधानान्न म-

किंवत्कर्मेतत्। न हि। कर्मानुमीयमानं गम्यते। उपसर्गेभ्य इमे विधीयन्ते। उपसर्गास्तु पुनरेवमात्मकाः यत्र कश्चित्क्रियावाची शब्दः प्रयु-
ज्यते। तत्र क्रियाविशेषमाहुः॥ यत्र हि न प्रयुज्यते ससाधनां तत्र क्रियामाहुः। त एते उपसर्गेभ्यो विधीयमानाः ससाधनायां क्रियायां भ-
विष्यन्ति। एवमपि भवेत्सिद्धं विशाले शृङ्गे इति। इदं तु न सिध्यति। विशालो विशङ्कटः। एतदपि सिद्धम्। कथं। अकारो मत्वर्थीयः विशाले अस्य स-
न्तः। विशालः विशङ्कटे अस्य स्तः विशङ्कटः॥ संप्रोदश्च॥ कटच्प्रकरणे अलाबूतिलोमाभ्यो रजस्युपसंख्यानं कर्तव्यम्। अलाबूतिलोमाभ्यः
रजस्यभिधेये उपसंख्यानं कर्तव्यम्। अलाबूकटः तिलकटः उमाकटः। भङ्गायाश्च। भङ्गायाश्चेति वक्तव्यम्। भङ्गाकटः॥ ॥

वतीति विशालवान्। न तु केऽपि विशालगवयुक्तस्य गोर्लक्षणादेरवगमो न तु गोरित्यर्थः। अनुसन्धानादौ आचेदमुच्यते। उक्ता शब्दास्ते विशादयः साधुत्वान्वाख्यानाय तु किंचि-
दुपायमाश्रित्य व्युत्पत्तिः क्रियते यथा प्रतिलोमोऽनुलोम इति॥ संप्रोदश्च॥ अलाबूतिलोमाभङ्गाभ्य उपसंख्यानं पृथिव्यादिवयवे। अलाबूशब्दाद्धोरजसि प्राप्ते तिलोमाभ्यां घृता-
दित्वादं नो द्वाननत्वादनुदात्तादेश्च रजसि प्राप्ते भङ्गायास्तथा धान्यानां च [illegible] मि साधुदानत्वाद [illegible] प्राप्ते रजसि कटज्विधिः॥ ॥ ॥

भा०कै०५ गोष्ठादयइतिप्रयोग[redacted]समवायिप्रत्ययरूपंनिर्दिष्टंचकारस्तुस्वरार्थोऽनुबंधश्चास्मंकर्तव्यः तथाहि। समासाश्रयेणप्रत्ययाःप्रत्याख्यायंतेतत्रचि
४४ त्स्वरसमासस्वरयोरभेदादेकफलत्वमारंभप्रत्याख्यानयोरुपपद्यतेसर्वत्रादिशब्दः प्रकारे। गवांस्थानमितितत्स्थेदमित्यत्रार्थेसर्वत्रगोरजादिप्रत्य
यप्रसंगेयदितियतिप्राप्तेगोष्ठप्रत्ययः अविकटइति॥ अवीनांसमूहइत्यणिप्राप्तेकटच्। अवीनांविस्तारइत्यत्रार्थेपटच्। अप्रसृतेसमूहेअवि
कटः प्रसृतेत्वविपटः उष्ट्रगोयुगमितिद्वावुष्ट्रावित्यत्रार्थेगोयुगच्प्रत्ययः अन्येत्वाहुः उष्ट्रस्यग्रीवाबंधनेयानंगोयुगंप्रत्ययः इंगुदतै

गोष्ठादयः स्थानादिषुपशुनामादिभ्यः। गोष्ठादयःप्रत्ययाः स्थानादिष्वर्थेषुपशुनामादिभ्योवक्तव्याः गोगोष्ठंसंघेकटच्चवक्त
व्यः। अविकटः। उष्ट्रकटः। पटच्चवक्तव्यः। अविपटः। उष्ट्रपटः। गोयुगशब्दश्चप्रत्ययोवक्तव्यः॥ उष्ट्रगोयुगं तैलशब्दश्चप्रत्ययो
वक्तव्यः। इंगुदतैलंसर्षपतैलं शाकटशाकटश्चप्रत्ययोवक्तव्यः। इक्षुशाकटं। मूलशाकटं। शाकिनश्चप्रत्ययोवक्तव्यः। इक्षुशाकि
नं। मूलशाकिनं। उपमानाद्वासिद्धं। उपमानाद्वासिद्धमेतत्। गवांस्थानंगोष्ठं। यथागवांतद्वदुष्ट्राणांकटच्चवक्तव्यः इति॥ ॥

=गोष्ठजाद्ययइत्यादिग्रहणाद्दपरिगणितेष्वपियद्वदुष्ट्रनिकारायुक्तः अल्पसंघेबोध्यः। प्रयोगश्चभाष्यते।सो ×साधीनां ×वर्णकृत्स्थितयकः। वासिमसकः।=

त्वमिति। तद्यावंतरसाधुशब्दत्वात्तस्यविकारइत्यणिप्राप्ते। सर्षपशब्दस्यैकोशोनामितिसाधुशब्दत्वेप्राप्तेपरत्वादयथाद्वितीयंप्राग्दीव्यादित्यनुवर्तमाने
पांतानाश्चगर्वादीनामितिमद्वर्होदात्तत्वंभवतिततोनुदात्तादित्वादञ्प्राप्तः इक्षुशाकमिति। इक्षूणांभवनंक्षेत्रमित्यत्रार्थेशाकट शाकिनचौगवां
स्थानमितिगावस्तिष्ठंत्यस्मिन्नितिघञर्थेकविधानमितिकः तत्रगोष्ठसाधर्म्यादुष्ट्रादिस्थानमपिगोष्ठशब्देनोच्यते। तत्रविशेषप्रतिपत्त्यर्थमुष्ट्रा राम०
दीनामन्यतमेनविशेष्यते। मुख्यगोष्ठप्रतिपत्तयेचगोभिरपिगोष्ठस्यविशेषणात् गोगोष्ठमित्यपिभवति॥ ॥ ॥ ४४

वि०

नानाद्रव्याणामिति रज्जुवीरणादीनामित्यर्थः । तत्साधर्म्याद्द्रव्योऽपि संघातः कटशब्दाभिधेयो ऽविभिर्विशेषितो ऽविकट इत्युच्यते । यथा पट इति विस्तारसामान्याद्द्रव्यो
ऽपि संघातः पटशब्दाभिधेयो ऽविभिर्विशेष्यते ऽविपट इति । गोयुगमिति युगशब्देन द्वयमुच्यते ग्रीवाबन्धनं काष्ठं च तत्र यानाङ्गे युगः पुंस्युक्त इति पुंस्त्वमपि क्वचिद्
द्वयं । षट्कं सन्तरमिति । अनुसन्तं विशिष्टस्नेहद्रव्यवाचीत्यर्थः । तिलतैलमपीति । अपि शब्दात् तैलमपीत्यर्थः । यदि तु तैलच् प्रत्ययो विधीयते तदा विशेषविहिते न
तैलचा चिन्नस्तिलशब्दाद् अन्न बाध्येत ततश्च तैलमिति न सिध्येत् । यदा त्वनुसन्न एव तैलशब्दो विकारविशेषवाची तदा तिलानां तैलमिति समासे कृते तिलतै

यथा नानाद्रव्याणां संघातः कटः एवमवयः संहता अविकटः पटच्च वक्तव्यः इति । यथा पटः विस्तीर्णः एवमवयः विस्तीर्णा अविपटः । गोयुगशब्दश्च
प्रत्ययो वक्तव्य इति । गोर्युगं गोयुगं यथा गोस्तद् उष्ट्रस्य उष्ट्रगोयुगं तैलशब्दश्च प्रत्ययो वक्तव्यः इति षट्कं सन्तरं तैलशब्दो विकारे वर्त्तते । एवं च कृत्वा
तिलतैलमित्यपि सिद्धं भवति । शाकटशब्दस्य प्रत्ययो वक्तव्य एव यथा शाकिनशब्दस्य प्रत्ययो वक्तव्यः एव । इनच्पिटच्चिक चि च । इनच्पिटच्काः चिक चिका देशा
श्च । इनच्पिटच्काः प्रत्यया वक्तव्याः चिक चिक इत्येते च प्रकृत्यादेशा वक्तव्याः । चिक्किनः चिपिटः चिक्कः । क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी । क्लि
न्नस्य चिल् पिल् इत्येतौ प्रकृत्यादेशौ वक्तव्यौ ॥ लश्च प्रत्ययः अस्य च चक्षुषी इत्येतस्मिन्नर्थे क्लिन्ने अस्य च चक्षुषी चिल्लः पिल्लः चुल्लः । यद्यस्ये चक्षु
ष्यते । चिल्ले चक्षुषी इति न सिध्यति ॥ चुल् च वक्तव्यः ॥ ॥

तैलमिति भवति । तिलानां विकार इत्यत्र तिलतैलमिति उपमानाश्रयेणापि इङ्गुदतैलमित्यादि सिध्यति तिलविकारो मुख्यं तैलं तत्सादृश्यादन्यदपि तैलमिङ्गुदादिभिर्विशे
ष्यते गौणत्वं भवे च मुख्यतैलप्रतिपादनाय तिले विशेषणात् तिलतैलमित्यपि भवतीति केचिदाहुः । अनुसन्नु पाय एव तिलानां विकारस्तैलमिति । तैलशब्दस्त्वयं स्नेहद्रव्यवृत्तिः त
था च सादृश्यानुकरणमन्तरेणापि गुडतैलादयः शब्दाः प्रयुज्यन्ते । यथा प्रकृष्टा वीणायां प्रवीणा इति अनुसन्तिमात्रे क्रियते कौशलं लक्ष्य प्रवृत्तिनिमित्तं तेन वीणायां प्रवीण ॥
इत्यपि भवति ॥ इनच् चास्त्वे निश्शब्दस्य दावा देशौ प्रत्ययौ च विहितौ तावि सादेशत्रयमस्य पत्र विधानाय वार्त्तिकं ॥

[illegible] दुःसंबंधादिति भूतरागिरूपितप्रमाणत्वप्रतीति [redacted] प्रतिबंधादिति बोध्यं वस्तुतः शंके यं निर्दिष्टा अस्येत्यनुवृत्ति वैयर्थ्यपरेति विवरणात्

भा॰कै॰५ तस्मान्नार्थ इति। किन्नरशब्दाच्च पुरुषविशेषाभिधायिनः स्वार्थे लोविधेयः। अकारो मत्वर्थीय इति। अश्वोऽत्यादिषु स्वांगाद्वीनादिति पाठान्न तु स्तनमभिधानान्नमवति॥ प्रमाणे
४५ किमयमिति सप्रमी निर्दिष्टस्येह शास्त्रे प्रकृत्सर्वप्रत्ययार्थातदर्शनादुभयसंभवाच्च प्रश्नः। अस्येत्यनुवर्त्तनादिति नन्वेवमपि प्रमेयवाचिनः प्रमाणे प्रत्ययप्रसंगः उरुकं प्रमेयमस्योरोरिति नैष दोषः अनियतप्रमेयविषयत्वात् प्रमाणानामेकेन प्रमेयेण विशेषणतोऽसंबंधत्वात्। प्रमेयस्य तु नियतप्रमाणप्रतिपादनायोत्प्रमाचाद्द्वयः शब्दा लोके प्रयुज्यमानाः साधुत्वेनान्वाख्यायंते। प्रथमश्चेति। यथायामवाच्येव प्रमाणशब्दः सूत्रउपात्तः तदोद्धमानेप्यामोहुयसजग्रचौ प्रमाणाद्यत्कृष्यविधीयेते

तस्मान्नार्थे अस्य ग्रहणेन। कथं चिल्लः पिछ्च इति। अकारो मत्वर्थीयः। चिल्ले अस्य स्तः चिल्लः पिल्ले अस्य स्तः पिच्च इति। प्रमाणे द्वयस प्रमाण इति किमयं प्रत्ययार्थः प्रमाणे प्रत्ययार्थे प्रमाण इति नायं प्रत्ययार्थः। कृतर्हि प्रत्ययाभवं ति॥ तद्धिति। कुत एतदस्येत्यनुवर्त्तनात्। न्नु प्रकृतं। तदस्य संजातं तारकादिभ्य इति। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम। ऊरुद्वयसं ऊरुदघ्नं। प्रमाणे लो वक्तव्यः। शमो दिष्टिर्वितस्तिः द्विगोर्नित्यं लो वक्तव्यः। द्विशमं त्रिशमं द्विदिष्टिः त्रिदिष्टिः द्विवितस्तिः त्रिवितस्तिः किमर्थमिदमुच्य ते। संशये श्राविणां वक्ष्यति तत्स्यापं पुरस्तादपकर्षः

अयं तु परिच्छेदमात्रं प्रमाणमिह गृह्यते तदोद्धमानए एव यथासंख्यमिति नियमाय वचनं। प्रमाणे ल इति। प्रमाणशब्दा लोके ये प्रसिद्धा दिष्टिहस्तादयस्तेभ्यः परस्य प्रत्ययस्य लुक् भवति स च संभवान्मात्रच एव द्वयसज्दघ्नचोर्ह्युर्द्धमानए वहि विधानं मात्रच स्वविशेषेण परिच्छेदकमात्रवाचिनः स्मरणात् द्विगोर्नित्यमिति तदंतविधुमावा त्वनुग्रप्राप्तिः। किमर्थमिति नित्यग्रहणं प्रति प्रश्नः नहि विकल्पः प्रकृत इति भावः श्राविणामिति श्रवणं श्रावः संशयस्यास्ति स श्रावी मात्रच्प्रत्ययस्तस्य परत्वाच्छ्रवणे प्राप्ते नित्यग्रहणात् बाधकबाधनार्थो लुगेव भवति द्वौ शमौ प्रमाणमस्य स्यात् न वा द्विशममिति प्रकृत्यर्थादिव शाच्च निश्चयसंशयविषयप्रयोगावधारणं॥ ॥

ग्रम॰
४५

मवा०   माण०

इदं स्तोम इति छन्दोयामस्य प्रमाणस्यासंपरिच्छेदोपाधि [redacted] काया संख्यायास्तोमे डट् प्रत्ययः पंचदशामंत्राः परिमाणमस्य स्तोमस्य पंचदशः विंशिन इति विंशति शब्दात् संख्यामात्रवाचिनः संख्येये प्रमेये डिनिः तिविंशतेर्डिनीति तिलोपः तस्य प्रत्ययस्येति चेत्सकारलोपे कृते यस्येति लुक् इत्याभादिसति लुक् त्वं न भवति भाष्यकारस्य चनाज्ञस्य सिद्धत्वात् नद स्य परिमाणसंख्यायाः संज्ञे सत्र स्तोमे डविधिः पंचदशाद्यर्थमित्युक्तेपि त्रिंशोडीवर्थमिह डट् विधीयते स्तोमसाहचर्याच्च त्रियां प्रयोगः सप्तदशी रात्रिरिति तत्र तु ड विधानं टावर्थं यदि प्रयोगो दृश्यते। तद्दर्शने तु प्रपंचार्थो डिनेः सामान्यविधानात् त्रिंशत् शतोर्डिनिः छंदसि वक्तव्य इति वचनं प्रपंचार्थमेव प्रमाण [redacted] परिमाण

=तदस्यपरिमाणंसंज्ञेत्यत्र ॰४=

इट् स्तोमे वक्तव्यः। पंचदशः स्तोमः। शतूशतोर्डिनिः शत्नू शतोर्डिनिर्वक्तव्यः। त्रिंशिनोमासाः पंचदशिनोर्द्धमासाः। विंशते श्च विंशतेश्चेति वक्तव्यं। विंशनोंगिरसः प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः शममात्रं दिष्टि मात्रं। कुडवमात्रं पंचमात्राः दशमात्राः वतुंता स्वार्थे द्व यसन्मात्रचौवक्तुलं। वतंता स्वार्थे द्वयसन्मात्रचौवक्तुलं [redacted] वक्तव्यौ। तावदेव तावद्द्वयसं। तावन्मात्रं यावदेव यावद्द्वयसं। यावन्मात्रं। यत्तदेतेभ्यः

संबंधिमोत्र

॥ प॥ किमर्थं परिमाण इत्युच्यते न प्रमाण इति वर्त्तते॥ ॥ ॥

=तेनोन्मानान्न॰१=प्रत्ययार्थस्य प्रमाणस्याप्रतीतेः।२=

भ्यामिति रूढिशब्दौमेदेनोपात्तौ। शममात्रमिति शमः प्रमाणमस्य स्यान्नवादिष्टिः प्रमाणमस्यसांतृ वा कुडवं प्रमाणमस्य स्यान्नवेसत्रार्थे मात्रच्। पंचमात्रा इति। पंचस्कन्ने वेति संशयमानार्थवाचिनः स्वार्थे प्रत्ययः अपवाद निविषये केयोरित्यादिवत्संख्यामात्रवाचिनः पूरणार्थे प्रत्ययः पंचत्वसंख्याप्रमाणमेषांस्या तावदेवेति तत्परिमाणं यस्य धान्यादेः तत्तावद्धान्यादिकं ततः स्वार्थे प्रत्ययः उत्तरसूत्रे तु भावः सिद्धस्त्वडावतोरित्यर्था तदेतावन्मात्रादिप्रतिपादनं यत्तदेः किमर्थमिति प्रमाणपरिमाणशब्दयोरेकार्थत्वं मत्वा प्रश्नः न प्रमाण इति वर्त्तते इति का कानञः प्रयोगात् कृत्तेन एवेत्यर्थः अपवानेकार्थत्वान्निपातानां ननु शब्दस्यार्थे न शब्दो वर्त्तते। अर्थं किं परिमाणाः

भा॰कै॰५ आचार्यदेशीय आह। एवं तर्हीति। आचार्य आह। इवता विनिर्दिष्टो वाचार्यप्रक्रियापेक्षो निर्देशः इहतु वतुयं विधाया सर्वेनाम्न इत्यालं विहितं पूर्वाचार्यो डावतुं विद
४६ धिरे। अर्थवैशेष्यादिति विशिष्यत इति विशेषस्य भावो वैशेष्यं अर्थस्य वैशेष्यम र्थवैशेष्यं अर्थभेदस्तस्मात् परिमाणशब्दस्य पृथग्निर्देशः क्रियते। [redacted] उक्तो
त्रेति। अयामस्य प्रमाणं स्यात्परिमाणं तु सर्वत इति मात्राद्यप्रतिघातायेति यद्दिप्रमाणइत्यनुहसा प्रमाणोपाधिकेभ्यो यदादिभ्यो व[redacted]तु विधीयते तदा सो वि

एवं तर्हि सिद्धे सति परिमाणग्रहणं करोति। ननु तत्रापि यसाचार्यैः अन्यत्प्रमाणमन्यत्परिमाणमिति चेत् इवता वर्थवैशेष्यात् निर्देशः पृथगु
च्यते। नैनतज्ज्ञापकसाध्यं। अन्यत्प्रमाणमन्यत्परिमाणमिति। उक्तोत्र विशेषः। मात्राद्यप्रतिघाताय। एवं च कृत्वा मात्रादीनां प्रति
घातो न भवति। भावः सिद्धस्तु इवतोः। इवत्त्वं तावन्मात्र जादीनां भावः सिद्धो भवति। वतुप्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्या
नं। वतु प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानं कर्त्तव्यं। न त्वावां अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। त्वावतः पुरूव
=दित्त्मोपाधीति प्रमाणोपमाद्विति स्यात् प्रमाणमिहस्यायामपरस्तासविशेषरवामात्रपरत्वेप =९ सो यज्ञं विप्रस्य मावतः। त्वत्सदृशस्य मत्सदृशस्येति॥ ॥ ॥
=दिमाणमात्रचाबाधेपिप्रमाणे भिन्नोपाधित्वान्नबाधइतिभावः।९=

शेषु विहितत्वात् सामान्यविहितान्मात्रादीन् बाधेत परिमाणग्रहणात् तस्मिन्भिन्नोपाधिविषयत्वात् बाध्यबाधकभावाभावः तेन तन्मात्रं यन्मात्रमित्यादिप्रमाणोपा
धौ प्रकृत्यर्थे सिद्धं भवतीति भावः सिद्धस्त्वेतितत्परिमाणमस्य धान्यस्येत तावद् इत्यत्र राशीकृतं तावत्प्रमाणमस्य कुड्यादेस्तावन्मात्रं यादृग्राशीकृतस्य धान्यस्य दैर्घ्यं
तादृगस्यापीत्यर्थः एकविषयत्वेतु वतुपैवो क्तत्वाद्विशिष्टस्य प्रमेयस्य तदंतान्मात्राद्यो न स्युः यस्य हि तावत्प्रमाणं तस्य तत्प्रमाणमिति ताकुड्य दृश्येवत तत्रापि प्रयो रास॰
९गः स्यात् सादृश्य इति विषयनिर्देशो यं सदृशस्य प्रत्ययार्थः॥ ॥ ४६

=आदेः परस्येति सिद्धेवह्निति वचनमादेशप्रतिपत्त्यर्थं नतु तथाहि घः प्रसक्तांतरं विज्ञापेत ५= ननु किमादिति न संख्याप्रश्नः किंतु परिमाणमात्रप्रश्नः तत्प्रश्ने तु तत्रापि बहुवचनमेव क्रियतां इतीत आह कां संख्येति =

किमिदंभ्यः एतदेवेति। आदेशविधानान्यथानुपपत्त्या प्रत्ययोनुमीयते। किमः। बहुषु इति वक्तव्यमिति। का संख्या परिमाणमस्य वर्गस्येति यदावयवगतसंख्याविशेषविषयः प्रश्नस्तदा प्रत्ययः प्राप्नोति कति वर्गे इति तदा पंचक इत्याद्युत्तरेणाभाव्यं तस्मादत्र प्रत्ययनिवृत्तये बहुषु इति वक्तव्यमिति भावः। किमिसेत ट्रिति इहास्येत्यधिकाराद्द्वितीया संख्या पृच्छ्यते तत्रैव प्रत्यये नोत्पन्नव्यं तत्र यदा वर्गावयवगतसंख्याविशेषे प्रश्नस्तदावयवेष्वेव प्रत्ययेन भाव्यं न तु व्यवहितसंख्यासंबंधे वर्गे ततः कतिगावोस्मिन्वर्गे इति भवति कतिगावोयं वर्ग इति वा संघ संघिनोरभेदविवक्षायां क्रियानिमित्तपरिमाणे पाथौ प्रत्ययार्थे प्रयुज्यते संख्याप्रश्ने तु क्रियेत न इति बहुवचनात्तस्यैव

=ननु संख्यायाः परिमाणे परिच्छेदे वर्तमानात्किमः प्रत्ययो विधीयते का संख्या परिमाणमस्य ... =कतीसुपि=

किमिदंभ्यां वोघः। केन विहितस्य किमिदंभ्यां वतुपो वो घत्वमुच्यते। एतदेव ज्ञापयति किमिदंभ्यां वतु विधिति। परयं किमिदंभ्यामुत्तरस्य वतुपो घत्वं शास्ति। अथ वायोगविभागः करिष्यते। किमिदंभ्यां वतुप भवति। ततो वो घ इति। किमः संख्यापरिमाणे इति च। बहुषु इति वक्तव्यमिह मा भूत्। क्रियान्न क्रियंतौ। तत्राह वक्तव्यं। किमिसेत त्वरिप्रश्ने [redacted] वर्त्तते परिप्रश्नश्चानिर्ज्ञाते अनिर्ज्ञातं च बहुषु द्वेकयोः पुनर्निर्ज्ञातं निर्ज्ञातत्वात् द्वेकयोः परिप्रश्नोन। परिप्रश्नाभावात् किमेवतावन्नास्ति कुतः प्रत्ययः। संख्याया अवयवे तयप्। इह कस्मान्न भवति। बहवः अवयवाः अस्याः संख्याया इति। अवयवे या संख्ये सुच्यते। नचकाचित्संख्यास्ति यस्या बहुशः अवयवः स्यात्॥ ॥

प्रयोगः संख्यायाः। बहवोवयवा इति उत्सृष्टभेदस्य संख्यालक्षणस्यार्थस्यैकत्वादेर्विशेषानवयवान्मत्वा प्रश्नः। अवयवे या संख्येति। अवयवेयः संख्यावाची शब्दो वर्त्तते तस्मादस्येत्यधिकारादवयविनि प्रत्ययो भवति। न च सामान्यविशेषयोरवयवावयविभावः संभवतीति भावः। बहुशब्द इति न बहुशब्दवाच्योर्थः अपेक्षेतं कल्प्यते बहवः एकत्वगुणा अवयवा अस्या विंशतिसंख्यायास्तत्समुदायस्वरूपायाः सा बहुतयी विंशतिरिति तथापि प्रत्ययार्थस्य प्रकृत्यर्थो विशेषणमयं भिचारादनुपपन्नं॥ ॥

=एकत्वसंख्यारूपा गुणा इत्यर्थः १=

=विंशतिसंख्याया बहुत्वाव्यभिचारादिति भावः १०=
=तावद्भिरेकैकोपमेकोपमिति ... विशेषकत्वाद्विंशतिः=

=संख्याता इत्यर्थः। तदाश्रयत्वं कल्पयति ... ॥२॥ =नियतपरिच्छेदहेतुर्हि संख्येतिभावः। ...

भा० कै० ५ संख्येयसेवेति। संख्याशब्दवाच्यासंख्यावयविनीत्यर्थः॥ नैषासंख्येति। संख्याशब्देन संख्याविशेषो नाभिधीयत इत्यर्थः॥ संज्ञैषेति। एकत्वादीनां संख्यात्वजातियुक्तानां संख्ये-
५७ त्येषा संज्ञा तत्र संख्याशब्दप्रतिपाद्यस्य सामान्यविशेषस्यावयवित्वासंभव इत्युक्तमेतत्। बहुत्वं यूथमित्येतत् अवयवावयविभेदविवक्षायां भवति। बहुत्वं रूपमि-
त्येतच्चित्रस्य रूपस्यावयवित्वविवक्षायां भवतीत्यदानुरूपसामान्यं विवक्ष्यते शुक्लादिविशेषविषयं तदा सामान्यविशेषयोरवयवावयविभावाभावान्न भवति।
अवयविनीति। स्वार्थे प्रत्ययो मा भूदित्येवमर्थमवयविनीति वक्तव्यं। अवयवस्वामिनीति॥ अवयवाः संत्यस्येति मुत्त्वा स्वामिनोप्यवयविशब्देनाभिधा

=... अनियतत्वाज्जदविवक्षामः संभवात् ... ॥

ननु चेयमस्ति संख्येसेव। नैषा संख्या। संज्ञैषा। अवयवविधानेऽवयविनि प्रत्ययः अवयवविधानेऽवयविनि प्रत्ययो भवतीति वक्तव्यं। इह
मा भूत्। पंचावयवाः दशावयवा इति अथावयविनीत्युच्यमानेऽवयवस्वामिनि कस्मान्न भवति पंच पश्वः वयवा देवदत्तस्येति। अवयवशब्दोयं
गुणशब्दः अस्येति च वर्त्तते तेन यं प्रत्यवयवो गुणस्तस्मिन्नवयविनि प्रत्ययेन भवितव्यं। के च प्रत्यवयवो गुणः। समुदायं। यद्येवमवयविनी स
पि न वक्तव्यं। अवयवेषु कस्मान्न भवति। अस्येति वर्त्तते॥ उभादुदात्तो नित्यं। किमर्थमुदात्त इत्युच्यते॥ ॥ ॥

×अतइनि×२

नात्रापि प्रत्ययेन भाव्यमिति मत्वा प्रश्नः अवयवशब्दोयमिति। संबंधिशब्दान्नियत एव संबंधिनिमित्तार्थो यो भवतीति यथा पितृमानिति पुत्र एवाभिधीयते पुत्रवा-
निति च पितैव तथेहाप्यवयविशब्दे नावयवा एवोच्यते तेन तु स्वामी सत्यर्थः। अस्येति वर्त्तत इति। ठनादुत्सर्गत इत्याद्यस्मिन्निति मतुबित्यतोस्येति वर्त्तते सप्तम्यर्थे
त्विनि ठनोरभावः। सप्तम्यां चनतोस्य तावदिति च चुनात् अस्येति च वर्त्तत इति। तदस्य संजातमित्यतः॥ उभा। उभयोमणिरित्यवमवि नो वयवद्वित्वनिमित्तोपदेशः
उभौ पीतलोहितावयवौ यस्य स उभयः। उभये देवमनुष्या इति वर्गद्वयापेक्षमतिरोहितभेदानां वर्गाणामभिधानं किमर्थमिति। किमप्राप्तमादेरुदात्तत्वं विधातुमु- उभ०
(१) दात्तवचनं। उत्तामंत्रितस्वरबाधनार्थं मंतस्यैवोदात्तत्वं विधातुमिति प्रश्नः॥ ॥ ५७

उदात्त इति। आद्युदात्त इति भावः। स्यान्निवृत्त्या वासितायाम् उदात्तत्वं प्राप्नोति वाधितावचित्स्वरे प्राप्ते आद्युदात्तत्वं विधीयते प्रत्ययस्वरेणापीति स्यान्निवर्तनाभावात् प्रत्ययस्वराच्चित्स्वरं
तु पूर्वविप्रतिषेधादित्वान्तं प्राप्नोति सर्वेदर्शिलेपूर्वविप्रतिषेधमेव न विरुध्यते कुत एतदिति। स्वरान्तरबाधनार्थं मन्तस्यैवोदात्तत्वमस्तीति मन्यते हे उभयेषामन्त्रितानां घुदात्तत्व
प्रसंगः उदात्तेति पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त इति चित्स्वर एवानेन बाध्यते नामन्त्रितस्वरः। अधिके समानजाताविति समाना या जातिस्तस्यां समानजाम

×तदस्मिन्न्× =इदं कृपालादिस्वमुदाहरणं अपादायेतु आदिनिकेन निपातेन भाव्यमिति ... २=

उदात्तो यथा स्यात्। नैतदस्ति प्रयोजनम्। प्रत्ययस्वरेणाप्येष स्वरः सिद्धः। न सिध्यति। चितोऽन्त उदात्तो भवतीति अन्तोदात्तत्वं प्रसज्येत। अथ उदात्त
न इत्युच्यमाने कुत एतदाद्युदात्तत्वं भविष्यति। न पुनरन्तस्येति। उदात्तवचनसामर्थ्यात्। यस्य अप्राप्तस्वरस्तस्य भविष्यति। कस्य चाप्राप्तः। आदेरन्त
स्य पुनश्चित्स्वरेणैव सिद्धम्। तदस्मिन्नधिकमिति दशान्ताड्डः। इह कस्मान्न भवति एकादश माषा अधिका अस्मिन्कार्षापणशत इति॥ अधिके
समानजातौ। समानजातावधिक इष्यते। अथेह कस्मान्न भवति॥ एकादश कार्षापणास्त्रिंशतीति इष्टं शतसहस्रयोः शतसहस्रयोरधिक इष्यते
देरुदात्त ॥ अथेह एकादशं शतसहस्रमिति कस्मादधिकोऽभवितव्यं॥ ॥ ॥

=सप्तम्यर्थे=

धिके यद्वर्तमानात्प्रत्ययः प्रकृतिप्रत्ययार्थयोस्तत्त्वजातीयत्वे प्रत्यय इत्यर्थः। न्यायप्राप्त एवायमर्थ उक्तः तथा ह्येकादशाधिका अस्मिन्गोशत इति वाक्ये शतवि
शेषणत्वेनाप्युपात्ता गावः सन्निधानात्प्रकृत्यर्थमपि विशिंषन्ति एवं च नावप्येकादशं गोशतमित्युक्ते गावः प्रकृत्यर्थतया प्रतीयन्ते शब्दान्तरप्रयोगमन्तरेण अधिका
धिकिभावस्तत्त्वजातिविषय एव प्रसिद्धः न चैतन्नौ भिन्नजातीयसंख्येयवाचिना शब्देन प्रकृत्यर्थो विशेषयितुं शक्यते सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं ने
तिन्यायात्॥ ॥ ॥

भा०कै०५ ४८

यस्यसंख्येति। शतानां सहस्रमिति शतसहस्रमिति षष्ठीसमासः। क्रियते सहस्राणां शतं शतसहस्रमिति च संख्यायाऽल्पीयस इति द्वंद्वे चाद्वंद्वे च स्मरणाच्छतस्य पूर्वनिपातः। तत्र शतानां सहस्रमिति शतानि संख्यायंत इति तान्येव प्रकृत्यर्थतया विज्ञायंते एकादशशतान्यधिकान्यस्मिन्छतसहस्रे तदेकादशं शतसहस्रमिति। सहस्राणां शतं शतसहस्रमिति तु सहस्राणां संख्येयत्वात्तेषामेव प्रकृत्यर्थत्वं एकादशसहस्राण्यधिकान्यस्मिन्नेकादशमिति प्रकरणादिवशाच्छतानां सहस्राणां

[redacted]

यस्य संख्यातदधिकेऽर्थे कर्तव्यो मतो मम। यदि तावत् शतानि संख्यायंते शताधिके भवितव्यं। [redacted]

थ सहस्राणि संख्यायंते सहस्राधिके भवितव्यं। इविधाने परिमाणशब्दानामाधिक्यस्याधिकरणाभावाद् निर्देशः। डविधाने परिमाणशब्दानामधिकरणाभावादनिर्देशः। आगमको निर्देशः अनिर्देशः। नह्येकादशानां शतानामधिकरणं। सिद्धं

तु पंचमीनिर्देशात्। सिद्धमेतत्कथं। पंचमीनिर्देशः कर्तव्यः। तदस्मादधिकमिति। सतर्हि पंचमीनिर्देशः कर्तव्यो न कर्तव्यः।

केचित् यद्यपि तावत्व्यापके वैयधिकरण्येऽसंभवो नास्ति। औपश्लेषिकमधिकरणं विज्ञास्यते एकादशकार्षापणा उपश्लिष्टाः

अस्मिन् शते एकादशं शतं। शतं विंशतेश्च। किमर्थं शब्दग्रहणं तदग्रहणं शतग्रहणं तदग्रहणं प्रत्ययग्रहणे यस्मात्तत

×धिकास्या×४ ६ हादेरधिकार्थं। शब्दग्रहं तदग्रहणं क्रियते॥ " "

वासंख्येयत्वावसायः यस्य संख्यातदधिका इसे तत्प्रत्ययार्थे न तस्य जातीयस्य प्रकृत्यर्थाश्रयणाल्लभ्यत इति नायमपूर्वोऽर्थः॥ नह्येकादशानामिति

तेषां शते नंतर्भावादिति भावः। पंचमीनिर्देश इति। यस्मादधिकमिति निपातनात्। बुद्धिप्रकल्पितपायाश्रयणात् पंचमी॥ औपश्लेषिकं इति एवं चाधिकसं

बंधे पंचमीसप्तम्यौ भवतः अधिकारवाशीर्षेणेति केचित्तात्तीयापिभवति। शतं। अंतग्रहणमिति केवलस्य शतं प्राति परिकस्यासंभवात् प्रत्ययग्रहणे

=अधिकशब्दार्थान्तर्गताधारो रूपणक्रियायां चान्वय इतिभावः।=

पूरणसंख्यावाचकात् शतादिभ्योऽधिक प्रत्ययः॥

राम० ४८

=विंशत्येकत्वसमूहस्य॥२=

=नन्वेकत्रिंशदादयः संख्यासमूहवाचका न संख्यावाचका इति तेभ्यः प्रत्ययानुपपत्तिरित्याह। एकत्रिंशति

संख्याग्रहणं चेति। संख्याया अवयवे तयप् इत्यतः संख्याया इत्यनुवर्तत इति व्याख्यानं कर्तव्यमित्यर्थः। एकत्रिंशदादय उ शब्दाः संख्यान्तरस्य न दृष्टिहादय इव जातसंत
स्य वाचका न तु संख्यासमूहस्य विंशत्यादिवदिति। ग्रहणवतेति। तदन्तविधिनिषेधात् तदन्तमपि यथा स्यादिति वचनं॥ संख्यायाः। तदस्य संजातमित्यतः तदस्येत्यनुवर्तते। मे
ङ् प्रणिदाने इत्यस्माद् धातोः करणे ल्युट्। निमानशब्दः स च मूल्यवाची प्रकृत्यर्थविशेषणं चैतत्। निमाने वर्तमानात् संख्यावाचिनोऽस्येति षष्ठ्यर्थे मयट् प्रत्ययो
गुणस्य चेन्निमानं भवति। गुणशब्दः समानावयववचनः। निमानस्य निमेयापेक्षत्वान्निमेयं प्रत्ययार्थः संपद्यते। निमानस्य च गुणत्वमन्तरेण निमेयस्य गु

प्रत्ययग्रहे यस्मात् स विहितः तदादेस्तदन्तस्य ग्रहणं भवतीति। इह न प्राप्नोति। एकत्रिंशं शतं। इष्यते चात्रापि स्यादिति तदन्तग्रहणायत्त्वं सिध्यतीति। त्रिं
शदग्रहणमेवमर्थमित्युच्यते। अस्ति प्रयोजनमेतत् किं तर्हीति। संख्याग्रहणं च। संख्याग्रहणं च कर्तव्यमिह मा भूत्। गोत्रिंशदधिकास्मिन् शत इ
ति। विंशतेश्च। विंशतेश्च तदन्तग्रहणं कर्तव्यमिहापि यथा स्यात्। एकविंशं शतं। चकारात् संख्याग्रहणं च कर्तव्यं। इह मा भूत्। गोविंशतिरधि
कास्मिन् शत इति॥ संख्याया गुणस्य निमाने मयट्॥ ॥ ॥

=गुणत्वं समानावयवत्वं। नन्वेकत्वमानत्वं निमेयस्य किमपेक्षमित्याकाङ्क्षायां सन्निधानान्निमानापेक्षं इति सामर्थ्यान्निमानस्य भागार्थत्वमर्थसिद्धमिति भावः॥१=

णत्वं नोपपद्यत इति सामर्थ्यान्निमानस्यापि गुणत्वं विज्ञायते। यवानां द्वौ भागौ निमानमस्योदश्वित् भागस्य द्विमयमुदश्विद् यवानामिमुदाहरणं। भागविशेषप्र
तिपत्त्यर्थं यवादेः प्रकृत्यर्थविशेषणस्योपादानं नित्यसापेक्षत्वाच्च वृत्तिर्भवति। संख्याया इति किं। यव भागौ निमानमस्योदश्वित् भागस्य। गुणस्येति किं। द्वौ कार्षा
पणौ निमानमस्य व्रीहे द्विर्मेयो व्रीहिः कार्षापणयोरिति मा भूत्॥ निमान इति किं। यवानां द्वौ भागौ समीपेऽस्योदश्वित् भागस्येत्यत्र मा भूत्॥ ॥

=यदाधिकेति· आधिकमात्रं विवक्षितं न बहुत्वं नाप्यतिशयश्च इत्यर्थः ॥ २=

भा० कै० ५
४९

गुणिनीतिं द्विमयमुदश्वित् इति गुणिनि निमेये प्रत्ययो यथा स्यादित्येवमर्थं गुणेषु मा भूदिति स्वार्थे मा भूदित्येवमर्थमित्यर्थः ॥ अन्यथा द्वौ यवानां गुणौ निमानमस्योदश्वित्भागस्य द्विमयौ यवानामुदश्वित इति स्वार्थे मयट् प्रसज्येत । भूयस इति । निमेयभागसंख्याया निमानभागसंख्यायां यदाधिका भवति तदा प्रत्ययो यथा स्यादेको यवभागो निमानमस्योदश्वित्भागस्य इत्यत्र मा भूदिति । एकोन्यतर इति । अन्यतरशब्देन निमेयमेव विवक्षितं । एक एव यदि निमेयगुणो भवति । तदा प्रत्ययः द्वयोर्बहुषु च निमेयगुणेषु न भवति । द्वौ यवानां त्रय उदश्वित इति । नन्वत्र भूयस्त्वाभावान्न भविष्यतीत्येवं तर्हि उदाहरणादिति यं इदं तत्रो

निमाने गुणिनि । निमाने गुणिनीति वक्तव्यं । किं प्रयोजनं । गुणेषु मा भूत् । भूयसः । भूयस इति वक्तव्यं । किं प्रयोजनं भूयसो वाचिका याः संख्यास्ताभ्य उत्पत्तिर्यथा स्यात् । अल्पीयसो वाचिकाभ्यः संख्याभ्य उत्पत्तिर्मा भूदिति । एकोन्यतरः । एकश्चेदन्यतरो भवतीति वक्तव्यं । इह मा भूत् ।
=निमेयभागस्य येन केनापि निमान=
=भागेन समानत्वे सति यस्य निमानसं=
=ख्या निमेयसंख्यातोधिका तदा प्रत्य=
=य इति विवरण व्याख्या· निमेयसंख्या=
=तो निमानभागसंख्याया अधिका ×भाग×=
=धिके प्ययवयवसामर्थ्यं विवस्यन इति=
=नारायणीये· ३=
द्वौ यवानां त्रय उदश्वित इति । समानानां । समानानां चेति वक्तव्यं इह मा भूदेको यवानामध्यर्धमुदश्वित इति । तत्तर्हि दं च इदं वक्तव्यं न व
क्तव्यं । यत्तावदुच्यते गुणिनीति वक्तव्यमिति । न वक्तव्यं गुणेषु कस्मान्न भवति । अस्येति वर्तते । यदुक्तं भूयस इति वक्तव्यमिति । न वक्त
व्यं । अल्पीयसो वाचिकाभ्यः संख्याभ्य उत्पत्तिः कस्मान्न भवति । अनभिधानात् । यदुक्तं एकश्चेदन्यतरो भवतीति वक्तव्यमिति । न व
(क्तव्यं । कस्मान्न भवति । द्वौ यवानां त्रय उदश्वित इति ॥ " ॥

दाहरणं त्रयो यवानां द्वावुदश्वित इति अथवा द्वौ यवानां निमेयौ त्रय उदश्वितो भागा निमानमिति विवक्षायामुदाहरणं । एको यवानामध्यर्धमुदश्वित इति । भूयस इत्येतदनपेक्ष्योदाहरणान्तरं पेक्षापान्तद्वौ यवानामध्यर्धमुदश्वित इत्युदाहार्यं अन्ये तु अध्यर्धशब्दात् प्रत्ययनिवृत्त्यर्थमिदमुदाहरणमित्याहुः । तत्र युक्तं अध्यर्धपाद
स्य समासकृत्येव संख्यासंज्ञात्वादन्यत्र संख्यात्वाभावात् प्रत्ययाप्रसंगादध्यर्धपंचमादयो पि समासकृत्येव संख्यासंज्ञा नान्यत्रेति तेभ्योपि प्रत्ययाप्रसंगः । अस्येति व राम० ४९
र्ततेरिति । तेन स्वार्थे मयण्न भवति । किं तर्हि निमेयपेक्षीराहोस्वभागापेक्षया लब्धगुणित्वपदे शेनि निमेयगुणमात्रे तु प्रत्ययो न भवति ॥ अनभिधानात् ॥ "

=निमाननिमेययोर्विपर्ययात्· ३= नन्वहरणे द्विमयमुदश्विदित्युक्तं· द्विमयउदश्विद्भागइत्येवं तर्चितमत आह· निमेयगुणमात्रेविति· १=

तं त्रमिति। पश्नुनायजेतेत्यादिवत् गुणस्येसेकत्व संख्याविवक्षिता। एतदर्थमेव गुणा निमान इति लघुरपि समासनिर्देशो न कृतः ॥ अनभिधानादिति। अन्यूनाधिकैक गुणामुदश्वित इति निमेयं वक्तुं प्रत्ययो नसमसामर्थ्यादित्यर्थः॥ द्विमयाय वा इति उदश्वितो द्वौ गुणौ निमेयौ येषामेकगुणानां यवानां ते द्विमयाः यावते ति। तथा च निमे यस्यापि निमानत्वान्निमेये चापि दृश्यत इति न वक्तव्यमिति मन्यते। प्रस्तततराग इति रिति। अपां मुद्राणि तिम्र इति प्रतिरित्यर्थः। अत्रयवेति ये न मूल्येन करणेन क्रय्यं

=अस्याभिप्रायः। नस्वर्थेयान्वानुपर्मायवधोपाराम्‌। १=

तं त्रं विभक्तिनिर्देशः। पदप्युच्यते। समानानामिति वक्तव्यमिति। न वक्तव्यं। कस्मान्न भवति। एकोपवानाम ध्यर्द्धमुदश्वित इति। अनभिधानात् निमेये चापि दृश्यते। निमेये चापि प्रत्ययो दृश्यते॥ द्विमयाः यवाः त्रिमयाः किं पुनरिह निमानं किं निमेयं। यावता उभयं तत्र ज्यते॥ ससमेव समे ततः। क्वचित्

=तदीपमुपादायसीयंदीयन इत्यर्थः। =एवं चवत्सवत्सुदानपूर्वकपरस्वरूपा= =दानसाभयसाधारणत्वादुभयं निमा= =नमितिभावः। २=

=ज्ञानार्थे हीयमानेनिमेयत्वं स्याद्य= =मानेचनिमानत्वं प्रसिद्धतरमित्यर्थः। १=

काचित्प्रस्ततरग्रति र्भवति। तद्यथा समाने सागे धान्यं विक्रीणीते। यवान्विक्रीणीते। न कश्चिदाह। कार्षापणं विक्रीणीत इति। अथवा येनाधिग म्यते तन्निमानं। यदधिगम्यते तन्निमेयं। तस्य पूरणे डट्॥ तस्य पूरण इत्यति प्रसंगः। तस्य पूरण इत्यति प्रसंगो भवति। इहापि प्राप्नोति। पंचानां मुष्टिकानां पूरणो घट इति। सिद्धं तु संख्यापूरण इति वचनात्। सिमेतत् कथं॥ संख्यापूरण इति वक्तव्यं॥ एवमपि घटे प्राप्नोति॥ संख्येयं तत्पाव

=उष्टिकाद्यन्यथत्वमेवविकारे बाधा अविशेषः। पश्चमिते नोदकेन पंचताः पूर्यते। १=

१ द्विः पूरयति॥ ॥ ॥

प्राप्तुमिष्यते तन्निमानं यत्प्रेप्स्यते तन्निमेयमित्यर्थः॥ देशकालापेक्ष व्यवहारापेक्षत्वान्निमाननिमेयभावस्य॥ तस्य॥ तस्येति संबंधमात्रं विवक्षितं नैकत्वं नस्ये कस्य पूरणं संभवतीति द्यादिभ्य एव द्विवचन बहुवचनान्तेभ्यः प्रत्ययविधिः॥ तस्य पूरण इत्य ति प्रसंग इति। संख्यावाचिनः शब्दात् [redacted] पूरणे डट् प्रत्यय इत्ये तावाने वसूत्रार्थः॥ तथा च लब्ध पंचत्व संख्यानां संख्येयानां मुष्टिकादीनां पूरणे घटे प्रत्ययो निष्टः प्राप्नोति। एवमपीति। आधारधर्मेण पूरणेनाधेयायाः सं

१ ख्यायास्तद्द्वारेण संस्पर्श इति भावः॥ ॥ ॥

-संख्यायाअ(ग्र)पेक्षत्वात एकं संख्याग्रहणमनुवर्त्तते परंतु संख्यायागुणस्यानित्यत्वं का...षष्ठंलात्वर्थसंख्यापूरणेऽडित्यर्थः॥ तत्र स्य॰ १ = तं च क्रतेइति अंबकञ्च्यर्थः ॥ २ =
ततश्च संख्यावाच

भा०कै०५ संख्यापूरणा इति ब्रूमः इति द्वे संख्याग्रहणे अनुवर्त्तेते। तत्रैकं प्रकृतिविशेषणमपरं पूरणविशेषणं। ततश्चायेन पंचत्वादिसंख्यासंपद्यते समप्रत्ययार्थः अथ वैकस्मि
५० न्नेव संख्याग्रहणे अनुवर्त्तमाने प्रसासस्या संख्यापूरण एव प्रत्ययो भवति ननु विप्रकृष्टेयं चत्वारिसंख्यासंख्येयेन तत्रैभूते। यस्य चेति। न्यासांतरं वाकलेव्यामित्य
र्थः॥ तेन पंचत्वसंख्याभवत्यनेनेत्यत्रार्थे पंचमइति भवति। एवमपीति। प्रसिद्धसन्निवेशविशेषस्यग्रंथस्य योद्वितीयोध्यायः। पयेहसमयेः पदविधिरित्यादिस्तस्या
प्यष्टमशब्देनाभिधाने प्राप्नोति। तदभावेष्टत्वसंख्याया भावात् तदभावे अभावत्वात्॥ द्वितीयग्रहणं चोपलक्षणं न्यायस्यतुल्यत्वात् प्रथमाध्यायाद्यवयष्टमाद्यभिधानप्रसंगात य

संख्यापूरणाइति ब्रूमः॥ न ब्रूमः संख्येयपूरणाइति। यस्य च भावाद् न्यसंख्यात्वं तत्र। अपथवायस्य भावात् अन्यासंख्याप्रवर्त्तते तत्रेति वक्तव्यं। एवमपि
द्वितीयेध्याये अष्टमइति प्राप्नोति। सर्वेषां हि तेषां भावात् संख्याप्रवर्त्तते। चरमउपजाते पूर्वस्मिंश्चानपगत इति वक्तव्यं॥ एवमपि एकादशीद्वादश्यो
सौविष्टकृती इदं द्वितीयं इदं तृतीयं दशमानीति न सिध्यति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तस्य पूरणइत्यतिप्रसंग इति। परिहृ
तमेतत्। सिद्धं तु संख्यापूरणइति वचनादिति। तन्नर्हि संख्याग्रहणं कर्त्तव्यं न कर्त्तव्यं प्रकृतमनुवर्त्तते। क्व प्रकृतं। संख्यायागुणस्य निमाने मय
तार२ ॥ इति॥ ॥ ॥

रानुवृत्तिक्रमेण गणनाक्रियते। तद्यद्वितीयोध्यायः पश्चाडुणमानोष्टमादिव्यपदेशत्वेनेष्यते एव। तथा च भाष्यकारो वक्ष्यतिभवत्येवेति। पूरणग्रहणेनुक्रियमाणे चरमो
पजातस्य गणनापेक्षायां पूरणत्वात् सन्निवेशमात्रापेक्षया द्वितीये ष्टमव्यपदेशाभावः॥ द्वितीयं न्यासांतरमाह। चरमोपजात इति। गणनायां क्रियमाणायां पूर्वस्मि
न्संख्येये नपगते बुध्या परिगृहीतत्वादपेक्षितेयदुत्तौ पश्चादुपजायते तेन तत्प्रत्ययइत्यर्थः॥ एकादशीद्वादश्याविति। द्वादशी सन्निधावेकादश्याश्चरमोपजातत्वाभावः॥ ए
वं तृतीयसन्निधौ द्वितीयस्य चरमत्वाभावः। दशरथमानीति। शतमसैव चरमोपजातत्वान्नवानां दशानां च रमत्वाभावः॥ सूत्रं चेति। न केवलमव्याप्तिदोषो यावत्सूत्र एम०
॥ भेदोपीति च शब्दस्यार्थः॥ ॥ ॥ ५०

एवं तर्हीति। वृत्तिः परार्थाभिधानमुच्यते। उपसर्जनपदानां प्रधानार्थाभिधानात्। तदर्थ प्रमर्थे (?) ॥ इष्टविषयवदनिष्टेऽपि विषये वृत्तिः प्राप्नोतीत्येवमुपालंभो न क्रियते। किं तर्हि इष्टेवि-
षये प्रत्ययो न सिध्यतीत्यनिष्ट एव प्राप्नोतीत्युच्यते। वृत्तिस्थानमिति। प्रत्ययार्थे इत्यर्थः॥ प्रत्ययार्थे हि स्वार्थोपसर्जनेन प्रकृतिर्वर्त्तत इति प्रत्ययार्थो वृत्तिस्थानं। अयमत्रार्थः।
प्रकृत्यर्थव्यतिरिक्तेन प्रत्ययार्थेन भवितव्यं। यथौपगवमिति इह तु पंचमः पंच शब्दार्थे भूतः॥ तथा हि पंचानां यतामित्युक्ते पंचमस्याप्यानयनं भवति। ततश्चात्र प्रकृत्यर्थव्यति-
रिक्तप्रत्ययार्थाभावात्सं संख्यानामुपश्लिष्टानां पूरणे डट् इत्यत्रैवानिष्टे विषये प्रत्ययप्रसंगः वचनादिति। प्रकृत्यर्थातिरेकेण स्वार्थिकत्वं न तु सर्वालनात्तसंख्याग्रहणद्वयानुवर्त्ते
=अत्र हि पंचमभ्यप्रक्रियाभ्योपधये व्यतिरिच्यते। = नीत = प्रकृतिमात्रात्प्रतीतस्य पंचत्वसंख्यापूरकत्वस्यापि प्रतीतेः।१=

एवं तर्हि नेयं वृत्तिरुपालभ्यते। किं तर्हि वृत्तिस्थानमुपालभ्यते। वृत्तिरेवात्र न प्राप्नोति किं कारणं प्रत्ययार्थाभावात्। नैष दोषः। वचनात्स्वार्थिको भविष्य-
ति॥ अथ वा पूर्वस्याः संख्यायाः परापेक्षयाऽउत्तरनिर्वृत्त्या। उत्तरा च संख्या आदेशो वक्तव्यः॥ अथ वान्नेयं (?) तत्र शब्दो द्रष्टव्यः। चतुर्षु पंच
शब्दो वर्त्तते। अथ वा सर्वे एव द्व्यादयो ऽन्योन्यमपेक्षंते। यथैवं द्वितीये व्याये अष्टम इति प्राप्नोति भवसेवु॥ ॥ ॥
× इतनी पाठ्योणाद्वृत्तात्र

नात् अंतरंगत्वात्संख्यासंप्रतिपत्तिहेतौ प्रकृत्यर्थो नष्टे पि प्रत्ययो भविष्यतीत्यर्थः॥ पूर्वे सा इति। चतुः शब्दादिभ्यः प्रत्ययो विधेयः पंचादय आदेशाः कर्त्तव्या इत्यर्थः। तेन चतु-
र्णां पंचत्वसंख्योपजनद्वारेण पूरणः पंचमः स्यूनइति। यथा द्रोणो पि द्रोणा[redacted]न्द्रो नाभिधीयते। तथा च द्रोणा इति बहुवचनमवयवेन विग्रहः समुदायः समासार्थः। तथेहापि
वृत्तिविषये चतुर्षु पंचशब्दो वर्त्तते। तेन न्यूनानां पंचानां पूरणः पंचमः॥ न्यूना अपि पंच चत्वारो भवंति। तथा हि पंचसकल ब्धुवेषु चतुरो लब्ध्वा ब्रवीति। न्यूनानि पंचलब्धानी-
ति। अथ वेति। सर्वे एव पंचशब्दो वर्त्तते इत्येकैकमंतरेण पंचन भ[redacted]वंतीति पंच प्रत्योबुद्धौ कृतमंनिः ऋष्यप्रत्ययो विधीयते। पंचानां पूरणः पंचसंख्यानिमित्तत्वात्संच
१मः भवसेवेति गणनापेक्षायां यथापूर्वं व्याख्यातं॥ ॥ श्री ॥

भा० कै० ५
५१

प्रकृत्यर्था इति। पूर्वोक्तार्थसंग्रहश्लोकाः। वीप्सेति। वाक्ये यथैव वीप्सा वृत्तिर्न तु स्वार्थे इत्यर्थः। वचनादिति। स्वार्थे इत्यर्थः। पूर्वेषामुत्तरेति। यतो नरसंख्यावाची पंचादिशब्दः पूर्वेषां संख्या
यां वर्तत इत्यर्थः। सामर्थ्यं चेति। तस्मान् नार्थाभिधायिन्याः संख्यायाः प्रत्ययार्थेन संबद्धत्वं न्याय्यमित्यर्थः। अन्योन्यं वेति। अपेक्षितपरस्पराः संख्येयाः पंचादिशब्दवाच्यास्तेषा
मन्यतमे पंचत्वादिसंख्याहेतौ प्रत्ययः। बहूनामिति। पूर्वेषामासन्नः यं भेदः। पूर्वेत्र पक्षे सर्व एवातिरोहितभेदः पंचशब्दार्थः उत्तरत्र तु समुदायः शब्दार्थः। अवयवस्तु नोपा
त्तो न च संसक्तः प्रत्ययेन तु विधीयते। अन्यत्वादुभयोरिति। समुदायावयवयोर्भेदात्समुदायः प्रकृत्यर्थोऽवयवः प्रत्ययार्थः। यथा वा क्षीरशाखेति। प्रत्यस्तमितमूलाद्यव
=अवयवमात्ररूपितधर्मेण प्रकृत्या नोपात्तः।२=
=साधारणरूपेणोपात्त इत्यर्थः।१=
प्रकृत्यर्थो द्वहिः सर्वा वृत्तिः प्रायेणाल्लक्ष्यते। पूरणे स्यात्कथं ह्यत्र विवेचनादिति लक्ष्यतां। तस्याः पूर्वां तु यासंख्या तस्यां भवतु तद्धितः। आदेशश्चोत्तरा
संख्या तथा न्याय्या भविष्यति न्यूने वा कृत्स्नशब्दोयं पूर्वेषामुत्तराय दिसामर्थ्यं च तया तस्मात्तथा न्याय्यं भविष्यति। अन्योन्यं वाव्यपाश्रितसम
वेऽस्मिन्न्यायः स्यो यदि। प्रवर्त्तते तथा न्याय्या वृत्तिर्भवति पूरणे बहूनां वाचिका संख्या पूरणे स्वैक इष्यते। अन्यत्वादुभयोर्न्याय्या वा क्षीरशाखानिदर्शनं। =३=
नांतादसंख्यादेर्मट्। मडादिषु यस्यादिस्तन्निर्देशः। मडादिषु यस्यादिः क्रियते तन्निर्देशः कर्त्तव्यः। अयमादिर्भवतीति वक्तव्यं। अकि यमाणे प्रत्ययाधि
कारात् प्रत्ययोऽयं विज्ञायेत। तत्र को दोषः। प्रत्ययांतरे हि सति स्वरे दोषः स्यात् विंशतितमः। एष स्वरः प्रसज्येत। विंशतितम इति चेष्यते। सत्तर्हि तथा निर्देशः कर्त्त
=ननु यस्मादिति तस्यादिरेवास्तु न त्वादंतादिवसत्र षष्ठी। निर्देशोस्तीत्यत आह।१= १ व्यः। नकर्त्तव्यः। प्रकृतं डट उदाहरणमनुवर्त्तते। क्व प्रकृतं॥ " "
यवभेदः समुदायः प्रकृत्यर्थः [redacted] अवयवस्तु शाखाप्रत्ययार्थो नु हान्त्वा
देश्चेत्सत्र प्रत्ययः। नांता। मडादिष्विति। षष्ठी स्थानेयोग इत्यत्र षष्ठीति योगविभागात्। तत्र चाद्यंतौ टकितावित्यस्यानुवर्त्तनात्सुषष्ठी निर्दिष्टस्यागमिनो भावाच्च रेष्ट इत्यादिवन्मडागम एम०
योऽइत्यवायः प्रत्ययाः प्राप्नुवंति। तत्र मट्प्रत्यये रागमत्वप्रत्ययत्वयोर्विशेषाभावः। तमट्तु प्रत्ययत्वे सत्याद्युदात्तः स्यादागमत्वे त्वनुदात्तो भवतीति उट्स्वरेण विंशतितम ५१
५ इत्यंतोदात्तत्वं भवति॥ प्रकृतमिति। स्वरितत्वादिति भावः॥ " "

ऊषद्रव्यपरार्थकइति। माक्षिके माद्वीके च प्रसिद्ध इत्यर्थः आतश्चेति रसमात्रे मधुशब्दस्य प्रवृत्यभावाद् न्निविषयमेव यत्नप्रतिपाद्यं रसवाचित्वं मन्यते। मधुन्येवेति॥ नहितद्देव तस्मिन्विद्यत इति सामर्थ्याद् न्निविषये [redacted] रसविशेषवाची मधुशब्द इत्यर्थः॥ तद्योरसवाचीति॥ अभिधानशक्तिस्वाभाव्यादिति भावो मतुवपि रसवाचिनो नभिधानाच्च भवति॥ खर इति॥ शब्दनिष्पत्तिकारणं कखविवरं महदस्यास्तीभावः॥ मुखर इति। सुव्यापार शब्दोच्चारणेः प्रतिबंधं मुखमस्येत्यर्थः॥ कुंजर इति हस्तिविषये कुंजशब्देन हस्तिहनुरुच्यते॥ तेन तद्वान्कुंजरो हस्ति शब्दवज्जातिशब्दोयं नगर इति॥ नगावृक्षाः पर्वताश्च नगरशब्दोपि जातिशब्द एव। नग शब्दो क्ष्मादिषु प्रयुज्यते =

ऊषसुषिमुष्कमधोरः॥ अयं मधुशब्दो रसेव द्रव्यपरार्थेः॥ अस्तिरसवाची॥ आतश्च रसवाची॥ अपिमधुन्येव हिमच्छिदं मधुरमितिप्रयुज्यते॥ तद्योरसवाचीतस्येदं ग्रहणं॥ यदिहि द्रव्यपदार्थकस्य ग्रहणं स्यात इहापि प्रसज्येत। मध्वस्मिन्घटेस्तिप्रकरणो खमुखकुंजेभ्य उपसंख्यानं कर्त्तव्यं॥ खरः। मुखरः। कुंजरः नगाच्च। नगाच्चेतिवक्तव्यं। नगरं। केशाद्वोन्यतरस्यां॥ वप्रकरणे मणिहिरण्याभ्यामुपसंख्यानं कर्त्तव्यं। मणिवः हिरण्यवः॥ छंदसीवनिपौच॥ उदसिरीवनियौ च वक्तव्यौ॥ वप्र्च मतुपच। रथीरभून्मुद्गलानी॥ विष्ठौ सुमंगलीरियंवधूः॥ ऋतावानं मघवान मीमहे॥ उद्धाच। उद्वतीच॥ मेधारथाभ्यां इरन्निरचौवक्तव्यौ। मेधिरः रथिरः॥ अपर आह वप्रकरणे अन्येभ्योपि दृश्यत इतिवक्तव्यं बिंबावं। कुरावं इष्टकावं॥ ॥ ॥

इति वुञ्छण्कठजिल्यादिना नगरशब्दस्य सिद्धत्वान्नगाच्चेति न वक्तव्यं॥ केशं मणिव इति नाम्नविशेषस्येयं संज्ञा हिरण्यव इति निधिविशेषस्य॥ केचित्तु कुंजरस्येसाहुः॥ छंदसीवनियौ चेति च शब्दो वस्य समुच्चयार्थो न्यतरस्यांग्रहणस्य सर्वैः संबंधान्मतुवपि भवतीति मत्वाह॥ वश्च मतुश्चेति रथीरितिरथोस्यास्तीत्यर्थः॥ सुमंगलीरिति लाघवात वदुत्वीहिणाभाव्यमिति न्यायः छंदस्यत्वात् ऋतनाश्रितः मघवेति मघमस्यास्तीति मघवा। मतुपि तु मघवत् शब्दः॥ मघवबहुलमित्येतन्न कर्त्तव्यं श्वन्नुक्षन्निति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयस्य सिद्धत्वात॥ उद्वाचेति उत्रगतमस्यास्तीति साधनक्रियावचनादुपसर्गात्प्रत्ययः मेधारथाभ्यामिति॥ एतदपि छंदो विषयं।

॥ [illegible]

भा०कै०५
६४

रजः॥ भ्रातृवलच् इति। वलच् इत्यत्राण्ग्रहणानुवर्त्तनेनादीर्घोभावः। पुत्रवल इति। दीर्घत्वंवनगिर्योः संज्ञायामित्यतः संज्ञानुवृत्त्या संज्ञायांविधीयते तेन पुत्रावलउत्संगाव

रजःकृष्यासुतिवलच् प्रकरणेऽन्येभ्योपि दृश्यते इति वक्तव्यं। भ्रातृवलः पुत्रवलः॥ उत्संगवलः॥ अत इनिठनौ॥ इनिठनोरेकाक्षरात्प्रतिषेधो वक्तव्यः॥ स्ववा

न्। खवान्। अल्पत्वमिदमुच्यते। एकाक्षरादिति। एकाक्षरात्कृतोजातेः सप्तम्यांचनतौ स्मृतौ। एकाक्षरात्। स्ववान्। खवान्। कृतः। कारकवान्। जातेः। वृक्षवान्

प्लक्षवान्। व्याघ्रवान्। सिंहवान्। सप्तम्यांचनतौ। दंडाः अस्यांशालायांसंतीति। यदिकृतोनेत्युच्यते॥ कार्यीकार्यिक इतिनसिध्यति। तथाजाते [redacted] नैसुच्य

तेतं तुलीतंतुलिक इतिनसिध्यति। एवंतर्हिनायं समुच्चयः। कृतश्चजातेश्चेति। किंतर्हि। जातिविशेषणंकृद्ग्रहणं कृषाजातिरिति। [redacted]

कथंकारकवान्। अनभिधानान्न भविष्यति यद्येवंनार्थोनेन। कथंस्ववान्। वृक्षवान्। प्लक्षवान्। दंडाअस्यांशालायांसंतीति। अन

भिधानान्नभविष्यति॥ व्रीह्यादिभ्यश्च। शिखादिभ्य इतिवाच्य इकन् यवखदादिषु॥ किंप्रयोजनंनियमार्थं॥ इनिरेवशिखादिभ्यः इकन्नेवयवखदा

दिभ्यः। शिखायवखदादिभ्यो नियमस्यावचनंनिवर्त्तकत्वात्॥ शिखायवखदादिभ्यः नियमस्यावचनं किंकारणंनिवर्त्तकत्वात्॥ किंनिवर्त्तकं। अनभि

धानं। एकगोपूर्वाट्ठञ्नित्यं। नित्यग्रहणं किमर्थं विभाषामाभूत्॥ नैतदस्तिप्रयोजनं। एवंसत्यन्ययोगेविभाषाग्रहणं निवृत्तं। एवंतर्हिसिद्धे सति यन्नित्य

ग्रहणंकरोति तज्ज्ञापयत्याचार्यः प्रागेतस्माद्योगाद्विभाषेति अनुवर्त्तते इति। अथ अतइत्यनुवर्त्तते॥ उताहो न। किंचातः। यद्यनुवर्त्तते। एकाग्विकोन

सिध्यति। समासान्ते कृते भविष्यति। एवमपि गौशकटिकोनसिध्यति। अथनिवृत्तमिहापिप्राप्नोति। गोविंशतिरस्यास्तीति निवृत्तं॥ कस्मान्नभवति।

गोविंशतिरस्यास्तीति। अनभिधानात् नभविष्यति। रूपादाहतप्रशंसयोर्यप्। यप्प्रकरणेऽन्येभ्योपिदृश्यते इति वक्तव्यं हिम्याः पर्वताः गुणा रामं०

ल इतिसंज्ञायां भवतीत्यसंज्ञायांदीर्घोभावः॥ ॥७॥ ॥ श्री ॥ १ ब्राह्मणाः॥ ॥ श्री ॥१॥ ६४

=इंद्वापकोपेपादिषुत्वतइतिसंज्ञकान्तद्वयसासंसंस्यते=

=गोशकटिकइति एकटिशब्देनसमासइतिभावः॥२= =वृद्धीहिदंद्वयोरस्त्वनभिधानान्नेत्याशयः॥२= =अनुवर्त्ततइतीति तुंदादिभ्यइलश्चेत्यत्रचकारेणठिठनोः समुच्चयेपिपक्षेमतुवर्थत इतिभावः॥ एवंचसापिवाग्रहणानुवृत्तमनुपपत्यसत्वेतिनलिरसर्भः

=इनिसर्भः।

=प्रत्ययार्थविशेषणत्वादित्यर्थः।१= प्रत्ययार्थस्यैश्वर्यविशिष्टत्वे हि तदेव हि...।१=

प्रत्ययार्थे

स्वामि॥ स्वमस्येति॥ धनवाचस्त्वस्वशब्दः॥ नायं प्रत्ययार्थ इति प्रत्ययार्थविषयत्वात् प्रत्ययार्थ उच्यते। ऐश्वर्य इति प्रकृतिविषयत्वात् सप्तमी स्यात् तदा ईशितरि धनवाचिनोऽपि

=ह्रयोमयहृदयार्थमिदं।१=

=अद्भुतं दृष्टा भुनमभ्राय चरत्कपर्दीति दर्शनात्।१=

बहुलं छन्दसि। छन्दो विन्मत्करणे। अष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घश्च। छन्दो विन्मत्करणे अष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घश्चेति वक्तव्यं॥ अष्ट्रावी। मेखलावी। द्वयावी। उभयावी॥ हृदयावी। मर्मणश्चेति वक्तव्यं। मर्मावी। सर्वत्रामयस्य। सर्वत्रामयस्योपसंख्यानं कर्तव्यं। आमयावी। शृङ्गवृन्दाभ्यामारकन्वक्तव्यः। शृङ्गारको वृन्दारकः। फलबर्हाभ्यामिनज्वक्तव्यः॥ फलिनः। बर्हिणः। हृदयाच्चालुरन्यतरस्यां। हृदयाच्चालुर्वक्तव्यः। अन्यतरस्यां। हृदयालुः। हृदयी। हृदयिकः। हृदयवान्। शीतोष्णतृप्रेभ्यस्तन्न सहत इति चालुर्वक्तव्यः। शीतालुः उष्णालुः तृप्रालुः। हिमाच्चेलुः। हिमाच्चेलुर्वक्तव्यः॥ तन्न सहत इत्येतस्मिन्नर्थे हिमेलुः। बलाच्चोलः। बलाच्च ऊलो वक्तव्यः॥ तन्न सहत इत्येतस्मिन्नर्थे बलूलः॥ वातात्समूहे च तन्न सहत इत्येतस्मिन्नर्थे च ऊलो वक्तव्यः। वातूलः। पर्वमरुद्भ्यां तप्वक्तव्यः। पर्वतः। मरुत्तः। ददातिवत्तं वा। ददातिवत्तं वा पुनरेतद्भविष्यति॥ मरुद्भिर्दत्तो मरुत्तः॥ आलजाटचौ बहुभाषिणि॥ कुत्सित इति वक्तव्यं॥ यो हि सम्यग्बहु भाषते वाग्मीत्येवं स भवति॥ तत्र हि वक्तव्यं॥ न वक्तव्यं। नानायोगकरणसामर्थ्यान्न भविष्यति स्वामिन्नैश्वर्ये। इह कस्मान्न भवति॥ स्वमस्यास्तीति नैष दोषः। नायं प्रत्ययार्थः॥ किं तर्हि प्रकृतिविशेषणमेतत्॥ स्वामिन्नैश्वर्ये निपात्यत इति॥ वातातीसाराभ्यां कुक् पिशाचाच्चेति वक्तव्यं॥ पिशाचकी वैश्रवणः॥ ॥७॥ ॥७॥ ॥

=पूर्वसूत्रेऽपि बहुभाषिणीत्येतत्सं= =बध्यत इति भावः।२=

प्रत्ययः स्यात्॥ प्रकृत्यर्थस्यैश्वर्यमिहोपात्तमिति वृत्तिविषय एव चास्य शब्द ऐश्वर्ये वर्तते॥ तेन धनवान्निर्धनो वेशिता स्वामिशब्देनाभिधेयः॥ श्री ॥

भा० कै० ५ पुष्क। अर्थाच्चेति विरोधादस्तीति न संबध्यते। अर्थो सन्निहितोऽस्येत्यर्थे। शाप्र एव निर्दिधीयते। तत्रकौ दिन्यन्याये नास्त्युपाधिकादिनेरभावः। धान्यार्थीति धान्यमर्थ इति क
६५ र्मधारये धान्यार्थोऽसन्निहितोऽस्येति प्रत्ययः। एवं तर्हीति धान्येनार्थी धान्यार्थी तृतीयासमासो भविष्यतीत्यर्थः॥ सहीति तृतीयात तत्कृतार्थेनेत्यनेनार्थशब्देन समासो विधी
यमानः अर्थिशब्देन न प्राप्नोतीत्यर्थः॥ स्वरूपे सत्तन्नाश्रितं न्याप्यस्य परिहारस्यापि धा समसमानत्वात् एवमपीति। कृतामुद्भूत क्रियासाधनाभिधायित्वात् न द्यग छ
नगं ते समभिधीयते॥ तद्यः क्रियापदार्थक इति नन्वत्रापि निरीहेन प्राप्नोतीति नैष दोषः। णिनि पक्ष एव दोषस्यावतारो णिनेः कर्त्तरि विधानात् क्रियां हि कुर्वन् कर्तेत्युच्यते॥

पुष्करादिभ्यो देशे। इति प्रकरणे बलादाकृतगणे पूर्वपदादुपसंख्यानं कर्तव्यं। बाहुबली। सर्वादेश्च इति वक्तव्यः। सर्वधनी सर्वबीजी सर्व[redacted]कोषी॥ अ
र्थाच्चासन्निहिते इति वक्तव्यः। अर्थी। असन्निहित इति किमर्थं। अर्थवान्॥ तदन्ताच्च॥ तदन्ताच्चेति। वक्तव्यं। धान्यार्थी। हिरण्यार्थी। किमर्थं तदन्तादित्युच्य
ते। न तदन्तविधिना सिद्धं। ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। एवं तर्हि इन्नन्तेन सह समासो भविष्यति॥ धान्येनार्थो धान्यार्थी सहि समासो न
प्राप्नोति यदि पुनरयमर्थयतेर्णिनिः स्यादेवमपि क्रियामेव कुर्वाणस्य स्यात्॥ तूष्णीमप्यासीनो यस्तस्मा मर्थानाचरति सः अभिप्रायेण गम्यते। अ
र्थी अयमनेनेति। एवं तर्हि अयमर्थशब्दः अस्त्येव द्रव्यपदार्थकः। तद्यथा अर्थवानयं देश इत्युच्यते। यस्मिन् गावः सस्यानि च निर्वर्त्तन्ते। अस्ति क्रियाप
दार्थकः भावसाधनः अर्थनमर्थ इति। तद्यः क्रियापदार्थकः तस्येदं ग्रहणं। एवं च कृत्वा अर्थिकप्रत्यर्थिकावपि सिद्धौ भवतः॥ ॥ इति श्रीमद्भगवत्पतंज
लिविरचिते व्याकरणमहाभाष्ये पंचमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकं॥ पादश्च समाप्तः॥ ॥ ॥ ॥

मत्वर्थीयस्त्वयं संबंधे भवतीति तत्र क्रियाकारकभावस्यान्यथाभावान्निरीहेऽपि सिद्धः प्रत्ययः एवं च कृत्वेति यद्यर्थाच्चासन्निहित इत्युच्यते तदेनेरेव विधानात् ठन्न स्यात् अर्थापि
णिनिनार्थीति साध्यते तथाप्यर्थिक इति न सिद्ध्येदिति क्रियापदार्थकत्वे त इति ठनापि प्रत्ययद्वयं सिध्यति। मतुप् तु क्रियापदार्थकादनभिधानान्न भवति धनवाचिनोऽपि अ राम०
नभिधानादिनिठनोरभावः॥ इत्युपाध्यायजैय्यटपुत्रकैयटकृते भाष्यप्रदीपे पंचमाध्यायस्य द्वितीये पादे द्वितीयमाह्निकं॥ पादश्च समाप्तः॥ ॥ ६५

=तवच्चेदसप्तमीमितिस्यात् ॥२॥ =ननुप्रतिषेधवाक्येऽपि अछिनइतिसप्तमीनिर्देशात्नादितिनिर्देशः लोकेपिनलत्वाख्यानमपक्षेस्यकार्यमितिसत आलनवर्गस्येति विषमसप्तमीतिभावः ॥२॥ =अनिसत्वमितिपदपदिनविभक्त्यादिसूत्रभाष्येप्राग्दिशो मानामित्वनिषेधस्याप्रदानादुदिर्त्वंनापकमुक्तादानीमोमस्यलोपोप्याग्दिशितिलोपे

प्राग्दिशोविभक्तिः ॥ ॥ किंप्रयोजनमिति प्रयोजनसामान्यविवक्षायामेकवचनिर्देशः ॥ इत्प्रतिषेधइति अम्पथामितिचोत्स्यात् परइति देशविद्यर्थात् इदानीमोमकारस्य हल्त्वस्मितीत्संज्ञास्यात् ॥ तौ चोक्तमिति ॥ तवर्गस्य चोक्तमित्यर्थः ॥ यमोरित्संज्ञा प्रतिज्ञाणार्थमुकारक रणमित्संज्ञायाः प्रतिषेधस्यानित्यत्वं ज्ञापयतीति तद्धितपर्युदासोपिनवक्तव्यः ॥ इतः इहेति इत इतिमुख्यमुदाहरणं अत्र ह्रिलित्स्वरेप्राप्तेविभक्तेः इदमित्युदात्तत्वंभवति इहेत्यत्रतु प्रत्ययस्वरेणान्तोदात्तत्वंसिध्यति ॥ ननु

प्राग्दिशोविभक्तिः ॥ विभक्तित्वेकिंप्रयोजनं ॥ विभक्तित्वेप्रयोजनमित्प्रतिषेधः ॥ इदानीन विभक्तौतुस्मादितीत्संज्ञायाःप्रतिषेधःसिद्धोभवति यद्येवंकिमोत् ॥ क्वप्रेप्सन्नदीष्यसेक्वार्द्धमासात्अत्रापिप्राप्नोति ॥ तौचोक्तं ॥ किमुक्तं ॥ विभक्तौतवर्गप्रतिषेधोतद्धितइति ॥ इदमोविभक्तिस्वरश्च प्रयोजनं ॥ इतइहइदमस्तृतीयादिर्विभक्तिःइदात्नाभवतीतिएषस्वरःसिद्धोभवति ॥ सदादिविधयश्च ॥ प्रयोजनं ॥ यतः यत्र कुतः कुत्र ॥ विभक्तावितिसदादिविधयःसिद्धाभवंति ॥ किंसर्वनामबहुभ्यो ॥ बहुग्रहणोसंख्याग्रहणं ॥ बहुग्रहणेसंख्याग्रहणंकर्त्तव्यं ॥ इहमाभूत् ॥ बहोरिति ॥ अप्यकिमर्थंकिमउपसंख्यानंक्रियते ॥ नसर्वनाम्नइसेवुसिद्धं ॥ द्व्यादिप्रतिषेधार्थंकिमउपसंख्यानं क्रियते अद्व्यादिभ्यइतिप्रतिषेधेमाप्रेकिमउपसंख्यानंक्रियते ॥०

मध्येपवादाइतिन्यायादनुदात्तौसुप्पितावित्येतेनसुंविभक्तिस्वरोवाध्यतेनलित्स्वरंलित्स्वरएवतुपरत्वाद्विभक्तिस्वरंवाधतेनैषदोषः उदिदमिसेतत्सूत्रंलितीसत्रानुवर्त्ततेतेनलित्स्वरंबाधित्वाविभक्तिस्वरोभवतितृतीयादिग्रहणेनचतृतीयामारभ्यप्राग्दिशःप्रत्ययाविभक्तिसंज्ञागृह्यन्तेकिंस ॥ किमउपसंख्यानमिति उपेससंख्यानंप्रतिपदंसूत्रउच्चारणमित्यर्थः ॥ द्व्यादिषुकिंशब्दस्यपाठेप्रयोजनंकच्चभवांश्चकाविनिसदादीनांयद्यतत्परंतच्छिष्यतइतिकिमःशेषोद्व्यादिभ्यस्तस्याप्राक्पाठेभवतःशेषःस्यात् ॥ ॥ ॥

एतद्दो॥ इह केचिदिमं पठंति केचिदिनं। तत्रोत्तरपाठपक्षेऽपि विचारः क्वायं नकार इति॥ इतकार्याभावा दित्यंत्रायामसत्यां श्रवणेन भाव्यमिति प्रश्नः लोपोऽस्येति॥ नेत्संज्ञा
द्वारेणालोपः किं तर्हि संपादितानेकाल्त्वपरे श्यस्य कृतकार्यत्वाल्लक्षणं तरेणेति भावः क्रियमाणोऽपीति। ननु यावदेतदिस्याने श्यादेशे न प्रवृत्तस्तावत् प्रातिपदिकांतत्वा
भावात् नल्लोपप्रसंगः प्रवृत्तिकाले तनेकाल्त्वात् सिद्धः सर्वादेशः एवं श्यस्य तेस्वरूपेणार्थेनार्थवत्त्वादप्रकृतोऽप्येतदिस्थाने बुद्धिस्थ इति प्रातिपदिकं भवत्येवतनच्छ

= ननु नुबंधानां सर्वनाश्रवणेन किमस्य श्रवणाश्रवणविचारेण … कार्याभावादिति ॥१॥ =

= ननु प्रयोगार्थ्यव्याकरणं तत्र यावत् स्थाने न ज्ञातस्तावत्प्रयोगे नैमित्तिकस्य प्रातिपदिकत्वमत आह … इति ॥२॥ =

एतद्दोन॥ क्वायं नकारः श्रूयते न क्वचित् श्रूयते लोपोऽस्य भवति नलोपः प्रातिपदिकांतस्येति यदि न क्वचित् श्रूयते किमर्थमुच्चार्यते॥ अ
नेकाल्शित्सर्वस्येति सर्वादेशो यथा स्यात् क्रियमाणेऽपि वै नकारे सर्वादेशो न प्राप्नोति। किं कारणं न लोपे कृते एकाल्त्वात्॥ इदमिह संप्रधार्यं न
लोपः क्रियतां। सर्वादेश इति॥ किमत्र कर्तव्यं परत्वान्नलोपः॥ [redacted] असिद्धो नलोपः तस्यासिद्धत्वात् सर्वादेशो भवति॥ प
रिगणितेषु कार्येषु नलोपोऽसिद्धः॥ न चेदं तत्र परिगण्यते। एवं तर्ह्यानुपूर्व्या सिद्धमेतत्॥ नाकृते सर्वादेशे प्रातिपदिकसंज्ञा प्राप्नोति॥
न चाकृतायां प्रातिपदिकसंज्ञायां नलोपः प्राप्नोति॥ तदानुपूर्व्या सिद्धमेतत्॥ ॥ ॥श्री ॥ ॥

नलोपे कृते त्वनेकाल्त्वाभावात् सर्वादेशो न प्राप्नोतीत्यानुपूर्व्या सिद्धमिति परुक्तं स्वरूपेणार्थेनार्थवत्त्वात् प्रातिपदिकमिति तदयुक्तं सर्वत्र स्वरूपप्रतिपत्तिसंभवादर्थवत्
ग्रहणसामर्थ्याद्व्यतिरिक्तवास्यार्थग्रहणार्थं अन्यथा न क्वचिन्नकारस्य श्रवणं स्यात् (वा) नाकृत इति अर्थवतः संज्ञा या विधानात्तस्यान्यथैनार्थवत्त्वमेष्टव्यमित्यर्थः॥ ०॥

बाध्यबाधकभावमनपेक्ष्यैतदुक्तं तदपेक्षायां हि इकारस्य स्थाने सवर्णदीर्घत्वस्यास्य वा [redacted] विशेषो नास्तीति
अकारस्याकारवचनं इति। तदा घत्वं लत्वादेशमन्यते॥ बाध्यबाधकभावमनपेक्ष्यैतदुक्तं तदपेक्षायां हि इकारस्य स्थाने सवर्णदीर्घत्वस्य ... हलिन्यतरस्यामिति हिलप्रत्ययः॥ अ
वक्तव्यं॥ येम इति। एतच्छब्दाकारेण सह परत्वं लित्स्वरश्च बाध्येत॥ योगविभाग इति। अनन्तरबाधनार्थं तत्र रेफादिरनद्यतनेऽहि लन्यतरस्यामिति हिलप्रत्ययः॥ अ

का
नैतदस्ति प्रयोजनं। अल्लोपस्य सविधयो भवन्तीति अकारस्याकारवचने प्रयोजनं नास्तीति कृत्वा अन्तरेण नकारं सवर्णदेशो भविष्यति॥ अस्य
न्यदकारस्य अकारवचने प्रयोजनं। किं येन्ये अकारादेशाः प्राप्नुवन्ति तद्बाधनार्थं। तद्यथा मो राजि समः क्वाविति मकारस्य मकारवचनसा
मर्थ्यात् अनुस्वारादयो न भवन्ति॥ तस्मान्नकारः कर्त्तव्यः न कर्त्तव्यः। क्रियते न्यासएव श्लिष्टनिर्देशो यं अ अ इति सो नेकाल्शित्सर्व
स्येति सर्वादेशो भविष्यति एतद इति योगविभागः कर्त्तव्यः॥ एतदः एत इत् इत्येतावादेशौ भवतः रथोः। ततः अन् अश्च भवति एतद इति। केन
विहिते थकारे एतदः अ आदेश उच्यते। एतदश्च थमुपसंख्यानं कर्त्तव्यं। एतत्थकार मिथ्यं। तर्हि उपसंख्यानं कर्त्तव्यं न कर्त्तव्यं एतत्
ज्ञापयति भवत्यत्र थमुरिति। यदयं थकारादावादेशं शास्ति। कुतो नु खल्वेतत् ज्ञापकाद्भवत्र थमुर्भविष्यति। न पुनरयं एवासाव विशेषविहि
तः थकारादिस्तस्मान्नादेशः स्यात्। इदमो थकारादिं विशेषविष्यामः॥ इदमोयः थकारादिरिति॥ ॥ ॥ ॥
=इदमएवानुज्ञायर्थं विहितो यस्य थकारादि रिह स्मर्यः॥ तथा च सामर्थ्यादितदस्य थमुरिति वचनमनुमीयत इति भावः॥१=

विशेषविहित इति थकारवचने याल्लिति भावः॥ इदमेति। एवं च थमुनाप्याल्लं बाध्यते॥ श्री ॥७॥ ॥ ॥७॥
=नन्वेवमपि थाल्लुकर्तु योगेन आह एवं चेति॥१=

मा०कै०५ पंचम्याः पंचमी निर्देशादिति आदेशपक्षस्य बहुदोषत्वात्प्राप्यमात् पंचम्याश्रयेण प्रत्ययपक्षाश्रयणमित्यर्थः॥ तस्मात्तसतीति पंचमी निर्देशेऽतसेऽक्षेसस्यायमर्थः॥ पं
६७ चम्याः परस्य तसेस्तसिलादेशो भवतीति तसेरिति च निर्देश इकार उच्चारणार्थः॥ ततश्च धातोरपि तसतेः पंचम्याः परस्य तसिलादेशः नादिष्टादेशवत् प्रसज्येतत द्विधानसा

परेष्विति

पंचम्यास्तसिल्॥ सप्तम्यास्त्रल्॥ इदं विचार्यते। इमे तसिलादयो विभक्त्यादेशा वा स्युः कथं वा आदेशाः स्युः कथं वा परे यदि पंचम्या इति षष्ठी तदादेशाः। अ
थ पंचमी ततः परे। कुतः संदेहः। समानो निर्देशः। कश्चात्र विशेषः। तसिलादयो विभक्त्यादेशाश्चेत्तस्य लुक् स्वरगुणदीर्घत्वैत्वौत्वस्मादादिविधि
प्रतिषेधः। तसिलादयो विभक्त्यादेशाश्चेत्तस्य लुक् स्वरगुणदीर्घत्वैत्वौत्वस्मादादिविधीनां प्रतिषेधो वक्तव्यः॥ स्य लुक्। ततस्सोयतस्त्सः तत्र
सः यत्रसः सुपो धातुप्रातिपदिकयोरिति सुब्लुक् प्राप्नोति। स्य लुक्। स्वरः यदा दा अनुदात्तौ सुप्पिताविति स्वरः प्राप्नोति। स्वरगुणः कस्मा
त् कुतः। घेर्ङितीति गुणः प्राप्नोति। गुण। दीर्घत्वमिंस्त्रहि अतो दीर्घो यञि सुपि चेति दीर्घत्वं प्राप्नोति। दीर्घ। एत्व तेषु तत्र। बहुवचने झल्येदिति
एत्वं प्राप्नोति। एत्व औत्व स्मिन् कुत्र इदुद्भ्यामौत् अच्च घेरिति औत्वं प्राप्नोति। औत्व स्मादादिविधिः। तस्मात्तत्र तस्मिंस्तत्र। इ. सिर्ड्योस्मात्स्मि
न्नाविति स्मादादयः प्राप्नुवंति। पंचमीनिर्देशात्सिद्धं। संतु परे यदि परे समानशब्दानां प्रतिषेधो वक्तव्यः। तस्मात्तसतिति [redacted] यस्मान्न
सतिति पंचम्यंतात्परस्य तसेस्तसिल्भवतीति तसिल् प्राप्नोति। अनादेशे स्वार्थविज्ञानात्समानशब्दप्रतिषेधः। अनादेशे स्वार्थवि[redacted]ज्ञानात्समा
नशब्दानामप्रतिषेधः [redacted] अनर्थकः प्रतिषेधोऽप्रतिषेधः। तसिल् कस्मान्न भवति स्वार्थविज्ञानात्पंचम्यंतात्पर

र्थ

मर्थाच्चाप्रत्ययत्वेऽपि लित्स्वरप्रसंगः आदेशपक्षे तु नायं दोषः अपादाने चाहीयरुहोरिति आद्यादेशपक्षाश्रयणं ततश्च पंचम्याः स्थाने यस्तसिस्तस्य तसिल्विधानाद्धातोः
प्रसंगाभावः स्वार्थे वर्तमानस्येति पंचम्यंतप्रकृत्यर्थ इत्यर्थः॥ इह स्वार्थिकैः साहचर्यात् तसिलादेशोऽपि स्वार्थिको विज्ञायते। यदि च स्वार्थिकस्तस्य स्थाने भवति ततः स्वार्थिको ॥ एम०
९ भवति। अपवाते सेरितीकारो विवक्षितो न तूच्चारणार्थः॥ ॥ ॥ ६७

=पंचम्या ... आर्थिकस्य स्थाने। अपादाने चाहीयरुहोरिसनेनविहितस्य स्थाने।२=

विधि॰

तसेश्चास्वरार्थमिति। ननु सदा घता [redacted] र्थमपि तसिल्वचनं न च विभक्त्यादेशपक्षाश्रये णास्वरादिसिद्धिरादेशपक्षस्य सदोषत्वात्परित्यागात्। एवं तर्हि स्थान्यादेश भावः किमर्थमाश्रितः तसिश्चेति प्रत्यय एव परत्वात्तसे र्वाधकस्तसिलो बाधकः कर्तव्यः। तस्य च विभक्तिसंज्ञकत्वात्तसादिविधिः सिध्यतीत्याशंक्यास्वरार्थमित्युक्तं॥

× तत्रदीर्घायुः ४७ =तसिलः परत्वाद्बाधकः इत्यन्वयः १८=

तसेश्च। किमर्थं तसेस्तसिलुच्यते। तसेस्तसिल्वचनं स्वरार्थं। तसेस्तसिल्वचनं क्रियते स्वरार्थं। लितिप्रत्ययात्पूर्वमुदात्तं भवतीति एष स्वरो यथा स्यात्। ननु चायं तसिल् तसिं बाधिष्यते॥ न सिध्यति। परत्वात्तसिः प्राप्नोति। तसिलोऽवकाशः। ततो हीयते। ततोऽवरोहति तसेरवकाशः। ग्रामतआगच्छति नगरतआगच्छति इहोभयं प्राप्नोति। ततआगच्छति यतआगच्छतीति परत्वात्तसिः प्राप्नोति। तस्मात्तसुच्यते तसेस्तसिल्वचनं स्वरार्थमिति। पर्यभिभ्यां च। पर्यभिभ्यां सर्वोभयार्थे। पर्यभिभ्यां चेति यदुच्यते तत्सर्वोभयार्थे द्रष्टव्यं॥ यावत्सर्वतः। तावत्परितः। यावदुभयतः तावदभितः। इतराभ्योऽपि दृश्यन्ते। इह कस्मान्न भवति। एः तौते। भवदादिभिर्योग इति वक्तव्यं। के पुनर्भवदादयः। भवान्दीर्घायुर्देवानांप्रिय आयुष्मानिति। स भवान्। तत्रभवान्। ततो भवान्। तं भवंतं तत्रभवंतं ततो भवंतं तेन भवता तत्रभवता ततो भवता तस्मै भवते तत्रभवते ततो भवते भवतः तस्माद्भवतः तत्र भवतः ततो भवतः। तस्मिन्भवति तत्र भवति ततो भवति। स दीर्घायुः ततो दीर्घायुः। तं दीर्घायुषं तत्र दीर्घायुषं ततो दीर्घायुषं। स देवानांप्रियः। तत्र देवानांप्रियः। ततो देवानांप्रियः। तं देवानांप्रियं। तत्र देवानांप्रियं तं देवानांप्रियं। स आयुष्मान् तत्रायुष्मान् तत आयुष्मान् तमायुष्मंतं तत्रायुष्मंतं तत आयुष्मंतं।

अधुना। अधुनेति किं निपात्यते इदमो भावो धुना च प्रत्ययः इदमो वा लोपः अधुना च प्रत्ययः अस्मिन्काले अधुना दानीं च॥ इदानीमिति दानीमस्तु तीयादि विभक्ति रुदात्ता भवतीत्येष स्वरः प्राप्नोति। दानीमिति निपातनात्स्वरसिद्धिः। दानीमिति निपातनात्स्वरसिद्धिर्भविष्यति आद्युदात्तं निपातनं करिष्यते। स निपातनस्वरः विभक्तिस्वरस्य बाधको भविष्यति। उक्तं वा किमुक्तं। आदौ सिद्धमिति॥ ॥ ॥

दानीम्। केचिद्दानीमिति सूत्रं पठंति अन्ये तु दानीं चेति। एष स्वर इति अलोंत्यस्येति वचनादंत्यस्योदात्तत्वं प्राप्नोति आदौ सिद्धमिति आदेः परस्येति वचनात्॥ ॥

= तयोर्गयोरित्यर्थे हि-चश दास्नयोरध विहितौ प्रत्ययौ स्यातां नमोः प्रातिपदिकयोः इत्यर्थे तु यथाक्रमेण ताभ्यां प्रातिपदिकाभ्यां यथाविहितं प्रत्ययाभ्यां लक्षणे इति शेषः ॥ २ ॥ = तानीत्तरोदरोवेल नमोः ॥ = ॥

मा० कै० ५
६८

तदोदावचनमिति । सूत्रकारेण तदाप्रत्ययः कृत इत्याह । स्वरे च विशेषः अदाप्रत्यये तदा शब्द आद्युदात्तो भवति दाप्रत्यये त्वन्तोदात्तः तयोः योगयोर्वेति तत्र पूर्वयोर्योगयोर्वि
षये दा र्हिलौ भवतः चशदा योगद्वयविहितौ प्रत्ययाविति सूत्रार्थः स्यात् तत्र यथासंख्यमाश्रीयते तत इदमः छंद सि इदा स्वमेवस्यात् नत्वधुना एतर्हीति विशेषविहिता
भ्यां दादानीभ्यां र्हिलधुना प्रत्यययोर्बाधप्रसंगात् तत्र दस्तु तदानी तदा तर्हीति रूपत्रयं सिद्धमेव अयथापि यथासंख्यानाश्रयणादिदमो र्हिल्विधीयते तथाप्यधुनेति छं

× यश्चाहनि समानस्य सभावो × २ × इदानीमिति रूप × २

तदो दा च । तदो दावचनमर्थकं विहितत्वात् । तदो दावचनमनर्थकं किं कारणं विहितत्वात् ॥ विहितो त्र दा प्रत्ययः ॥ सर्वैकान्यकिंयत्तदः काले दा इति । तयोर्दा
र्हिलौ च छंदसि । तयोरिति प्रातिपदिकनिर्देशो द्रष्टव्यः । द्वेष्यं विजानीयात् योगयोर्वा प्रत्यययोर्वेति तदाचार्यः सुहृद्भूत्वा न्वाचष्टे तयोरिति प्रातिपदिक
निर्देश इति ॥ सद्यः परुत्परारि ॥ सद्य इति किं निपात्यते समानस्य सभावो निपात्यते द्यश्च प्रत्ययः अहन्यभिधेये । समाने अहनि सद्यः परुत्परारी
ति किं निपात्यते ॥ पूर्वपूर्वतरयोः परभावः उदारी च संवत्सरे ॥ पूर्वपूर्वतरयोः परभावो निपात्यते । उदारी च प्रत्ययौ संवत्सरेऽभिधेये ॥ पूर्वस्मिन्संवत्सरे
परुत् ॥ पूर्वतरे संवत्सरे परारि ॥ ऐषम इति किं निपात्यते ॥ इदमः समसण् ॥ इदमः समसण् प्रत्ययो निपात्यते ॥ संवत्सरेऽभिधेये ॥ अस्मिन्संवत्सरे ऐषमः परे द्यवीति किं निपा
[redacted] सते ॥ परस्मादेद्यव्यहनि प
रस्मादेद्यवि प्रत्ययो निपात्यते ॥ अहन्यभिधेये । परस्मिन्नहनि परेद्यवि ॥ अद्येति किं निपात्यते ॥ इद मोऽश्भावो द्यश्च । इदमोऽशभावो निपात्यते द्यश्च प्रत्य
योऽहन्यभिधेये । अस्मिन्नहनि अद्य पूर्वेद्युः अन्येद्युः अन्यतरेद्युः इतरेद्युः परेद्युः अधरेद्युः उभयेद्युः उत्तरेद्युः इति । किं निपात्यते ॥ पूर्वान्यान्यतरेतरापराधरोभयोत्त
रेभ्य एद्युस्सुच् ॥ [redacted] × अन्यतरस्मिन्नहनि अन्यतरेद्युः इतरस्मिन्नहनीतरेद्युः × पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य ए
द्युस्सुच् प्रत्ययो निपात्यते ॥ अहन्यभिधेये । पूर्वस्मिन्नहनि पूर्वेद्युः । अन्यस्मिन्नहनि अन्येद्युः अपरस्मिन्नहनि अपरेद्युः । अधरस्मिन्नहनि अधरेद्युः उत्तर

गाप०
६८

दसि नस्यादेवं अयं तयोरिति प्रत्ययपराम र्शस्तयोः पूर्वसूत्रविहितयो र्विषये दा र्हिलौ भवतः तदानीं तर्ह्यान्तरे एव दा र्हिलौ स्यातामिति इदम इदा इति न सिध्येत् प्रातिपदिकपरामर्शे तु ॥
॥ ७ ॥ ॥ ७ ॥ ॥
चकारेण यथा प्राप्तमनुज्ञानेन कश्चिद्दोषः ॥ ॥ श्री

=न च दिशि पूर्वादयः शब्दाः देशकालयोस्त्ववर्तन्ते इति देशकालयोः कथं दिक्शब्दत्वेन व्यवहार इति [illegible] आर्थिकत्वेन [illegible]॥४=

×देशकालयोरपि×२

दिक्शब्देभ्यः दिशां शब्दाः दिक्शब्दा ये रूढ्या दिशो वाचकाः पूर्वादयस्ते गृह्यन्ते। न त्वैन्द्र्यादयो योगिकाः तत्र दिश उपलक्षणत्वेनोपादानादिहापि प्राप्नोति पूर्वस्मिन्ग्रामे वसतीति। अत्र हि देशसंबंधात् कालसंबंधाद्वा पूर्वशब्दो गुणैर्वर्त्तते तदर्थविशेषणोपादानं दिग्देशकालेष्विति विभक्तीनामुपाधीनां च साम्येपि यथासंख्याभावस्तदर्थं स्वरितत्वात्प्रतिज्ञानात् तत्र यथा पूर्वादयः स्वभावात् दिशि वर्त्तन्ते तथा देशकाले वर्त्तमाना दिशं नापेक्षन्ते तेन यादेशेपि दिगनपेक्षाः यद्यपि भिन्नार्थवृत्तित्वात् भिन्ना एव पूर्वादयो दिग्देशकालेषु तथापि तत्स्वपदेशनिबंधनसादृश्यप्रायो दिक्शब्देभ्य इति व्यपदेशः अनिर्दिष्टार्थत्वाच्च स्वार्थेत्र यं प्रत्ययः एवं स्थिते चोदकः पृच्छति। इह कस्मान्न भवति पूर्वस्मिन्देशे वसतीति पूर्वशब्दस्य दिक्शब्दत्वाद्देशवृत्तित्वाच्च प्रसंगः॥ आचार्य आह नैष देशः देशविशेषणमेतदिति अयमर्थः॥ विशेषणविशेष्ययोः कारणत्वं जवनत्कामचारा ग्रहः पूर्वोर्थो विशेष्यत्वेन मक्रम्यते देशो विशेषणत्वेन ततः प्रत्ययो भवति यत्र तु विशेष्यं प्राधान्यादि

दिक्शब्देभ्यः सप्तमीपंचमी[redacted] इह कस्मान्न भवति॥ पूर्वस्मिन्देशे वसतीति नैष देशः विशेषणमेतत्॥ ॥

शः दे

शेषणमंतर्भावयितुं शक्नोति सप्तपिच्चांतर्भावे दिग्देशकालानां विशेषणं तर्भावाद्विशेषाभिव्यक्तये देशादिशब्दप्रयोगो भवति पुरस्तादिप्राः अग्रागतो देशकालाद्देति यदा तु देशो विशेष्यत्वेन प्रक्रम्यते पूर्वोर्थो विशेषणत्वेन तदा प्रत्ययाभावः॥ दिग्देशकालेष्विसनेनह्युपाधिभावो दिग्देशीनां समर्थितो न तु प्राधान्येनापि वृत्तौ गुणः प्रधानमंतर्भावयितुं शक्नोति। नैष देश इति नैष पूर्वोर्थो देशेन विशेष्यत इत्यर्थः। यो हि देशेणी विशेष्यमाणो देशो भवति ततः प्रत्ययो न तु विशेषणादित्यर्थः॥ अन्ये त्वाहुः अवध्यपेक्षार्थाभिधायिभ्यः पूर्वादिभ्यः प्रत्ययेन भवितव्यं इह तु पूर्वे देशे अवधिनिरपेक्ष एव पूर्वशब्दः प्रयुज्यते तथा हि पूर्वे देशाद्दक्षिणापथं गच्छन्कुतश्चागतस्त्वमिति पृष्टः पूर्वदेशादागतोहमिति प्रतिवक्ति प्रत्यागच्छंश्च दक्षिणापथादिति तत्र नैष देश इत्ययमर्थो नायमवधिमत्त्वेन देश उपात्तः किं तर्हि अवधिनिरपेक्ष देशस्तद्विशेषणं वास्तवी तु व्यवस्था विद्यत इति सर्वानामसंज्ञाप्रवर्त्तत एव॥

॥ ॥ ॥

=इत्यादि विशेषेणांतर्भूतो विशेष्यादभिव्यक्तये विशेष्यमाणः।२=

भा०कै०५ दक्षिणाश्चाकृसंतर इति अन्यादिगाकृतिरन्या व्यवस्थाकृतिरिति भावः॥ दिशिवर्तमानाः पूर्वादयो निमित्तं ता निरपेक्षाः देशकालयोस्तु व्यवस्थापेक्षाः यदि पुनरिति॥ स
६२ र्वत्र व्यवस्थाशब्दाः संतीति भावः व्यवस्थामर्यादेति केचिदाहुः॥ एवं तु उत्तराः कुरव इति संज्ञायां मर्यादानपेक्षणात् कुरूनुत्तरेण प्यासीनानामुत्तराः कुरव इति प्रयोगा
द्व्यवस्थाभावात् संज्ञायामिति प्रतिषेधानर्थक्यप्रसंगात् यावद्द्रव्यमनपायो व्यवस्थे परे मन्यंते दक्षिणा गाथका इति सत्स्वेव गाथकेषु प्रावीण्यलक्षणस्य दक्षिणस्य

दक्षिणोत्तराभ्यामतसुच्॥ किमर्थमतसुच् क्रियते न तसिरेव क्रियेत॥ तत्रायमप्यर्थः स्वरार्थश्चकारो न कर्तव्यो भवति॥ प्रत्ययस्वरेणैव सिद्धं॥ का रूपसिद्धिः दक्षिणतो ग्रामस्य उत्तरतो ग्रामस्य दक्षिणोत्तरशब्दावकारांतौ तस्य शब्दः प्रत्ययः भवेति सिद्धं परा अकारांतौ यदा तु खल्वा सिध्यति। तदापि सिद्धं। कथं पुंवद्भावेन। कथं पुंवद्भावः। तसिलादिष्वाकृत्वसुच इति। न सिध्यति॥ भाषितपुंस्कस्य पुंवद्भावः॥ न चैतौ भाषितपुंस्कौ दक्षिणोत्तरेति दिक्शब्दौ दक्षिण उत्तर इति व्यवस्थाशब्दौ। यदि पुनर्दिक्शब्दा अपि व्यवस्थाशब्दाः स्युः॥ ॥ ॥

ननु च भोः दक्षिणशब्दः उत्तरशब्दश्च पुंसि भाष्येते समानायामाकृतौ यद्भाषितपुंस्कमित्युच्यते आकृत्यंतरे चैतौ भाषितपुंस्कौ

कादाचित्कत्वात् व्यवस्थाभावो दिग्देशकालसंज्ञास्तु व्यवस्थासद्भावः मर्यादालक्षणा व्यवस्था वादिन उत्तराः कुरव इत्यत्रापि मेरुं जंबुद्वीपं वापेक्ष्योत्तरत्वविज्ञा राम०
नयोगकाले निरूढत्वाद्व्यवहारप्रयोगस्य भिरनपेक्ष्यमाणापि वस्तुतो व्यवस्थास्तीति मन्यंते अन्ये तु परस्परापेक्षात्मस्थितिर्व्यवस्थेत्याहुः॥ ॥ ॥ ६९

=यथा यावत्तु मेरुस्थितिस्तावत्पूर्वादिव्यवहारो यावत्पूर्वादिस्थितिस्तावत्तु मेरुव्यवहारः।१=

=प्रवृत्तिनिमित्तताभावात्॥१॥=प्रवृत्तिनिमित्तविशेष्यभूतस्यापीत्यर्थः॥ एवंच विशेष्यतया दिग्बोधकत्वादत्तमपि विहाय एतत्

कथं पानीति दिक्छब्देभ्यः सप्तमी सा दिग्विहिता नियमवस्था शब्दत्वे हि दिशा उपलक्षणत्वं न स्यात् तस्या निमित्तत्वाभावादिति भावः॥ दिशोपरेति निमित्तवत्तोप्यर्थस्योपलक्षणत्वा न्याय्यात्त संख्याशब्दानां कालवृत्तत्वयः कालशब्दत्वात् कालाधिकारविहितप्रत्ययभाजः षष्टिवर्षाणि भूतः षाष्टिक इति भावः॥ एतत्प्रक्षाशब्दे येति प्रसंगमाह। यदि तर्हीति रमणीयादयो गुणक्रियानिमित्ता दिशि वर्त्तमाना दिक्शब्देनाप्यपदिश्येरन्नित्यर्थः॥ दिशं यो न व्यभिचरतीति व्यवस्थानिमित्तो यो न भवति स भावत एव यो दिशि वर्त्तत इत्यर्थः॥ दिशि दृष्ट इत्यर्थप्रदर्शनं दिशां शब्द इति तु षष्ठीसमासः॥ स्वरूपव्याति रिक्तप्रवृत्तिनिमित्तनिरपेक्षो दिशो यो वाचकः पूर्वादि शब्दः स दिक्शब्द

=स्वप्रवृत्तिनिमित्तरूपेण दिग्येन न मिधायेपि विशेष्यतया दिग्वृत्तव्यवस्थावस्यंतीत्यर्थः॥१॥=तत्कर्मदिदिष्ठाधारणधर्मोदिविशादिस्वयतिदिक्वाचकानिरूपप्रवृत्तिनिमित्तनिरपेक्ष

कथं यानि दिग्गुपदिष्टानि कार्याणि दिशोपदाव्यवस्थां वक्ष्यंति॥ यदि तर्हि यो दिशि वर्त्तते स दिक्शब्दः रमणीयादिष्वतिप्रसंगो भवति॥ रमणीया दिक्॥ शोभना दिगिति॥ अयमतमेतत् दिशि दृष्टः दिग्दृष्टः दिग्दृष्टः शब्दो दिक्शब्द इति दिशं यो न व्यभिचरति। न रमणीयादिष्वतिप्रसंगो भवति॥ पुंवद्भावस्तु न प्राप्नोति॥ एवं तर्हि सर्वनाम्नो वृत्तिमात्रे पुंवद्भावो वक्तव्यः॥ ॥ ॥

क्व आश्रीयते शब्दग्रहणादस्य पादिक इत्येव ब्रूयादित्यर्थः॥ यद्येवं दिशः पूर्वादीनि नामधेयानीत्यसंज्ञायामिति सर्वनामसंज्ञानिषेधात् एवं सप्तादशिवसतीत्यादिन सिध्य तिपौह केयसंज्ञाश्रयणादिह च तदभावाद्दोषः॥ पुंवद्भावस्त्विति दिशि वर्त्तमानानां प्रवृत्तिनिमित्तानपेक्षणात् समानाधिकरणे भाषितपुंस्कत्वाभावात्॥ सर्वनाम्न इति। यद्यपि दिशि वर्त्तमानानां व्यवस्थान प्रवृत्तिनिमित्तं तथापि वास्तवी व्यवस्था विद्यत इति सर्वनामसंज्ञायाः प्रवर्त्तनात्। तदेवं व्यवस्थायामिति विषयो निर्दिश्यते न तु प्रवृत्तिनिमित्तं सर्वनाम्न इत्येतच्चावश्यकर्त्तव्यमित्याह॥ ॥ ॥

भा० कै० ५ दक्षिणोत्तरपूर्वाणामिति। अयं समानाकृतित्वान्न पेक्षः पुंवत् भावः। दिग्वाचिनां त्वयं द्वंद्वः। वृत्तिमात्र इति तद्धितवृत्तिः समासश्च ततो ग्रामादिति। अन्यारादियोगे पंचमी।
७०
=अत्र वदंति एवं हि षष्ठी न स्यात् तदितिपाठादिष्टसिद्धिः स्यादिसकर्तव्यः स्पष्टार्थश्च तत इति वस्तुनो विशेषणार्थं तर्हीति भाष्यमुपलक्षणं अकारो द्वारेण चतुर्दश द्वारेप्यतस्तु पुरा देशश्चानुमीयते तेन परमाणितामितइतः पुरतश्च पश्चादित्यादि सिद्धिसाधुः २=

दक्षिणोत्तरपूर्वाणामित्येवमर्थं। विशेषणार्थं तर्हि। कृविशेषणार्थे नार्थः। षष्ठ्यतसर्थप्रत्ययेनेति षष्ठी न सर्थप्रत्ययेनेत्युच्यमाने
इहापि स्यात्॥ ततो ग्रामाय ततो ग्रामादिति। उपर्युपरिष्टात्॥ उपर्युपरिष्टादिति किं निपात्यते। ऊर्ध्वस्योपभावो रिलिष्टातिल्लौ च॥ ऊ
र्ध्वस्य उपभावो रिल्रिष्टातिलौ च प्रत्ययौ निपात्येते। उपरि उपरिष्टात्॥ पश्चात् पश्चादिति किं निपात्यते। अपरस्य पश्चभाव आतिश्च
प्रत्ययः॥ अपरस्य पश्चभावो निपात्यते॥ आति श्च प्रत्ययः॥ पश्चात् दिक्पूर्वपदस्य च दिक्पूर्वपदस्यापरस्य पश्च भावो वक्तव्यः आ
तिश्च प्रत्ययः दक्षिणपश्चात् उत्तरपश्चात्॥ अर्द्धोत्तरपदस्य च समासे अर्द्धोत्तरपदस्य च समासे अपरस्य पश्चभावो वक्तव्यः॥ दक्षि
णपश्चार्द्धः उत्तरपश्चार्द्धः [redacted] अर्द्धे च॥ अर्द्धे च परतः अपरस्य पश्चभावो वक्तव्यः॥ पश्चार्द्धः एनबन्यतरस्यां॥ अ
पंचम्या इति प्रागसेः अपंचम्या इति यदुच्यते प्रागसेस्तत् द्रष्टव्यं॥ द्रष्टव्यं विजानीयात् अविशेषेण इत उत्तरं अपंचम्या इति तदाचा
र्यः स्त्रहृदूत्वा न्वाचष्टे अपंचम्या इति प्रागसइति॥ दक्षिणादाच्। किमर्थश्चकारः स्वरार्थः चितोंत उदात्तो भवतीति अंतोदात्तत्वं प
था स्यात्॥ नैतदस्ति प्रयोजनं एकाजयं तत्र नार्थः स्वरार्थेन चकारेणानुबंधेन प्रत्ययस्वरेणैव सिद्धं। विशेषणार्थस्तर्हि। कृवि
१ शेषणार्थे नार्थः अन्यारादितरर्ते दिक्शब्दांचूत्तरपदाजाहियुक्ते॥ ॥ ॥
वधित्वा षष्ठीस्याद्यतो ग्रामस्यापादानत्वं तत्वोपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायादप्रसंगः षष्ठ्याः दक्षिणादाच्॥ विशेषणार्थे इति॥ वाक्यस्मर एम०
१ णायोर्य आकारो न नुबंधकस्तद्वादन्नय इत्यर्थः॥ ७०

संख्या। यदा विधाशब्दः स्त्रीलिंग उपादीयते तदा तस्याने कार्थत्वात् निष्ठेऽपि विषये प्रसंगः॥ यदा तु विधानं विध इति घञन्तं एक विधानमिति के कृते पुल्लिंगनिर्देशः तदा तस्यैकार्थत्वान्नातिप्रसंगः विधाया अर्थ इत्याचार्यदेशीयवचनं गो विधे ति अन्ने विधोच्यते कः पुनरिति। किं धातुकृतो योऽर्थो धात्वर्थ इति कारकं विवक्षितं अथवा धातोरर्थो धात्वर्थः क्रियाविवक्षितेति प्रश्नः॥ कल्प इति। कल्पमहर्मुखमुच्यते। कालपृथक्भावात् पृथक्भावं मन्यते। कारकाणामिति पूर्वे पदार्थविषये एव प्रश्नप्रतिवचने पृथक्भावस्याकृतानत्वाद्विषयप्रश्नायो गात् तत्र पंचधा गच्छतीत्येकस्यागमनक्रियायाः शब्देनानिवृत्तभेदायाः प्रकारलक्षणपृथक्भावप्रतिपत्तिः॥ यद्येवमिति सूत्रन्यासेनैव सिद्धेर्वार्त्तिकं नारंभणीयमिति सर्वः॥ तथा हि॥ सामान्यस्य भेदको विशेषः प्रकार उच्यते। नच गुणकालकारकपृथक्त्वे किंचित्सामान्यमुपात्तं यस्य प्र

संख्याया विधार्थे धा विधार्थ इत्युच्यते॥ को विधार्थो नाम विधाया अर्थो विधार्थः॥ यद्येवं एकोऽगो विधा। एका हस्तिविधा अत्रापि प्राप्नोति। एवं तर्हि धा विधानं धात्वर्थपृथग्भावे धा विधाने धात्वर्थे [redacted] पृथग्भाव इति वक्तव्यं॥ कः पुनर्धात्वर्थपृथग्भावः किं यत्तदेवदत्तः कंसपात्र्यां पाणिना ओदनं भुंक्त इति नेत्याह॥ कारकपृथक्त्वमेतत्॥ यत्तर्हि तत्कल्पे भुंक्ते सायं भुंक्त इति नेत्याह। कालपृथक्त्वमेतत्। यत्तर्हि शीतं भुंक्ते उष्णं भुंक्त इति। नेत्याह॥ गुणपृथक्त्वमेतत्॥ कस्तर्हि धात्वर्थपृथग्भावः। कारकाणां प्रवृत्तिविशेषः क्रिया। यद्येवं क्रियाप्रकारेयं भवति विधयुक्तगतात्प्रकारे भवंति। एवंविधं

=भेदको विशेष इत्युक्तः प्रभवति ।२= अस्तीति योग्यक्रियोपलक्षणमेतत्. एवं च सत्येष्वन्नविधानस्यास्याभावात् क्रियाविषयः प्रकारो गम्यत इति तात्पर्यं ।२=

कारः स्यात्॥ ननु सूत्रन्यासे पंचधा श्लोका इत्यादावपि प्रसंगः पुनर्भाष्यं वार्त्तिकन्यासे तु न भाव्यमेकधा भुंक्त इति च पृथक्भावाभावात् प्रत्ययस्य न प्रसंग इति भिन्नं फलं सूत्रवार्त्तिकयोः नैष दोषः पंचधा श्लोका इत्यादौ क्रियापदप्रयोगेऽप्यस्तीति क्रियापदानुषंगादस्ति क्रियापृथक्भावः॥ एकधा भुंक्त इत्यादावनेकप्रकारभुजिक्रियापेक्षया एकप्रकारस्य भुजेरस्त्येव पृथक्भावः एकः पाक इत्यादौ प्रकारस्याविवक्षितत्वात् प्रत्ययाभावः प्रकारविवक्षायां तु भवत्येव एकधा पाक इति पंच पाका इत्यादौ भिन्ना एव पाका न त्वेकस्य प्रकारवत्त्वं विवक्षितमिति प्रत्ययो न भवति पंचधा पाक इत्यादौ तु भवत्येव॥

॥ ॥ ॥ ॥

भा०वै०५ एकाद्धो॥ धाग्रहणेनुवर्तमाने पुनर्धाग्रहणं धामात्रस्यादेशार्थम् अन्यथानंतर्यादधिकरणविचाल एव ध्यमुञ् विज्ञायेत। ततश्च विधार्थे न स्यादैकध्यं भुंक्त इति।

७१ सहभाव इति॥ अनेकस्यार्थस्यैकीकरणं सहभावः इहाधिकरणविचाल एकस्य द्रव्यस्य विभागेनावस्थापनं यथा एकं राशिं पंचधा कुर्विति ऐकध्यं राशिं कुर्वित्यत्र

त्वेकस्य विभागावस्थापनोस्य अधिकरणविचाल इति मन्यते। वचनं तु विधार्थमेव स्याद्धाग्रहणं तु ... र्थे यो ध्यमुञर्थे द्वैधं भुंक्ते एकं राशिं द्वैधं कुर्विति॥ नचा

भावात्।

=द्वित्र्योश्च धमुञित्यादेः द्विविधस्यापि अर्थस्यासंभवात्।=

एकाद्धो ध्यमुञ्॥ सहभावे ध्यमुञ्॥ सहभावे ध्यमुञ् वक्तव्यः। ऐकध्यं राशिं कुरु। स तर्हि वक्तव्यो
न वक्तव्यः अधिकरणविचाल इत्युच्यते॥ न चावश्यं स एवाधिकरणविचालः यदेकमनेकं क्रिय
ते। यदप्यनेकमेकं क्रियते सोप्यधिकरणविचालः॥ द्वित्र्योश्च धमुञ्। धमुञन्तात्स्वार्थे डदर्शनं॥
धमुञन्तात्स्वार्थे डो दृश्यते स च विधेयः। पथि द्वैधानि संशये द्वैधानि॥ ॥ ॥:

मनेकस्य

वश्यमिति। अधिकरणं द्रव्यमुच्यते। तस्य विचालोन्यथाकरणं तच्चैकस्यानेकीकरणं एकीकरणमिति सूत्रेणैवेष्टसिद्धिरित्यर्थः॥ अनेकस्य पदेकीकरणं

तत्र प्रकाराभावात्तदर्थमेवाधिकरणविचाले इति सूत्रमेकस्यानेकीकरणे प्रकारस्यापि संभवात् पूर्वेणैव सिद्धत्वादित्याहुः॥ द्वित्र्योः। पथि द्वैधानीति स्वा एम०

र्थिकत्वेपि स्वभावात् लवाचित्वात् द्वित्वसंख्यायोगास्तत्रैकशेषेण बहुवचनं क्वचित्तु मतिद्वैधानीति पाठः॥ ॥ ॥ ७१

पाप्ये॥ याप्यशब्दोयमस्यपादानसाधनोयापयितारमस्मादणइति याप्यः कुत्सितः। अस्तिकर्मसाधनोयापयितव्योयाप्यःदेशांतरंप्रापयितव्यइत्यर्थः॥ तत्रविशे
षानुपादानादर्तिप्रसंगंमत्वाहपाशपीति॥ तद्धुणइति। कुत्सितत्वेनप्रतिपाद्यइत्यर्थः॥ एतच्चांतरंगत्वाच्च प्यतेप्रवृत्तिनिमित्तस्यप्रत्यासन्नत्वात्कुत्साश्रयणस्य

याप्येपाशप॥ पाशपिकुत्सितग्रहणंकर्त्तव्यं। वैय्याकरणपाशः। याज्ञिकपाशः। योह्यपयितव्योयाप्यस्तत्रमाभूदिति॥
अथवैय्याकरणः॥ शरीरेणाकृशः। व्याकरणेनचशोभनः कर्त्तव्योवैयाकरणपाशइतिनकर्त्तव्यः॥ कथंयस्यभावाद्द्रव्ये
=तदभिधानद्रव्यस्यविव= शब्दनिवेशस्तदभिधानेतद्धुणोवक्तव्येप्रत्ययेनभवितव्यंनचकार्श्यस्यभावात् द्रव्येवैयाकरणशब्दः॥ पूरणाद्भागेती
=क्षतद्गुणवक्तव्येइति= यादन्॥ पूरणग्रहणंशक्यमकर्त्तुं। नह्यपूरणस्त्रीयशब्दोस्तियत्रदोषःस्यात्। ननुचायमस्तिमुखतीयःपार्श्वतीय
यइति। अर्थवद्ग्रहणेनानर्थकस्येतिएवमस्यनभविष्यति॥ उत्तरार्थंतर्हिपूरणग्रहणंकर्त्तव्यं॥ प्रागेकादशभ्यो
॥छंदसीतिपूरणाद्यथास्यात्॥ ॥ ॥

=जातोकुत्साप्रसंगवात्=
न्याप्यत्वात्॥ यत्रतुप्रवृत्तिनिमित्तस्यकुत्सानैवसंभवत्यश्वकोदेवदत्तकःसकइत्यादौतत्रसहचरितगुणक्रियाकुत्साश्रयेणप्रत्ययोभवत्येवएवंचदेव
॥दत्तयाशइत्याद्यपिभवतियद्यभिधानमस्ति॥ ॥ ॥७॥ ॥

=यदि तु सिद्धं विशयादिर्द्विवचनानेशः सपरं स्यात् वनकर्त्तव्यता यां नकश्चिद्विशेषः स्यात् २=

भा०कै०५ ७२ एकादा॥ एकशब्दात्किनिची ति॥ एकशब्दः संख्यावाच्येवेति मन्यते। असहायग्रहणं चेतरथ्येसविशेषणात्तात् नामिधेयनिर्देशो विद्यमानतुल्यजातीयैककार्यसहायार्थ-
वाचिनः प्रत्ययो यथा स्यादेकस्मात्काशमिसाहो मा भूदिति॥ कथं पुनर्द्विबहुष्वर्थे प्रत्ययो विधीयते नन्वेकशब्दो द्विबहुष्वर्थो वर्त्तत इत्याह॥ सिद्धं त्विति॥ संख्यैवादेशः संख्यादे

× यः। एकरूजानि-एकाः ६

एकादाकिनि। एकादाकिनिच्चिद्विबहुष्वर्थे प्रत्ययविधानं। एकादाकिनिचिद्विबहुष्वर्थे प्रत्ययो विधेयः। एकाकिनौ एकाकिन इति। किं पुनः
कारणं न सिध्यति। एकशब्दोयं संख्यापदं। संख्यया च असंख्येयमिसर्थे। सिद्धं तु संख्यादेशावचनात्। सिद्धमेतत्कथं द्विबहुष्वर्थायाः संख्यायाः
एकशब्द आदेशो वक्तव्यः। असहायस्य वा। असहायस्य वा एकशब्द आदेशो वक्तव्यः। असहायः एकाकी। असहायौ एकाकिनौ। अ-
सहाया एकाकिनः। सिध्यति सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं एकादाकिनिच्चिद्विबहुष्वर्थे प्रत्ययविधानमिति॥ नैष दोषः
। अयमेकशब्दः अस्त्येव संख्यापदं। तद्यथा एकः द्वौ बहव इति। अस्त्यन्यार्थे वर्त्तते। तद्यथा। सधमादो द्युम्न्य एकास्ताः। अन्या इत्यर्थः
॥ अस्त्यसहायवाची॥ तद्यथा एकाकिभिः क्षुद्रकैर्जितमिति। तद्योऽसहायवाची तस्यैष प्रयोगः॥ ॥ इति श्री भगवत्प-
तंजलिविरचिते श्री व्याकरणमहाभाष्ये पंचमस्याध्यायस्य तृतीये पादे प्रथममाह्निकं॥ ॥ श्री ॥

शः सच द्विबहुशब्दयोरसहायस्यैवेत्यर्थः॥ द्विबहुशब्दयोरप्यसहायग्रहणं विशेषणमाश्रयणीयमेव॥ अयमेकशब्द इति उपलक्षणं चैतदर्थप्रदर्शनं प्रायस्येपिहि वर्त्त-
ते। अल्पप्राणः एको गोत्र इति समानार्थेपि वर्त्तते। नैकधेति साधारणेपि वर्त्तते। तेरेव दन्तपत्तनयोरेकामानेति॥ एकाग्न्य इति आचाकिनिचः कनो वा लुग्विज्ञेयः॥ ॥ एम० ७२
॥ भाष्यप्रदीपे कैयटे प्रथममाह्निकं पंचमाध्यायस्य तृतीयपादे॥

=मानपदंत्वेतः कनुकौनेसततः कनुकोरवान्तुवृत्तेरिति भावः। २=

=सुबंतेन समानाधिकरणवृत्तिर्यैषां तद्धितानां ते इत्यर्थः।४= =क्रियाविशेषणत्वेन २=

अतिशायने तमबिष्ठनौ। किमिदमिति। किमयं एपन्तस्य निर्देशः आहोस्विदणन्तस्य कर्म्मव्युत्पत्त्यर्थ इति संदिहानः पृच्छति देशणा इति। दृष्ट्वा आदेशणाः साधुत्वेन प्रतिपाद्या एतेस्त्सूत्रे निबध्यन्ते प्रसंगेन साधुत्वप्रतिपादनार्थं ततो निपातनादेव एपि साधुत्वमपि सकलं भवति। यावदिति। यावत्ता वच्छब्देन परिमाणेन पाधिकादपि परिच्छेदः साधर्म्याद्यन्त्वा पि प्रयुज्येते प्रकर्षे इति। अनेकार्थत्वाद्धातूनां शेतिरभिभवे अतिशब्दस्य द्योतकस्तस्यैवार्थस्य यथा तिष्ठति गतिनिवृत्तौ वर्त्तते स एव गताव पि प्रशब्दस्यान्तद्धेतस्य प्रारं भस्य द्योतकः प्रतिष्ठत इति। कस्य पुनरिति द्रव्यवाचिनीहप्रकृतिर्नेव द्रव्यस्य प्रकर्षो स्तीति मत्वा प्रश्नः आप्रातिपदिकादिति वर्त्तत इति ननु सुबंतसमानाधिकरणवृत्ति भिरितस्तद्धितैर्भवितव्यं उक्तं पियकुत्सनादिषु ततः प्रवर्त्तते सौविभक्त्यन्त इति घकालतनेषु कालनाम्न इत्यलुग्विधानाल्लिंगाच्चैनेष दोषः प्रकृतेरिदमुपलक्षणं सा च प्रकृतिः सुबंता वा भवतु आप्रातिपदिकं वेति विशेषे तात्पर्याभावः न च प्रादुरस्येति॥ शब्दस्याभिधानत्वादभिधानस्य चाभिधेयगुणाभावाद्गुणस्य च स्वोप

अतिशायने तमबिष्ठनौ अतिशायन इत्युच्यते॥ किमिदमतिशायन इति देशणाः सूत्रे निबध्यन्ते क्रियन्ते यावत् ब्रूयात् प्रकर्षे अतिशय इति तावदति शायन इति॥ कस्य पुनः प्रकर्षे प्रत्यय उत्पद्यते॥ आप्रातिपदिकादिति वर्त्तते॥ आप्रातिपदिकस्य प्रकर्षे। आप्रातिपदिकं वैशब्दः॥ न शब्दस्य प्रकर्षा प्रकर्षौ स्तः। शब्देऽसंभवादर्थे कार्य्यं विज्ञायते। कः पुनः आप्रातिपदिकार्थः द्रव्यं। न वै द्रव्यस्य प्रकर्ष इष्यते॥ ॥ ॥

कारं प्रत्यनपेक्षत्वादिति भावः यदा तु तस्य गुणाभावो नास्ति तदा भवत्येव प्रकर्षयोगः उच्चतरः शब्दो नीचतरः शब्द इति ननु च यथा शुक्लतरः पट इति गुणस्यापि प्रकर्षे आश्रीयते द्रव्यप्रकर्षहेतुत्वेन तथा शब्दस्याप्याश्रीयतां। नैतदस्ति शुक्लादयो द्रव्यसमवेताः स्वयं प्रकृष्टा द्रव्यप्रकर्षहेतवो भवंतीति युक्तस्तत्र गुणप्रकर्षाश्रयः शब्दस्य वा चकत्वादभिधेयासमवायात् स्वगतेन प्रकर्षेणाभिधेयं प्रकर्षयुक्तं न शक्नोत्यवगमयितुमिति तत्प्रकर्षप्रत्यनपेक्ष एव द्रव्यमिति यत्किंचिदेतदिति सर्वेनाम्नापणमर्थ योगं एवं स्थिते तत् द्रव्यत्वेनाविवक्षितं तेन जातिगुणक्रियाद्यपि गम्यंते न वै द्रव्यस्येति यद्वस्तुस्वातंत्र्येणाभिधीयते तस्य प्रकर्षो नास्तीत्यर्थः तथा हि शुक्लतरं रूपमित्य त्र गुणस्यापि प्राधान्येनाश्रयणात् द्रव्यस्याश्रितादेव निमित्तात्तत्प्रकर्षः॥ ॥ ॥ ॥ ॥

=शब्दार्थयोस्तादात्म्याध्यासस्य तत्र तत्र प्रतिपादितत्वात् युक्तमेतदिति चेत्स्वरूपतउच्चत्वादिरूपेण तत्कृतप्रकर्षे ण द्रव्यस्य प्रकर्षो न प्रतीयत इत्यत्र तात्पर्यात्। ३= गुणस्यापीति। प्राधान्येनाश्रयणाद्द्रव्यरूपस्य [illegible] गुणस्यापि आश्रितादृषा=
=श्रितादेवधर्मान्तरात्प्रकर्षइत्यर्थः॥ निमित्तान्तरादिति। गुणगतशुक्लत्वादिजातिसमानाधिकरणेनैवेत्यर्थः॥

=ननु गुणप्रकर्षआश्रीयमाणे पाचकतर इति न स्यादत आह· आश्रित इति·१= स्वगतप्रकर्षवशेनेति· स्वाश्रिताश्रितत्वसंबंधेनेत्यर्थः।१=अभिधीयत इति· तरबादिभिः।२=

स्याच्च २

भा॰ कै॰ ५ एवं तर्हीति। आश्रितोभिधेयधर्मो गुणः स कश्चिद्यद्वद्यत्प्रवृत्तिनिमित्तं शुक्लतरः पटः इति यथा पटस्य स्वतो न शुक्लत्वं नाप्यशुक्लत्वं शुक्लो गुणो व्यपदेशहेतुरेवं स्वगतप्रकर्ष

७३ द्वारेण द्रव्यस्यासतो प्रकृष्टस्य प्रकृष्टव्यपदेशहेतु[redacted]भवति॥ न दुक्तं हरिणा द्रव्यपदेशप्रत्यय उपाधीयते गुणैः भेदको व्यपदेशाय तत्प्रकर्षोभिधीयते इति रूपं परूपेण द्रव्यमाख्या

यते यथा प्रकर्षप्रकर्षेण गुणस्यापीष्यते न तथेति। यद्यपि तत्र द्रव्ये बहवो गुणाः संति तथाप्यंतरं गत्वा तत्प्रवृत्तिनिमित्त गुणप्रकर्षो श्रयः प्रत्ययः क्रिया शब्देभ्यः पाचकादि

भ्यः क्रियायाः वृत्तिनिमित्तं प्रकर्षे प्रत्ययो जाति शब्देभ्यस्तु जातेः प्रकर्षाभावात्तत्सहचरित प्रसिद्धवा हदो हादि प्रकर्षे प्रत्ययः। उपाधिसंसर्गेण तु विना द्रव्यस्य न प्र

प्र१

एवं तर्हि गुणः। एवमपि गुणग्रहणं कर्तव्यं द्रव्यमपि द्रव्यान्तिपरिकार्थो गुणोपि तत्र कुत एतत् गुणस्य प्रकर्षे

भविष्यति न पुनर्द्रव्यस्य प्रकर्षे इति क्रियमाणे चापि गुणग्रहणे समानगुणग्रहणं कर्तव्यं। शुक्लतरः कृष्ण

एमाभूदिति। न तर्हीदानीमिदं भवति॥ ॥ ॥

=इंजनद्रव्यप्रकर्षस्तत इत्यर्थः।३= स्वगतः कारणकृत इति·२= उपचरितः गुणक्रियागतः प्रकर्षो यस्मिन् द्रव्ये·२= उद्बोधकत्वात्...

कर्षे नापि शब्दवाच्यत्वमाश्रित इत्युक्तं। सर्वस्यैव प्रधानस्य न विना भेदहेतुना प्रकर्षो विद्यते नापि शब्देनोपेतिवाच्यतामिति तत्र वास्तवः प्रकर्षो द्रव्ये मवतु मा वा आश्रितध

र्मद्वारकस्तु तत्प्रकर्षः शब्देनाभिधीयते न तु तन्निरपेक्षः स्वगतः अद्रव्यप्रकर्षे इति निषेध उपचरितगुणक्रियागतप्रकर्षे द्रव्यविषयो द्रष्टव्यः एवमपीति यथा गुणस्य

नित्यस्यानित्यद्रव्यसमवेतस्य कस्यचिन्महत्त्वादेः स्वतः प्रकर्षो नित्यस्य तु कारणकृतस्तथा द्रव्यस्यापीति मन्यते समानगुणग्रहणमिति द्वयोः परिपूर्णयोर्भिन्नजा एम॰

तीययोर्गुणयोरेकस्य परिपूर्णतरत्वे सति प्रकर्षस्य भावात् कृष्णाच्छुक्लतर इति माभूदित्येवमर्थमित्यर्थः॥ ॥ ॥ ७३

अध्वर्युर्वै श्रेयानिति अध्वर्योः परिशिष्टेभ्यः प्रशस्यत्वं प्रतिप्रस्थातुरपि पापत्वं तयोः परस्परापेक्षः प्रकर्ष इति मन्यते । अंधानां काणतम इति अंधा नेत्रद्वयेनानपश्यंति काणास्त्वे केनेति तदपेक्षं काणस्य प्रकर्षम्मन्यते । समानगुण इति समाने गुणे भिन्नाश्रये निविवक्षिते तदाश्रयस्येदं सर्वं ।। काणिरयमिति तत्र अंधानामपि वास्तवं काणत्वं विद्यते न तु लोकप्रसिद्धं तत्र दर्शनप्रकर्षाश्रयः प्रत्ययस्तु या च लोकप्रसिद्धिरंधानां काणो राजेति महान् हिमवानिति सर्षपान्महीयान् हिमवानिति मा भूदि

अध्वर्युर्वै श्रेयान् पापीयान् प्रतिप्रस्थाता ।। अंधानां काणतम इति । समानगुणे एषा स्पर्द्धा भवति । अध्वर्युर्वै श्रेयान् अन्येभ्यः प्रशस्येभ्यः पापीयान् प्रतिप्रस्थाता अन्येभ्यः पापेभ्यः । अंधानां काणतम इति । काणिरयं सोक्ष्णैव न ते । सर्वे इमे किंचित्पश्यंति अयमेषां काणतम इति । अदूरविप्रकर्ष इति वृक्षस्य मि हमा भूत् ।। महान् सर्षपः महान् हिमवानिति ।। जाते नेति वृक्षस्य मि हमा भूत् वृक्षोयं प्लक्षोयमिति । न तर्हीदानीमिदं भवति ।। गोतरः गोतरा अश्वतरः अश्वतरा इति । नैष जाते प्रकर्षः ।। कस्तर्हि गुणस्य । गौरयं यः शकटं वहति । गोतरोयं यः शकटं वहति सीरं च । गौरियं या समां समां विजायते । गोतरेयं या समां समां विजायते स्त्रीवत्सा च ।। अश्वोयं यश्चत्वारि योजनानि गच्छति ।। अश्वतरोयं योष्टौ योजनानि गच्छति ।। तथा ति

॥ ३ ॥ सूत्रे क्रियाग्रहणं कर्त्तव्यं । साधनप्रकर्षमा भूत् ॥ ॥ ॥

सर्थेः ।। जातेरिति ।। आश्रयप्रकर्षो जातेः प्रकर्षमन्यते कस्तर्हीति प्रश्नः गुणस्येति परिहारः अभिधेयसहचरितलोकप्रसिद्धगुणप्रकर्षाश्रयो द्रव्यस्य प्रकर्ष इत्यर्थः ।। केचित्तु गुणसमुदाये शब्दप्रवृत्तिं मन्यमानाः शब्दार्थीभूतस्यैवायं गुणस्य प्रकर्ष इत्याहुः ।। साधनप्रकर्षे मा भूदिति ननु च साधनस्य गुणाभावात् प्रधानस्य च या क्रियायाः प्रकर्षे संभवात्तत्र प्रकर्ष एव प्रत्ययो भविष्यति । एवं मन्यते । प्रधानानि स्वगतेनापि धर्मेण तद्बलेन व्यपदिश्यंते गुणगतेनापि तत्र साधनप्रकर्षाश्रये क्रियाप्रकर्षे प्रत्ययो मा भूत् स्वगते य

॥ यदि स्वेवमर्थं क्रियाग्रहणं कर्त्तव्यं ॥ ॥ ॥

स्मा

मा०कै०५ नैष दोष इति वृद्धानामपि दोषाणां प्रक्रमे सामान्यस्य विवक्षितत्वादेकवचननिर्देशः। यस्य प्रकर्षोस्तीति संभवव्यभिचाराभ्यामपेक्षत्वादुपाधिनिर्देशः स्येति भावः॥ काशिकस्ये
७४ ति काशिषु भव इति ठञि ठ्योरेकतरः प्रत्ययः। गुणान्तरमिति पूर्वं सूत्स्यान्तरदर्शनात् गुणप्रकर्षः प्रतिपादितोऽत्र तु प्रयत्नभेददर्शनादिति विशेषः। शुक्लादिति
कृष्णे मा प्रतियोगिनि विवक्षिते शुक्लकृष्णशब्दात्प्रसङ्गो मा भूदित्यर्थः॥ न ह्याढ्याभिरूपाविति स्पर्द्धा हेतो गुणस्याभावे नानाश्रयगुणद्वयाश्रितस्पर्द्धा हेतु प्रकर्षे नुभ

नैष दोषः। यत्तावदुच्यते। गुणग्रहणं कर्त्तव्यमिति। न कर्त्तव्यं। यस्य प्रकर्षोस्ति तस्य प्रकर्षे भविष्यति। गुणस्य चैव प्रकर्षो न द्रव्यस्य। कथं ज्ञायते। एवं हि दृश्यते लोके इह समाने आयामे विस्तारे पटस्य अन्यो र्घो भवति काशिकस्यान्यो माथुरस्य। गुणान्तरं च खल्वपि शिल्पिन उत्पादयमानाः द्रव्यान्तरेण प्रक्षालयन्ति। अन्येन सुष्ठु धौतकं कुर्वन्ति अन्येन शैफालिकमन्येन माध्यमिकं॥ यदप्युच्यते। क्रियमाणे चापि गुणग्रहणे समानगुणग्रहणं कर्त्तव्यं शुक्लात् कृष्णे मा भूदिति न कर्त्तव्यं॥ समानगुण एव स्पर्द्धो भवति॥ न ह्याढ्याभिरूपौ स्पर्द्धेते। वाचकेन खल्वप्युसन्नव्यं। न च शुक्लात् कृष्णे प्रसङ्ग उत्पद्यमानो वा च कः स्यात्। यदप्युच्यते। अदूरविप्रकर्ष इति वक्तव्यमिति। न वक्तव्यमदूरविप्रकर्ष एव स्पर्द्धो भवति। न हि निष्कधनः शतनिष्कधनेन स्पर्द्धते। यदप्युच्यते। जातेर्नेति वक्तव्यमिति न वक्तव्यं॥ ॥

वत्सेव प्रसङ्गः आढ्याभिरूपयोराधः श्रेयानिति शुक्लकृष्णयोरपि तरा भवति प्रत्यय उज्ज्वलतरोयं कृष्णाच्छुक्ल इति न च शुक्लादिति शुक्लतर इत्युक्ते शब्दप्रवृत्तिनि एम०
मित्तप्रसामान्यं शुक्लगुणान्तरापेक्षः प्रकर्षः शुक्लगुणनिमित्तद्रव्यप्रकर्षावगमादिति भावः॥ न हि निष्कधन इति अदूरान्तरयोरेव संप्रधारणविषयत्वादिति भावः॥ ७४

=तथा चाढ्याभिरूपयो राढ्यतर इति प्रयोगो नेत्यत्र भाष्यतात्पर्यं=२

जननेति। अयत्नलभ्यत्वप्रतिपादनपरमेतत्। नित्यानां परमाण्वादीनां जननाभावात्। तद्गतायां जातेर्जननेनाप्राप्यत्वाद् यत्नलभ्यत्वायमर्थः। सत्त्वादिर्न प्रकर्षोपकर्ष-
भाक्। घटादिके च द्रव्ये यत्नेनोत्पाद्यमाने पुरुषप्रयत्नेन विना नित्या जातयो व्यक्तिमायांति। यद्यपि वत्सकाद्यितस्य शौक्ल्यादेरयत्नलभ्यत्वं तथाश्रयभेदात् गुणस्य भेदाव-
गमादस्ति प्रकर्षापकर्षयोगो जातेस्त्वाश्रयभेदेऽपि भेदाभावात् प्रकर्षापकर्षायोगः। साधनं वै द्रव्यमिति ननु च शक्तिः साधनमस्ति च तत्प्रकर्षो यदाह साधकतमं क-
रणमिति नैष दोषः पचति देवदत्त इति सामानाधिकरण्यदर्शनाच्छक्तिद्रव्ययोस्तिरः तेन भेदस्यानवगमाद् भेदमाश्रित्य निर्देशः न च प्रधानस्य क्रियायां स्वतः प्रक-

=भेदाभावादिति आश्रयभेदकृतारोपविषयभेदस्याप्यभावादित्यर्थः।२= =व्यक्तावभिव्यक्ता भवंतीत्यर्थः।२= भेदावगमादिति गुणस्य स्वतो भेदेऽपि विभिन्नद्रव्यसंबंधवत्त्वाद्भेद इत्यर्थः।२=

जननेनया प्राप्यते सा जातिः। न चैतस्यार्थस्य प्रकर्षापकर्षौ स्तः। यदप्युच्यते॥ तिङश्चे सत्त्वक्रियाग्रहणं कर्त्त-
व्यं। साधनप्रकर्षमात्रादिति न कर्त्तव्यं। साधनं वै द्रव्यं॥ न च द्रव्यस्य प्रकर्षापकर्षौ स्तः॥ ॥ ०॥

र्षे संभवे गुणभूतसाधनप्रकर्षापेक्षास्ति। पचतितरामिति चोक्ते क्रियाप्रकर्षो गम्यते न तु साधनप्रकर्षः प्रकर्षे युक्तेऽपि साधनेऽकदाचित् क्रियाप्रकर्षाभावात् क्रियाप्र-
कर्षे तु कार्ये स्वकारणाव्यभिचारान्नियमेन साधनप्रकर्षानुमानात् क्रियाप्रकर्ष एव प्रत्ययः एकौ द्वौ त्रय इत्यादिकायाः संख्यायाः सर्वत्र परिच्छेदकत्वाविशेषात् प्र-
कर्षाभावः बहुत्वसंख्यायास्त्वनियतसंख्येयत्वात् भवति प्रकर्षः बहुतरा इति एवमुन्मानप्रमाणपरिमाणानामपि प्रकर्षाभावो विज्ञेयः भाष्यकारेण तु जा-
तिप्रकर्षाभावोऽत्र न्यायानुसारेणागम्यमानत्वान्नोक्तः॥ ॥ ॥ ॥

=वैधर्म्यग्रहणाच्च·१= नचेति·एकत्वानेकत्वरूपवैधर्म्यस्य सत्त्वादिति भावः। एकत्वानेकत्वयोर्वैधर्म्यस्यैवाभावमुपन्यस्यति·एकस्यापीति·१=

भा०कं०५ किंपुनरेकमिति॥ ननु समानधर्मोपलम्भाद्विशेषाग्रहणाच्च संशयो नचैकानेकयोर्विशेषाग्रहणं नैष दोषः एकस्यापि मेदव्यवहारो दृश्यते यथा परद्रव्याम्रडुणासीस कुन्त

७५ रश्चैषमः अन्य एवायं संवृत्त इति। तथानेकस्मिन्नप्येकव्यवहारो दृश्यते यथा भिन्नापि क्रियानिवृत्तभेदाख्यातेनाभिधीयत इ सेकोच्यते॥ तत्र तो हि भवद्भिरास

तेभवंतत्रासत इ सा दौ भिन्नैः कर्तृभिः साध्यानि स्वसमवेतानि भिन्नान्येवासनानि एकत्वं चाग्निसोऽक्ष्नतिङः तान्येकशेषारंभप्रयोजयंति क्रियाया एकत्वा

दिति एवं च किमेकं शौक्ल्यमाश्रयभेदात्तूपचरितभेदमुतानेकमेवेति संशयात्मा उपपन्नः यद्येकमिति एकत्वे जातिवद्गुणस्य प्रकर्षानुपपत्तिः॥ समा

किंपुनरेकं शौक्ल्यमाहोस्विन्नाना। किं चातः। यद्येकं प्रकर्षो नोपपद्यते। न हि तेनैव तस्य प्रकर्षो भवति। अथ नाना स

मानगुणाग्रहणं कर्तव्यं॥ मुक्ताफलस्येमा भूदिति अस्तु एकं शौक्ल्यं। ननु विशेषवत्। किं कृतो विशेषः अल्पत्वमहत्त्व

कृतः अथवा पुनरस्तु एकं निर्विशेषं च॥ ननु चोक्तं प्रकर्षो नोपपद्यते॥ न हि तेनैव प्रकर्षो भवतीति॥ ॥

=निरवयवं·१= =सावयवं·२= तस्य·१

नगुणाग्रहणमिति तुल्यमेदेयथा शौक्ल्यस्य शौक्ल्यांतरापेक्षः प्रकर्षः एकं कृष्णापेक्षोपीति तदपेक्षप्रकर्षप्रत्ययनिवृत्त्यर्थं समानगुणाग्रहणं कर्तव्यमित्यर्थः॥

ननु यस्याप्येकं शौक्ल्यं तेनापि भिन्नगुणापेक्षप्रकर्षप्रत्ययस्य निवृत्तिर्विधेया नैष दोषः एकत्ववादिनो यथा शौक्ल्यस्यात्मापेक्षप्रकर्षानुपपत्तिरेवं गुणांतरापेक्षो

पि प्रकर्षो नोपपद्यते यथा गोत्वं नात्मापेक्षया नापि जात्यंतरापेक्षया प्रकृष्यते गुणभेदवादी तु भेदनिबंधनप्रकर्षसंवेदनं इच्छतीति नैव समानगुणाग्रहणं क

र्तव्यं विशेषवदिति ततो विशेषाश्रयत्वादन्यता उपपन्नः प्रकर्षः अल्पत्वमहत्त्वकृत इति क्वचिदाश्रयेऽल्पं क्वचित्तु महदित्यर्थः॥ ॥ ॥ राम० ७५

=रूपादिसावयवमिति सांख्यानुसारेणेदं·१=

=संवेदादिति॰गुणांतरेणकृष्णादिनाप्रच्छादितत्वादपकर्षः॥अप्रच्छादितःकेवलंशुक्लस्तुप्रकृष्टइतिभावः।१=

श्री१

गुणांतरेणप्रच्छादनादितिसंभेदात्मिकैरागादिसर्थे॥ यथाजातुसत्यारिवासितायामल्लिकायाः किमंतरादिति। अतिशायनइतिकिंप्रत्ययार्थनिर्देशः आहोस्वित्प्रकृत्यर्थ
स्यविशेषणमितिसमर्थविभक्तिश्रद्धारेणविचारः॥ द्वितीयांतादितियदातिङंतेनविग्रहार्थे विग्रहवाक्यंप्रदर्श्यतेतदाद्वितीयांतादुत्पत्तिः कृदंतेनतुवाक्यप्रदर्शनेषष्ठ्या

गुणांतरेणप्रच्छादनात्प्रकर्षोभविष्यति॥ अथवापुनरस्तुनाना। ननुचोक्तंसमानगुणग्रहणंकर्त्तव्यंशुक्लात्प्रकृष्टे
माभूदिति॥ नकर्त्तव्यं। समानगुणएवसंप्रत्ययोभवति॥ नह्यधाभिरूपौस्पर्द्धेते। वाचकेनखल्वपिसुतरां। नचशुक्ला
त्प्रकृष्टेउत्पद्यमानोवाचकःस्यात्॥ किमंतात्सुनरूपस्याभवितव्यं। द्वितीयांतात्अतिशय्यमानात्॥ शुक्लमतिशेतेशु
क्लतरःकृष्णमतिशेतेकृष्णतरः॥ यदिद्वितीयांतादतिशय्यमानात्कालोतिशेतेकालींकालितरइतिप्राप्नोतिकाल
तरइतिचेष्यते। तथाकालीअतिशेतेकालंकालतरा इतिप्राप्नोतिकालितरेतिचेष्यते॥ ॥ ॥

भाव्यंशुक्लस्यातिशायनइतितदाषष्ठ्यादौसंदेहोभवतिकर्त्तरिषष्ठीवा स्यात्कर्मणिवाकरणेल्युट्स्यात्कर्त्तरिवेति अथवाद्वितीयाग्रहणमुपलक्षणार्थमितिषष्ठ्यपिगत्य
तेप्रत्ययार्थसामर्थ्यलभ्याचसमर्थविभक्तिः कालितरइतिघरूपकल्पेतिह्रस्वः ॥ ॥श्री ॥७॥ ॥

भा०कै०५ गर्गोतरः प्राप्नोतीति॥ वृत्ताव् पि लिङ्गविधानात् संख्याविशेषसंप्रत्ययात् बहुवचनान्तात् प्रत्ययोत्पत्तिः विरुद्धा। अव्यतिरिक्तं वय इति प्रत्ययार्थपक्षे त्वार्थी वयःप्रतिपत्तिर्वयः

७६ प्रकर्षे ऐवासौ कुमारीमतिशेते न तु गुणान्तरेणास्य विप्रकर्षाद्धाऽवृत्तु वयःप्रतिपत्तिर्नास्तीति ङीयोप्रसंगः स्वार्थिकत्वेनुप्रत्ययावद्ध्येव वयःप्रतिपत्तिरिति ङीप्प्राप्तिः त

रयोः कृत्वादित्वितरपः स्वार्थिकत्वात्सर्वः प्रकृत्यर्थस्तेन द्योत्यत इति भावः॥ ङीब्पीति॥ टाब्यवादत्वात् ङीप इति भावः अन्येत्वाहुः कुमारशब्दादुत्पन्ने न ङीया

प्रथमवयोविशिष्टार्थगतस्य स्त्रीत्वस्याभिव्यक्तत्वात्तरबन्तात् स्त्रीत्वमात्रमभिव्यंक्तव्यमिति टाबेव भविष्यति यथा यत्र तत्रेत्यादौ त्रलाधिकरणस्याभिव्यक्तत्वान्नद्वि

तथा गार्ग्योतिशेते गर्गो न गर्गेतरः इति प्राप्नोति। गार्ग्येतर इति चेष्यते। तथा गर्गोऽतिशेरते गार्ग्य(गार्ग्य)तरा इति प्राप्नोति। गार्गेतरा इति

चेष्यते। एवं तर्हि प्रथमान्तात् स्वार्थिको भविष्यति। कालः अतिशेते कालतरः कालीऽतिशेते कालितरा। गार्ग्यः अतिशेते गार्ग्येत

रः गर्गोऽतिशेरते गर्गतराः। यदि प्रथमान्तात् स्वार्थिकः कुमारितरा किशोरितरा॥ अव्यतिरिक्तं वय इति कृत्वा वयसि प्रथम इति

ङीप्प्राप्नोति। तरपो कृत्वात् स्त्रीप्रत्ययो न भविष्यति॥ टाबपि तर्हि न प्राप्नोति उक्तेपि हि भवन्ति टाबादयः॥ उक्तमेतत्स्वार्थि

१ काष्टाबादय इति ङीबपि तर्हि प्राप्नोति॥ एवं तर्हि गुणोऽभिधीयते॥ ॥ ॥

=निमित्तमात्रमभीतस्य·१= =धरूपतिमत्वे घति वचनादित्यर्थः॥२=

न्तान्तात्सामपि की प्रथमे वोत्पद्यते न सप्तमी भाष्यकारस्तु निमित्तसमसन्निधानादिष्यवादे नैवात्र ङीयभाष्यं न नु टापेति पक्षान्तरमाश्रयति। एवं तर्हि गुण इति अतिशे

तेनेनेत्सति शायनो गुणोऽभिधीयते कारणे त्वन्। आश्रयद्रव्यवाचिनः सप्रमवे नेगुणे प्रत्ययविधिः ततोव्यतिरिक्तार्थाभिधानात् द्योतत द्वयोर्लक्षणं ङीबभा एम०

वः गुणाभिधाने कालितर इति समानाधिकरण्याभावात् द्यादिविति ह्रस्वो न प्राप्नोतीति चेत् वचनाद्धयधिकरणेपि भविष्यति॥ ॥ ॥ ७६

एवमपीति षष्ठीप्रसंगस्तु द्रव्यवचनात्त्वचोदितः सो ऽपि समभेदस्य गुणगुणिनोः सर्वदात्र विवक्षितत्वात् तत्सामप्यात्मभेदविवक्षायां मं चादित्वस्वलिंगसंख्याऽपरित्यागप्रसंगः आ
श्रयत इति विशेषणानां चाज्जातेरिति वचनात्तत्र हि विशेषणशब्देन परोपकारायोपात्ताः शेषभूताः शुक्लादयो गुणा गृह्यन्ते॥ अथवा क्रियेति अतिशायोतिशायन

एवमपि लिंगवचनानि न सिध्यंति। शुक्लतरं शुक्लतरा॥ शुक्लतरः शुक्लतरौ शुक्लतरा इति। आश्रयतो लिंगवचनानि भवंतिगुण
वचनानां हि शब्दानामाश्रयतो लिंगवचनानि भवंति। तद्यथा शुक्लं वस्त्रं शुक्ला शाटी। शुक्लः कंबलः शुक्लौ कंबलौ शुक्लाः कंबला इति।
यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिंगं वचनं तद्गुणस्यापि भविष्यति॥ अथवा क्रियाभिधीयते। एवमपि लिंगवचनानि न सि
ध्यंति आश्रयतो लिंगवचनानि भविष्यंति॥ एवमपि द्विवचनं प्राप्नोति यद्धि अतिशेते यच्च अतिशेष्यते उभौ तौ तस्याश्रयौ भव
तः। नैष दोषः कथं शेतिरकर्मकः॥ अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवंति। कर्माऽपरिष्टाद्विधयः कर्मस्थभावकानां कर्म
स्थक्रियाणां वा भवंति। कर्तृस्थभावकश्च शेतिः॥ अथ यद्येवं द्वितीयांता दुत्पत्तिः प्रथमांताद्वा स्वार्थिकः अथापि गुणोऽभिधीयते।
अथापि क्रिया। किं गतमेतदियता सूत्रेण॥ आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यं गतमित्याह। कथं यदा तावद्द्वितीयांतादुत्प

त्रिः प्रथमांताद्वा स्वार्थिकः॥१०॥

नमिति मादेलुड्विधानात्॥ आश्रयौ भवत इति उभयोर्निर्वर्तकत्वादिति भावः॥ अकर्मका अपीति अर्थान्तरवृत्तित्वात्कर्माऽपरिष्टा इति अतिशयिक्रियाकर्तृत्वेपि वृत्समवेतान
तु कर्मणीति कर्माश्रयलिंगसंख्याभावरसुकं भवति कर्माऽपरिष्टा इति द्विवचनमिह कर्माऽपरिष्टाविधेः कर्माश्रितत्वस्य चोदितत्वात्॥ आश्रयतो लिंगवचनानी सत्रसमवाप्या
(१ अयोग द्यतेन तु निर्वर्तक इत्यर्थः॥ ॥ ॥

भा०कै०५ सुट् भविष्यतीति कर्तृसाधनः। कः प्रयोज्यार्थ इति। अचेतनत्वात् गुणानां प्रयोजकत्वानुपपत्तिं मन्यते। गुणगुणिनमिति। अस्माभिः प्रकर्षे स्वमतिशेषे तितत्समर्थो

७७ चरणलक्षणश्चाचेतनानामपि प्रयोजकव्यापार इति कारकप्रकरणे प्रतिपादितं। कः पुनरिति। शेतेरनेकार्थत्वात् प्रश्नः। यो यत्रेति स्थानार्थः शेतिर्व्याजत्वा

शयइत्यत्रेति भावः॥ गुणगुणिनाविति। अवतिष्ठेत इत्यर्थः। तान्गुणान्गुण्यतिशाययति अतिशयेनावस्थापयतीत्यर्थः॥ पूर्वं गुणानां प्रयोजकत्वमुक्तं पश्चा

=कस्येत्युद्० २ =भावेत्युद्० १८

तदा कस्मात् सुटो बहुत्वमित्येवमत्र सुटु भविष्यति। यदा गुणोऽभिधीयते। तदा न्याय्यसिद्धमेव। यदापि क्रिया तदापि न्याय्यसिद्धमेव। अथवा अतिशाययतीत्यतिशायनं। कः प्रयोज्यार्थः॥ गुणगुणिनं प्रयोजयति। गुणी वा गुणान्प्रयोजयति। कः पुनरिह शेत्यर्थः॥ इह यो यत्र भवति शेते स तत्र। गुणाश्च गुणिनि शेरते। शेत्यर्थः कारितार्थो वा निर्देशोऽयं समीक्षितः। शेत्यर्थे नास्ति वक्तव्यं कारितार्थं ब्रवीमि ते। गुणी वा गुणसंयोगाद्गुणो वा गुणिना यदि। अभिव्यज्येत संयोगात्कारितार्थो भविष्यति॥ इह अस्पाषिसूक्ष्माणि वस्त्राणि वस्त्राणीति। परत्वादातिशायिकः प्राप्नोति॥ आतिशायने बहुव्रीहावुक्तं। किमुक्तं। पूर्वपदातिशाये आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थ इति॥ ॥

×अस्यातिसूक्ष्माणि×१

गुणिनः शेत्यर्थ इति प्रकृतस्यार्थोऽण्यर्थोऽपि वा गृह्यत इत्यर्थः॥ शेत्यर्थे नास्तीति तस्याप्रसिद्धत्वात् गुणी वेति॥ गुणसंबंधाद्गुणवानतिशेते गुणिसंबंधाद्गुणो वा अभिव्यज्येते तिप्रकृष्टत्वेनेति भावः। कारितार्थ इति गुणो गुणिनमतिशाययति गुणोऽपि गुणमिति स्त्वेण्यर्थोपपत्तिः॥ परत्वादिति सूक्ष्मतरवस्त्र इति प्राप्नोति सूक्ष्मवस्त्रतर इति चेष्यते प्रकर्ष

स्यान्यपदार्थप्रतिविशेषणत्वस्य च युगपद्विवक्षायां विप्रतिषेधोपपत्तिः आतिशायिकादिति पूर्वविप्रतिषेधेनेति भावः॥ ॥ ॥ राम० ७७

उत्तरपदातिशय इति परविप्रतिषेधेन तत्र स्वरे विशेषस्तरबंते नसमासेबहोर्नञ्वदुत्तरपदभूम्नीति बहुत्राद्युत्तरशब्दो तेदात्तो भवति बहुश्रीहेस्तरपि सतितरपः पित्वादनु
दात्तत्वान्मध्योदात्तत्वप्रसंगस्तथा कपि विशेषो बहुत्राद्युतरक इति तरबंतेन समासे भवति बहुश्रीहेस्ततरपि बहुत्राद्युकतरइति स्यात्तं यदातत्रैव पूर्वपदार्थातिशय स्तदा ब
हुश्रीहौ कृते तेतरब्वेदितव्यः प्रकर्षापकर्षयुक्तानीति अवयवधर्मेण समुदायस्य व्यपदेशस्तत्र प्रथममयत्कर्षयुक्तं मध्यमं पूर्वापेक्षया प्रकर्षयुक्तं मंसापेक्षया पकर्षयु

उत्तरपदातिशये आतिशायिको बहुश्रीहेर्बहुत्राद्युतराद्यर्थ इति। इह त्रीणि युक्तानि वस्त्राणि प्रकर्षापकर्षयुक्तानि तत्र पूर्वेमपेक्ष्य उत्तरो द्वि
तरबंते। तत्र द्वयोस्तरबंतयोरेकस्मात् शुक्लतर इति शब्दादुत्पत्तिः प्राप्नोति। शुक्ल शब्दादेवेष्यते। शुक्लतरस्य शुक्लभावात्प्रकृतेः प्रत्ययविज्ञा
नं। शुक्लतर शब्दे शुक्लोस्ति तस्मादुत्पत्तिर्भविष्यति॥ नैतद्विवदामहे शुक्लतरशब्दे शुक्लोस्ति नास्तीति॥ किं तर्हि शुक्लतर शब्दोप्य
स्ति। तत उत्पत्तिः प्राप्नोति॥ तरंताच्चस्वार्थे छंदसि दर्शनं श्रेष्ठतमायेति। तरंतात् आतिशायिकांतात्स्वार्थे छंदसि आतिशायिको दृश्य
ते देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण॥ श्री ॥७॥

=नतु श्रेष्ठतमायेत्यातिशायिकात्तिशयिकोदृश्यत एवेत्यत आह॰ तरंताज्जेति॰=

[redacted] उत्कर्षं संतु प्रकर्षयुक्तमेवेतियोज्यं। तत्रेति। पूर्वापेक्षया द्वयोरपि प्रकृष्टत्वाच्छुक्लतरत्वं तयोस्त्वेकतरस्यान्यतरापेक्षया प्रकर्षविवक्षायां तरंतात्तरबुत्प
त्तिप्रसंगः॥ शुक्लतरस्येति। न्यूनमध्यमोत्कृष्टानां सर्वेषां शौक्ल्यसंभवात्। शुक्लव्यपदेशाच्छुक्लशब्दादेव तरबुत्पत्तेरित्यर्थः॥ शुक्लतर शब्द इति शुक्लतरः शब्दो वाच
कोयस्यार्थस्य तस्मिन्नर्थे शुक्लशब्दो वाचकत्वे नास्तीत्यर्थः॥ उत्पत्तिः प्राप्नोतीति॥ अनिष्टमपि प्राप्नोतीति सामर्थ्यसिद्धा विसर्गः॥ श्रेष्ठतमायेति श्रेष्ठायेत्यर्थः॥१०

=शुक्लादिति। अतिशयगमनमानाधिकारात्कर्त्तव्यं प्रसङ्गप्रतिपक्षे इदं तदाह शुक्लमतिशेते इति॥ तृतीयशुक्लवाचिन इति इदं मध्यमं शुक्लमित्यनेनान्वेति तृतीयशुक्लवाचिनः प्रत्ययस्य द्वितीयशुक्लवाचिनः शुक्लनवमाद्युत्पत्तिस्तत्कौण्डिन्यन्यायेन बाध्यते इत्यर्थः। अयं भावः। आद्यशुक्लापेक्षो द्वितीय

भा॰कै॰५ ७८ मध्यमादिति॥ मध्यमवाचिनः शुक्लादेरभिधेये प्रत्ययो वक्तव्यः शुक्लमतिशेते शुक्लतर इति। अनेन च वक्ष्यमाणेन तत्कौण्डिन्यन्यायेन तृतीयशुक्लवाचिनः शुक्लत
रशब्दादुत्पत्तिर्बाध्यते मध्यमस्य शुक्लः पूर्वापेक्षया शुक्लतरो भवति तृतीयापेक्षया तु न्यूनत्वाच्छुक्ल एव भवति न तु शुक्लतर इति शुक्लशब्दादेव मध्यमशुक्लवा
चिनः प्रत्ययो वक्तव्य इत्यर्थः॥ न च न्यूनः प्रवर्तेत इति स्वगतप्रकर्षापेक्षयां तद्धितोत्पत्ताविसत्यर्थः॥ ततश्च पूर्वमतद्धितान्त एव शुक्लशब्दस्तृतीये शुक्लेऽभिधेये प्र
त्ययमुत्सारयति लुग्भविष्यतीति गतार्थत्वात्प्रयोग एव लुक्। एके त्वेवं तरं मध्यमशुक्लापेक्षस्तृतीयप्रकर्षस्य प्रतिपादनात्॥ नचेति शुक्लतरतरशब्दस्य प्रयो

पाआध१

एवं तर्हि मध्यमात् शुक्लशब्दात् पूर्वापेक्षा उत्पत्तिर्वक्तव्या॥ मध्यमस्य शुक्लशब्दः पूर्वमपेक्ष्य प्रकृष्टः परमपेक्ष्य न्यूनः न च न्यूनः प्र
वर्तते। अथवा उत्पद्यतां लुग्भविष्यति। वाचके न खल्वप्युत्पत्तव्यं॥ न च शुक्लतरशब्दादुत्पद्यमानो वाचकः स्यात् न खल्वपि बहूनां प्रक
र्षे तरपा भवितव्यं॥ केन तर्हि तमपा। पूर्वेण स्पर्द्धमानो य उत्तरो लभते सितः परस्मिन्न्यूनतामेति न च न्यूनः प्रवर्तते। अपेक्ष्य मध्यमः पू
र्वमाधिक्यं लभते सितः परस्मिन्न्यूनतामेति यथा मात्स्यः स्थितेन पेक्ष्य स्तवापि नरस्तस्मान्नापशब्दो भविष्यति वाचकस्त्वेतस्य प्रयोक्तव्यो वाचकस्त्वे
१ त्र प्रयुज्यतां॥ ॥ ॥

गामावाद्वाचकत्वं। न खल्वपीति। परिता वृत्त्ययाणामन्यतमस्य प्रकर्षो विवक्ष्यते तदा शुक्लतममिति भाव्यं न तु शुक्लतरमित्यर्थ पूर्वमनपेक्ष्य द्वयोरन्यतरस्य प्रकर्षविव
क्षा तदा पूर्वानपेक्षायां मध्यमं शुक्लमेव भवति न तु शुक्लतरमिति शुक्लशब्दादेवोत्पत्तिः सिद्धा शुक्लतर इति न कश्चिद्दोषः पूर्वोक्तार्थसंग्रहश्लोकाः। पूर्वेणेति सितः शुक्लः
पूर्वेण स्पर्द्धमानस्तदपेक्षयोत्तरः प्रकर्षं लभते तृतीयापेक्षया तु न्यून एवेत्यर्थः। अपेक्ष्येति पूर्वेण समानार्थो दृष्टान्तो पारानाय तु पुनरुक्तः नाप शब्द इति गतार्थ एम॰ ७८
त्वात् लुग्भावाद्वाचकस्यैव प्रयोक्तव्य इति तन्मन्यसे तदा शुक्लतरमिति परिवाचकस्ततः प्रयुज्यतां न तु वाचकस्तस्मान्न प्रयोक्तव्य इत्यर्थः॥ ॥

तर१

द्विवचाद्विवचनं च विभज्यं च द्विवचनविभज्यं निपातनात् भजेः विप्रत्ययो द्यत्र सयोद्विवचनविभज्यं च तदुपपदं चेति कर्मधारयः तस्मिन्सति स्वं वा तिङः तातिशायने तरबीयसु
नौ भवतः तच्चोपपदं विग्रहवाक्य एव प्रयुज्यते। वृत्तौ तु गतार्थत्वान्नावश्यं प्रयुज्यते एवं चोपपदग्रहणं विस्पष्टार्थं। तत्रेदं न सिध्यतीति। पारिभाषिकद्विवचनाश्रयः पूर्वः प
क्षः अर्थाश्रयस्तूत्तरपक्षः अस्माकं चेति। अस्मदो द्वयोश्चेति एकस्मिन्बहुवद्भावः यदि पुनरिति पूर्वोक्तेषूदाहरणेषु युक्तं चित्राशिद्वयापेक्षस्यैकस्य चिदर्थे द्वयोः क्षस्य द्व्यर्थ
स्य विद्यमानत्वात्प्रत्ययः सिद्ध इति भावः इहापीति। सांकाश्यकपाटलिपुत्रकराशिद्वय संभवात्। सांकाश्यकानामिति अत्रापि राशिद्वयस्य सद्भावात्तरं स्यात्। सांकाश्य
=दंतोष्ठस्यादौ॰२= =अस्माकं च देवदत्तस्यादौ॰२=

द्विवचनविभज्यो॥ द्विवचन इत्युच्यते। तत्रेदं न सिध्यति॥ दंतोष्ठस्य दंताः स्निग्धतराः॥ पाणिपादस्य पादौ सुकुमारतरौ अस्माकं च देवदत्तस्य च देव
दत्तो ऽभिरूपतर इति। यदि पुनर्द्व्यर्थोपपद इत्युच्यते। तत्रायमर्थः॥ विभज्योपपदग्रहणं न कर्त्तव्यं भवति। इहापि सांकाश्यकेभ्यः पाटलिपुत्र
का अभिरूपतरा इति द्व्यर्थोपपद इत्येव सिद्धं नैवं जातीयिकाद्व्यर्थता शक्या वितानं इहापि प्रसज्येत। सांकाश्यकानां पाटलिकानां च पाटलिपु (पुत्र)
त्रका अभिरूपतमा इति॥ अवश्यं खल्वपि विभज्योपपदग्रहणं कर्त्तव्यं यो हि बहूनां विभागस्तदर्थं। सांकाश्यकेभ्यश्च पाटलिपुत्रेभ्यश्च
९ माथुरा अभिरूपतरा इति। तन्नाहि द्व्यर्थोपपद इति वक्तव्यं॥ ॥ ॥

=उद्धृतावयवभेदस्त्वर्थः॥१=

कावयवः समुदायः सांकाश्यकशब्देनोच्यते॥ पाटलिपुत्रकावयवश्च पाटलिपुत्रकशब्देन एवं निर्धारणमुपपद्यते। बहूनां विभाग इति बहूनां राशीनां मध्यादेकस्य राशे
र्यत्र विभागः तत्र राशित्रयादिसद्भावात्तरप् न स्यात्॥ तन्नहीति। ननु नैवं जातीयिकाद्व्यर्थता स्यादित्यतिप्रसंगोद्भावनेनास्य पक्षस्य दूषितत्वात्कथं पुनरंगीकरणं नैष दोषः इह राशि
द्वयापेक्षां द्व्यर्थतामाश्रित्याचार्यदेशीयेन यदि पुनरित्याद्युक्तं तत्रायमर्थ इति च तत आचार्येण नैवं जातीयिके तिराशिद्वयापेक्षा द्व्यर्थता दूषिता ततोन्या द्व्यर्थताचार्य स्या
९ भिमतेत्यालाशिष्य आह। तन्नहीति॥ ॥ ॥

आचार्य आह॥ न वक्तव्यमिति। इयमाचार्य्यस्य दृष्टिरेतामभिमता॥ इह दन्तोष्ठस्य पाणिपादस्येति निरोहितावयवभेदः समासार्थः॥ तत्रैतस्यां दन्तावभेदे कृतसंख्योपादापित्वाद् द्वि
पदस्यपरिसमाप्तभेदा गीकृता भेदलक्षणो कृतसंख्यादन्तोष्ठलक्षणार्थ द्वयाश्रया द्यनातिपदा वितरेतरयोगद्वन्द्वस्तदावयवकार्यभेदसद्भावाद्यर्थतानास्तीति तरप्प्रभवति
प्लक्षन्यग्रोधानां प्लक्षाः स्निग्धतमा इति। अस्माकं चदेवदत्तस्य चेसजाप्यर्थद्वयसद्भावात्स्ति द्यर्थत्वं सांकाश्यकानां च पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपत
मा इसपरिसमाप्तभेदाः समूहिनः शब्देन प्रसाध्यं तेन चाणशिद्वयापेक्षा द्यर्थ [redacted] ता शब्देन प्रतिपादिताणिशिशब्दस्याप्रयोगादिति द्यर्थत्वाभावान्नरवभावः
अयात्रयतच्च निर्द्धारणमिति कृत्यं षष्ठी यावता पंचमी विभक्त इति पंचम्यातदपवादेनभाव्यं नेषदेषः सर्वत्रैव निर्द्धारणे विभागो स्ति विभक्तग्रहणसामर्थ्याद्यत्र

न वक्तव्यं॥ नेदं पारिभाषिकस्य द्विवचनस्य ग्रहणं॥ किं तर्हि अन्वर्थग्रहणं। उच्यत इति वचनं द्वयोरर्थयोर्वचनं द्विवचनमि
ति॥ एवमपि तरवीपस्य नोरेकद्रव्यस्योत्कर्षापकर्षयोरुपसंख्यानं। तरवीसु नोरेकद्रव्यस्य उत्कर्षापकर्षयोरुपसंख्यानं कर्त्तव्यं॥

विभाग एव शब्देन प्रतिपाद्यते स एव पंचम्या विषयः [redacted] स एव च विभज्योपपदनिमित्तस्य प्रत्ययस्य माथुराः पाटलिपुत्रकेभ्यः आढ्यतरा इति समुदायशब्द
प्रयोगे तु गवां कृष्णा संपन्नक्षीरतमेत्येवमादौ विभागाविभागसंभवान्न पंचमी नापितरप्प्रत्ययो निर्द्धारणाश्रयेण तु षष्ठीसप्तम्यौ भवतो यस्मान्निर्द्धार्य्यते यस्यैकदेशो नि
र्द्धार्य्यते यच्च निर्द्धारहेतुरेतत्त्रयसन्निधाने निर्धारणं भवतीति तत्रैव षष्ठीसमास प्रतिषेधः इह तु नागानामुत्तमो नागोत्तम इति त्रयसन्निधानाभावात्संबन्धसामान्ये ष
ष्ठीति समासो भवत्येवं सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इत्यत्रापि शब्देन समुदायस्य प्रतिपादनाद्विभज्यमानस्य द्विकृतपादाना
द्विभागाविभागसद्भावाद्विभागविषयर्कर्पाभावः प्रतियोग्यपेक्षत्वात्प्रकर्षस्य विकर्ष आक्षिप्ते विभज्यग्रहणादिहाप्यवधारणमाश्रीयते। तेन समुदायशब्द उच्चा एम०
(र्य्यमाणे विभज्योपपदनिमित्तप्रत्ययाप्रसंगः॥ ॥ ॥ ७९

प्रकृतमगानिति। पाटवस्यातिशयेऽपि प्रतियोग्यपेक्षत्वात् प्रकर्षस्य स एवायमिति प्रत्यभिज्ञानात् गुणिन एकत्वात्तस्यैव प्रतियोगित्वायोगात् प्रकर्षप्रत्ययाप्रसंगः इ
ष्टं त्विति। यद्यपि शब्देन गुणी प्राधान्येनोच्यते तथापि गुणाश्रयप्रकर्षनिमित्तत्वात् प्रत्ययोत्पत्तेस्तत्प्रतिगुणस्य प्राधान्यमाश्रित्य गुणप्रधानत्वादित्युच्यते॥
तत्र गुणभेदेन गुणिनो भेदारोपादुपपन्नो भेदाश्रयप्रकर्षनिमित्तः प्रत्ययः। अजादी। नियमार्थं इति। अन्यथा प्रकर्षे योर्विधानादप्रकर्षे विधि
ः स्यादिति सिद्धे विधिरिति स्वरितत्वादतिशायनमित्यस्यानुवर्तनात्तत्रैव पुनर्विधानं नियमार्थमित्यर्थः। प्रशस्यस्य श्र इममपीति। अन्यथा तरतमपोरादेशविधानं स्यादिति न ज्ञाप

पटुर्वान् पटुरासीत् पटुतर इष्ठेमन् इति। सिद्धं तु गुणप्रधानत्वात् सिद्धमेतत् कथं गुणप्रधानत्वाद् गुणप्रधानोऽयं निर्देशः क्रियते। गुणान्तरयोगा
च्चाप्यन्यत्वं भवति। तद्यथा तमेव गुणान्तरयुक्तं वक्तारो भवन्ति॥ अन्यो भवानन्वृत्त इति। अजादी गुणवचनादेव। एवकारः किमर्थो नियमार्थः। नैतदस्ति
प्रयोजनं सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारं नियमार्थो भविष्यति। इष्टतोऽवधारणार्थस्तर्हि। यथैवं विज्ञायेत। अजादी गुणवचनादेवेति मैवं विज्ञा
यि। अजादी एव गुणवचनादिति। किं च स्यात्। न व्यंजनादी गुणवचनात् स्याताम्। प्रशस्यस्य श्रः इदमयुक्तं वर्तेत। मत्रायुक्तं अजादी गुणवचना
देवेत्युक्तं अगुणवचनानामपि अजाद्योः आदेशा उच्यन्ते। नैष दोषः। एतदेव ज्ञापयति। भवत एते अगुणवचनेभ्योऽपि अजादी इति॥ यदयं
अजाद्योः परत आदेशान् शास्ति। एवमपि तयोरिति वक्तव्यं स्यात्॥ तयोः परत इति॥ यदि पुनरयं विधिर्ज्ञायते नैवं शक्यं॥ व्यंजनादी न हि स्याताम्॥
उपाधीनां च संकरः स्यात् पुनर्विधानादजाद्योः ननु चैते विशेषा अनुवर्तेरन्॥ यद्यप्येते अनुवर्तेरन् व्यंजनादी तर्हि न स्याताम्॥ ॥०

कं स्यादजादिभावस्य परिपूर्णिरिति। अजादी इत्यत्रानुवृत्ते प्रशस्यशब्दादजादी भवतः आदेशाश्चैवं व्याख्यानात् व्यंजनादी इति विशेषविहिताभ्यामजादिभ्यां बाध
नात्॥ ज्ञापकत्वे तु नियमाप्रवृत्तिज्ञापनात् स्वशास्त्रेणैवाजाद्योर्विधानाद्व्यंजनाद्योर्बाधस्याप्रसंगः द्विवचनविभज्योपपदे इयसुन् इत्यत्र षष्ठ्यन्तसुपाधिसंकरो न भवति॥
ननु चैत इति। अतिशायने तमबिष्ठनौ द्विवचनविभज्योपपदे ईयसुन्नित्यनुवर्तिष्यत इत्यर्थः॥ व्यंजनादी तर्हीति। यदि च तरप्तमपावनुवर्तेयातां तयोरपि आदेशाः सुः त

स्याज्जो नानुवर्तेत तत्र च विशेषविहिताभ्यां तयोर्बाधप्रसंग एव॥०॥

भा०कै०५ आचार्यप्रवृत्तिरिति नियमार्था प्रवृत्तिर्ज्ञापनद्वारेणाऽजादिभावो ज्ञाप्यते ननु साक्षादन्यथा पुनरपि अंजनाद्यो विधिः स्यात् कृतमिति अजाद्योरिति सप्तम्यंतं न
८० प्रकृतं यत्तु प्रकृतमजादी इति न तदेवात्र संबध्यत इति प्रश्नः अर्थादिति सामर्थ्यादित्यर्थः ॥ ननु च अजादी इति यथाश्रुत विभक्तिसंबंधे अजादि विधानार्थे संभ
वति कथं विपरिणामः शक्य आश्रयितुं नैष दोषः प्रशस्येति षष्ठीश्रवणात् स्थान्यादेश भावावगमादादेशस्य विधीयमानत्वात् प्रधानं संप्रतीयते तत्राजा
स

एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति भवत एतेभ्योऽगुणवचनेभ्योऽजादी इति ॥ यदयमजाद्योरादेशं शास्ति । ननु चोक्तं तयोरिति वक्त
व्यमिति । न वक्तव्यं । प्रकृतमजादिग्रहणमनुवर्त्तते ॥ क्व प्रकृतं ॥ अजादी गुणवचनादेवेति । न हि प्रथमानिर्दिष्टं सप्तमीनिर्दिष्टे न चेह
र्थः ॥ अर्थाद्विभक्तिविपरिणामो भविष्यति । तद्यथा । उच्चानि देवदत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्तमिति गम्यते । देवदत्तस्य गावोऽश्वा
हिरण्यं आढ्यो वैधवेयः देवदत्त इति गम्यते । पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीया निर्दिष्टं च भवति ॥ एवमिहापि पुर
=नन्वजादी इति प्रथमांतस्य प्रातिपदिकार्थ एवार्थो न तु शक्तिविशिष्ट इति कथं पूर्वशक्तिलाभ पूर्वं कथ= ॥ स्तात्प्रथमानिर्दिष्टं सदर्थात्सप्तमीनिर्दिष्टं भविष्यति ॥ ॥ ॥
=संततप्रजनकतो विपरिणामव्यवहारे तथाहः प्रातिपदिकार्थ एवेति ॥२= =ननु प्रथमायाः सप्तमीरूपेण विपरिणाम... विपरिणामो न आह विभक्तीति ॥१=
दी इत्यनुवर्त्तनेनादेशविधौ प्रसंयोगगुणाभावः ततः सामर्थ्याद्विभक्तिविपरिणामः विभक्तिप्रवृत्तेन विभक्त्यंतार्थ उच्यते तस्य पूर्वशक्तिसाम्येन शक्त्यंतरोपजनेन विपरिणा
मव्यवहारः प्रातिपदिकार्थ एव हि नाना प्रक्रियो गात् कर्म्मादिशब्दवाच्य इति स एव विशिष्टशक्तियुक्तो विभक्त्यंतरवाच्यः अथवा तल्लिंके पि भेदे शब्दसारूप्या
त्तादवसायाश्रयेण विभक्तिप्रत्ययस्यागोपादानाभ्यां प्रति पदिकस्य विपरिणामव्यवहारो वसीयते विभक्तेस्तूपचरितो विपरिणामव्यवहारः न हि प्रथमायाः राम०
॥ सप्तमीरूपेण विपरिणामसंभवः ॥ ॥ ॥ ८०
=स एवेति एवं च तदितर सकल... प्रागपूर्वकंपदं किं चिच्छक्तिदेशेन विभक्त्यंतरवाच्यः प्रथमातिरिक्त विभक्त्यंतरवाच्य इत्यर्थः । एवं च प्रकृते ओपश्लेषिकाधिकरणत्वं किम्नत्वेन बोधात् विपरिणामव्यवहार इति भावः ॥२= विपरीति एवं च प्रथमया विशिष्ट प्राति...

प्रशंसा॥ इह प्रत्ययस्य विधीयमानतया प्राधान्यात्तदंगत्वाच्च प्रकृतेः प्रधानेन प्रशंसायाः संबंधस्य न्याय्यत्वात्तस्याः प्रत्ययार्थत्वं मत्वाह। स्त्रीलिंगेनायमिति तत्तश्च पटोः प्रशंसा पटुरूपेति प्राप्नोति। अथ पटुरूपो देवदत्त इति सामानाधिकरण्यप्रसंगः कस्मान्न चोदितः तत्र केचिदाहुः। दोषोपलक्षणायैतदुक्तं अन्ये त्वाहुः सोयमित्यभेदविवक्षायां सामानाधिकरण्यं भविष्यति भेदविवक्षा तु तथा लक्ष्यप्रयोगाभावान्न क्रियते यद्येवं गुणवचनानामाश्रयतो लिंगवचनानि भवंती सतिशायनप्रत्ययांतवदभिमतलिंगवचनयोगाद्दोषाभावः। अत्राहुः प्रकृत्यर्थविशेषणपक्षस्योभयानुग्रहात् न्याय्यत्वादयं परिहारो भाष्यकारेणाश्रि

=फलेहेतौ पंचमी·१= =वाचकद्योतकताभ्यां प्रकृतिप्रत्ययार्थयोरप्यनुग्रहात्·१=

प्रशंसायां रूपप्। स्त्रीलिंगेनायं निर्देशः क्रियते। एकवचनांतेन च। तेन स्त्रीलिंगादेवोत्पत्तिः स्यात् एकवचनांताच्च पुंनपुंसकलिंगाद्द्विवचनबहुवचनांताच्च न स्यात्। नैष दोषः। नायं प्रत्ययार्थः। किं तर्हि प्रकृत्यर्थविशेषणमेतत्। प्रशंसायां यत्प्रातिपदिकं वर्त्तते तस्माद्रूपप् भवति। कस्मिन्नर्थे स्वार्थे इति। स्वार्थिकाश्च प्रकृतितो लिंगवचनान्यनुवर्त्तंते प्रकृतेर्लिंगवचनाभावात्तिङः· प्रकृतेरभावाव चुनं॥ प्रकृतेर्लिंगवचनभावात्तिङः· प्रकृते रूपपः अभावो वक्तव्यः। पचतिरूपं पचतोरूपं पचंतिरूपमिति सिद्धं तु क्रियाप्रधानत्वात् सिद्धमेतत्कथं।

१ क्रियाप्रधानमाख्यातं भवति॥ ॥ ॥

तः अन्ये त्वाहुः प्रशंसामात्रे प्रत्ययविधानादंतरंगत्वात्स्त्रीप्रत्ययेन भाव्यं पश्चात्तु सोयमित्यभिसंबंधात्तदभिधानेप्यंतरंगः स्त्रीप्रत्ययो न विवर्त्तते प्रत्ययार्थविशेषणपक्षे प्रकृत्यर्थविशेषणपक्षे कुमारीरूपेत्यत्र व्यतिरिक्तं वय इति ङीप् कस्मान्न भवति कुमारशब्दात् तस्मिन्नेन ङीपा वयोविशिष्टार्थगतस्य स्त्रीत्वस्य द्योतितत्वाद्रूपबंतात्स्त्रीत्वमात्रमभिव्यंक्तुं टाबेव क्रियते न तु ङीप् एवं तदभिव्यक्तमिति टाप् न प्राप्नोति। नैतदस्ति कुमारीरूपइत्युच्यमाने कुटीशब्दवल्लिंगांतरं प्रतीयेत तस्मादवरूपमभिव्यक्तव्यं स्त्रीत्वमिति टाबुत्पद्यते अयमेव च परिहारः आतिशायिकप्रत्ययानां स्वार्थिकत्वपक्षे कुमारितरेत्यादावभिधानीयः तिङ्‌ प्रकृतेरिति ति ङ्‌प्र

कुमारीरूपः तरप्प्रत्ययाभिमतेभावांकतमः॥१०॥

=स्पष्टार्थं तत्तु न तथा· तिङ्बोधकत्वात्· २= तत्रैव तु आह नव जिरिति·१=

नाहर्षे१

भा०कै०५ एकाचक्रियेति। आख्यातशब्दात् क्रियायाभेदस्यानवगमात् क्रियाया एकत्वमुच्यते भेदबुद्धिरास्यत इत्यादौ केवलक्रियावचनेद्विवचनबहुवचनागात् पचतः पचंती
८१ स्यादौ लकारवाच्यकर्त्तृसमवेतद्वित्वबहुत्वाश्रयो वचनभेद इतिनततः क्रियाभेदसिद्धिः एकत्वाच्च क्रियाया रूपप्रसयांताद्विवचनबहुवचनाभावः द्रव्यप्रधानं नामे
तिप्रसंगे नोक्तं नत्वस्य कृच्छ्रित्वरूतोपयोगः किं देवदत्तः करोतीति। करोति रत्र क्रियासामान्यवचनः तत्रविशेषपरिज्ञानाय किंशब्दः क्रियाविशेषणं प्रवर्त्तते क्रि
याविशेषणत्वाच्च किमित्येतद्वितीयांतं नपुंसकं च प्रकरणादिवशाच्च क्रियाप्रश्नावगतिः गुणद्रव्यविषयस्यापि प्रश्नस्यासंभवात् वाक्यकः किं मुक्तं वहुकरो

=ननु देवदत्तः किं करोतीति कर्मप्रश्नेकथं क्रियामात्रवाचकेनोत्तरम् तत्राह· करोतिरत्रेति·२=

एकाचक्रियाद्रव्यप्रधानंनाम। कथंपुनर्ज्ञायतेक्रियाप्रधानमाख्यातंभवति।द्रव्यप्रधानंनामेति।यत्क्रियांपृष्टस्तिङाचष्टेकिंदे
वदत्तःकरोति।पचतीति द्रव्यंपृष्टः कृताचष्टे।कतरोदेवदत्तः। यः कारकोहारक इति॥ ॥ ॥१॥ ॥

=अस्तत्रभावः उत्सर्गकृतोव्यापारः।अस्मिन्पक्षे किंपदं कर्मपरं तत्प्रकरणादिवशात्क्रियारूपकर्मपरमितिबोध्यं·१= उपग्रहः पदस्मैपदात्मनेपदनिमित्तविशेषः।२= पश्यन्त्यो भावतीयादिधावनार्थस्य··· एकेति· एकपदोपानकारकोपस्··
सुप्यकृत्स्नं तथा किंशाटकं कएसशम्भावारकमिति केचित्तु क्रियाप्रश्नेप्यमूर्त्तत्वमावचनं करोतिमन्यते किं करोति कां क्रियां निर्वर्त्तयतीत्यर्थः। तत्राख्यातवृत्तिप्रश्नवाक्ये
प्रकरणादिवशात्क्रियाप्रश्नावगमादाख्यातेनैवोत्तरोपादानात् कालसंख्यासाधनोपग्रहाभिधानेप्याख्यातस्य क्रियाप्रधानत्वावगमः। एकपदे पात्रार्थापेक्षं च
क्रियाप्रधानत्वमभिधीयते व्रीहीनवहंती त्यादौ व्रीहिद्रव्यसंस्कारार्थत्वादवघातस्याप्राधान्ये पि व्रायघप्रार्थे व्रीहीणां प्राधान्यं तथापि [redacted] साध्यत्वात्
क्रियायाः शाब्दप्राधान्ये ननु व्रीहीणां साधनत्वात् द्रव्यं पृष्ट इतिय द्यपि यः पचतीति तिङं·ते नाप्युत्तरं भवति तथापि सर्वे नाम्नापराम्रष्टपाक क्रियायायं कर्त्तासदेवदत्तइ राम०

=फलांतरस्याप्यारु· व्रीहीनिति· अत्रानुव्यञ्जनारु· अथ वेति·२=

१ समभिधानात् केवलेनाख्यातेनोत्तरस्यादानादाख्यातस्यसाधनमधानत्वा प्रसंगः पदांतरेणाहि द्रव्योपत्तं क्षाल्यगुणभावं क्रिया ८१

=सइतिपदेनेत्यर्थः।क्रियाप्राधान्यनियमत्वआख्यातपदएवेतिभावः।१=

यदितर्हीति। क्रियागतसंख्यापेक्षं वचनमेदं मन्यते। नैतानीति। त्वर्कोदिवाच्यकर्त्रे कर्मगतसंख्यापेक्षो वचनभेद इत्यर्थः॥ तिङोक्तत्वादिति उक्तार्थानामप्रयोग इति न्यायात्॥
एकवचनमपीति। पचतिरूपमित्यत्र तिङोक्तत्वादिति भावः समयादिति। परश्चेति नियमान्नकेवलाप्रकृतिः प्रयोक्तव्येत्येवंरूपात् द्विवचनबहुवचनान्यपीति। तैर
पि समयस्य परिपालनात् यद्यपि प्राप्याप्यादेकवचनेनैव समयः पाल्यत इति परिहारसंभवः तथापि परिहारांतरमाह॥ एकवचनमिति। द्व्येकयोर्द्विवचनैकव
चनेइत्यत्रैकवचनग्रहणं नकर्तव्यं द्व्योर्द्विवचनमित्येवकर्तव्यं तत्र ङ्याप्प्रातिपदिकात्स्वादयो [redacted] भवंतीति संख्यानिरपेक्षमेकवचनमुत्सर्गो भवति तस्य

=नकर्तव्यमिति न ... एकवचनमित्येव ... एकवचनमनभिधानात्... [illegible]

यदि तर्ह्येका क्रिया॥ द्विवचनबहुवचनानि न सिध्यंति॥ पचतः पचंतीति। नैतानि क्रियापेक्षाणि किंतर्हि साधनापेक्षाणि। इहापि नर्हि प्राप्नु
वंति॥ पचतिरूपं पचतो रूपं पचंतिरूपमिति॥ तिङोक्तत्वात्तस्याभिसंबंधस्य न भविष्यति। एक वचनमपि तर्हि न प्राप्नोति समयाद्भविष्यति। द्विव
चनबहुवचनान्यपि तर्हि समयात्प्राप्नुवंति। एवं तर्हि एकवचनमुत्सर्गतः करिष्यते। तस्य द्विवह्वोरर्थयोर्द्विवचनबहुवचने अपवादौ भविष्य
तः॥ एवमपि नपुंसकत्वं वक्तव्यं॥ न वक्तव्यं। उक्तं वा किमुक्तं लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति॥ वृषलादिभ्य उपसंख्यानं कर्तव्यं। वृषल
रूपः। दस्युरूप इति॥ ॥ ॥

द्वित्वबहुत्वयोर्द्विवचनबहुवचनयोरपवादयोर्विधानादेकत्वव सर्थे अपमेदैकत्ववतिच संख्यारहिते अप्याद्यर्थे चाव शप स्थित मेकवचनं तस्मादेकवचनेनैवात्र
समयः पाल्यते ननु द्विवचनबहुवचनान्यपि तिङोक्तार्थान्याप्यमित्यर्थः॥ लिंगमशिष्यमिति शास्त्रोपदेशेन विनापि सिद्धिर्लिंगस्य लोकव्यवहारगम्यात्वृषला
दिभ्य इति वृषलादीनां निष्टत्वात्कुत्सितविषयत्वाच्च प्रशंसायाः तत्राभावं मन्यते न्यासांतराश्रयेण सिद्धिमत्वाह॥ ॥श्री ॥ ॥

भा०कै०५ सिद्धं लिङ्गमिति॥ ननु प्रशंसायामिति सेव सिद्धः प्रत्ययः सर्वस्य हि स्वेन स्वव्यापारेतिशयात् प्रशंसा क्रियते वृषलादीनामप्यसावस्ति। एवं तर्हि ये यदा निंदा प्रतिपादनाय चोररूप इत्यु
८२ च्यते तदा प्रत्ययाप्रसंगात् तद्व्यापकं वैयाकरणस्य यहणमेव वक्तव्यं स सैव पाठ्यवादे वैस्पष्टे प्रशंसा सत्तमात्रात् विवक्षावशाच्च येषामेव प्रशंसा वाच्यत्वं तेषामेव निंदावचनत्वे द
ष्टत्वे यथा राक्षसरूप इति पौरुषातिशय प्रतिपादने प्रशंसा गम्यते निर्घृणत्वप्रतिपादने तु निंदा। अथ यतमवादीनां रूपप्प्रत्ययको विषयविभागः। यावता अतिशा
यनमपि पूजा निंदाविषयं पटुतमः पापीयानिति रूपप्प्रत्ययो ह्युभयविषयः पटुरूपः चोररूप इति॥ उच्यते॥ अतिशायने समानमपि योग्यपेक्षं वैस्पष्टं
तु तन्निरपेक्षमिति स्पष्ट एव विषयविभागः। अप्ययं पलांडु नेसा दौर्गर्ह्यामपि शब्दः कर्मप्रवचनीय संज्ञः ईषदसम। प्रसपानं विधेयतया प्राधान्यात् दर्थत्व

सिद्धं तु प्रकृत्यर्थे वैस्पष्ट्यवचनात् सिद्धमेतत् कथं। प्रकृत्यर्थे स वैस्पष्ट्ये वक्तव्यं। वृषलरूपोयमप्ययं पलांडु नास्करणं पिबेत्॥ चोररूपोयमप्ययम
क्ष्णोरंजनं हरेत्। दस्युरूपोयमप्ययं धावतो लोहितं पिबेत्॥ ईषदसमाप्तौ॥ ईषदसमाप्तौ क्रियाप्रधानत्वाल्लिंगवचनानुपपत्तिः ईषदसमाप्तौ
क्रियाप्रधानत्वाल्लिंगवचनयोरनुपपत्तिः। पटुकल्पः पटुकल्पा पटुकल्पौ। पटुकल्पा इति। एकोयमर्थः ईषदसमाप्तिर्नाम। तस्यैकत्वादे
एकवचनं प्राप्नोति॥ ॥ ॥

मीषदसमाप्तेर्मत्वाह ईषदसमाप्ताविति। ईषदसमाप्तौ यथेष्टं लिंगवचनासिद्धिरित्यर्थः। एकवचनमिति। एकत्वादीषदसमाप्तेः षष्ठीप्रसंगं तु न चोदयति गुणगुणिनोरिह
सर्वदासोयमिति समेदसंबंधस्य विवक्षितत्वात् भेदनिबंधनायाः षष्ठ्याः प्रसंगाद् ग्धेवं गुणवचनानामाश्रयतो लिंगवचनानीति लिंगवचनदोषोपि नास्ति। नैवं शक्यमि
ह गुडकल्पा द्राक्षा बहुगुडो द्राक्षेति यदि ईषदसमाप्तेर्द्राक्षाश्रयत्वं तदा बहुगुड इति न सिध्यति अथ गुडाश्रयत्वं ततो गुडकल्पेति न सिध्यति॥ का पुनर्द्राक्षाया राम०
गुडस्येषदसमाप्तिर्यन्माधुर्येण गुणेन द्राक्षायां गुडशब्दो वर्त्तते तत्स्यासमाप्त्या गुडस्येषदसमाप्तिः॥ ॥७॥ ॥ श्री ८२

प्रकृत्यर्थविशेषणत्वादिति। उभयानुग्रहादेवं हि प्रकृतिरप्यनुगृहीता भवति प्रत्ययोपि द्योतकत्वात्सार्थः एवं च स्वार्थिकत्वात् प्रकृतितो लिंगवचनानि सिध्यंति। यत्र तु नेष्यते
तत्र णाचुः स्त्रियामजितिज्ञापके न तदतिवृत्तिरिति वक्ष्यते॥ प्रकृत्यर्थे चेदिति। ननु गुडकल्पा द्राक्षेत्यादौ गुड इयं द्राक्षेत्यभेदविवक्षायां गुडादयो द्राक्षादिषु वर्तमानाः
प्रत्ययानुत्पादयिष्यंतीति द्राक्षादिगतलिंगवचनोपपत्तौ नास्त्यव्याप्तिदोषः। नैतदस्ति। गुडादयः शब्दा इवार्थाभ्यंतरीकरणेन सोयमित्यभेदसंबंधेन द्राक्षादि
षु वर्तमाना नान्यपरित्यक्तस्वलिंगसंख्या एव वर्तंते तत्र बहुगुडो द्राक्षेत्यादि सिध्यति गुणशब्देभ्यस्त्वपद्वादिभ्यः कल्पादिषु दोषाभावो जातिशब्देभ्यस्तु कल्पादि

प्रकृत्यर्थविशेषणत्वात् सिद्धं सिद्धमेतत्कथं॥ नायं प्रत्ययार्थः। किं तर्हि प्रकृत्यर्थविशेषणमेतत् ईषदसमाप्तौ यस्मात्प्रातिपदिकं वर्तते तस्मा
त्कल्पबादयो भवंति। कस्मिन्नर्थे। स्वार्थ इति। स्वार्थिकाः प्रकृतितो लिंगवचनान्यनुवर्तंते। प्रकृत्यर्थे चेल्लिंगवचनानुपपत्तिः। प्रकृ
त्यर्थे चेल्लिंगवचनयोरनुपपत्तिः। गुडकल्पा द्राक्षा। तैलकल्पा प्रसन्ना। पयस्कल्पा यवागूरिति। सिद्धं तु तत्संबंध उत्तरपदा
र्थे प्रत्ययवचनात् सिद्धमेतत्कथं॥ तत्संबंधे ईषदसमाप्तिसंबंधे उत्तरपदार्थे प्रत्ययो भवतीति वक्तव्यं॥ ॥ ॥

षु भिन्नलिंगसंख्याजात्यभिधाने गुडकल्पा द्राक्षेत्यादौ दोषः। सिद्धं त्विति। यद्यप्युत्तरपदशब्दः समासावयवे रूढस्तथापीह प्रकृत्यर्थस्य पश्चात्प्रत्ययार्थस्य भावात्प्रत्य
यार्थविशेषवाचिनि द्राक्षादिपदे यौगिको वर्तते न गुडादिभ्य उपमानवाचिभ्य उपमेये द्राक्षादौ प्रत्यय इत्युक्तं भवति गुड इवेयं द्राक्षेषदसमाप्ता गुडकल्पेति यद्यप्यु
पमानग्रहणं नोपात्तं तथापि सामर्थ्यादत्रोपमानोपमेयभावव्याश्रीयते पट्वादिभ्योपि तत्रैव प्रत्ययो भवति येस्य परिपूर्णं पाटवं स लोके पटुरिति प्र। सिद्धं तेन तु सई
षदसमाप्तः पटुकल्पो देवदत्त इति तत्संबंध इति वचनादीषत्सादृश्ये प्रत्ययाभावः॥ ॥ ॥७॥ ॥

=ईषदसमाप्तिसंबंधत्वाभावादीषत्सादृश्येस्यार्थः॥१८=

सिध्यतीति। यद्यप्यस्मिन्पक्षे बहुगुडो द्राक्षेत्यादि न सिध्यति द्राक्षादिगतलिंगवचनप्रसंगात्तथाप्युक्तदोषपरिहारात् सिध्यतीति सूक्तं। स्त्रीग्रहणमिति। कर्मव्यतिहारे ण
च् स्त्रियामिति स्त्रीलिंगे भावे णचो विधानात्तदंतात्स्वे प्रत्ययः स्वार्थिकत्वात् स्त्रियामेव भविष्यतीति स्त्रीग्रहणं न कर्त्तव्यं तत्क्रियमाणं लिंगवचनातिवृत्तिं ज्ञापयति। नापी
ति। उत्तरसूत्रे तु ग्रहणादृश्यमाणनियमार्थात् प्रकृतेर्ये लिंगवचने ते एव बहुच्युत्सन्ने भवतः अथवा स्त्रीग्रहणेनानुवृत्तिनियमाभावो ज्ञाप्यते इत्यनुवृत्सति

सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु॥ ननु चोक्तं ईषदसमाप्तौ क्रियाप्रधानत्वात्तल्लिंगवचनानुपपत्तिरिति॥ परिहृत
मेतत्प्रकृत्यर्थविशेषणत्वात्सिद्धमिति। ननु चोक्तं प्रकृत्यर्थे चेल्लिंगवचनानुपपत्तिरिति। नैष दोषः आचार्यप्रवृत्तिर्ज्ञापयति
स्वार्थिका अतिवर्त्तंतेऽपि लिंगवचनानीति। यदयं णचं स्त्रियामनुक्रान्ति स्त्रीग्रहणं करोति। यद्यप्येतत् ज्ञाप्यते बहुगुडो द्राक्षा
बहुतैलं प्रसन्ना बहुपयोपवागूरिति अत्रापि प्राप्नोति। नाप्यतिवर्त्तंते किं पुनरिहोदाहरणं॥ पटुकल्पो मृदुकल्प इति नैत
दस्ति। निर्ज्ञातस्यार्थस्यासमाप्तिर्विसमाप्तिश्च भवति गुणाश्चानिर्ज्ञातः॥ ॥ ॥

वृत्तीयप्याप्रयोगं भवतः अथवा कारस्नोगोणिभ्यां षरजिति निषितकरणेन स्त्रियांङीष येनानुवृत्तिरपि ज्ञाप्यत इत्युभयसिद्धिः किं पुनरिति गुणशब्दानाम न कृपरिमाण
विषयत्वात् गुणसंबंधमात्रेण मंदमध्यमोत्कृष्टगुणे सर्वेत्र वर्त्तनादीषदसमाप्तेरभावं मत्वा प्रश्नः निर्ज्ञातस्येति अयमेवैतेष्वेवं निश्चितस्येत्यर्थः॥ विसमाप्तिश्चेति नन्व
र्थे विशब्दः गुणाश्चानिर्ज्ञात इति इयदेवपाटवमितीयत्तया न ज्ञायते गुणः इदमिदानीमुपन्यस्यति॥ ॥ ॥

इदंतर्हीति। नन्वत्र ननु गुडादयः ईषद्समाप्ताः किंतर्हि द्राक्षादय इति द्राक्षादिभ्य एव प्रत्ययेन भाव्यं नैषदोषः यद्यपेक्षया परस्य ईषद्समाप्तिर्भवति तद्वाचिनः प्रत्ययेन भाव्यं तेन्नेवार्थमभ्यंतरीकृत्य भेदोपचारात् गुड इव गुडो द्राक्षेति माधुर्याद्राक्षायां गुडत्वस्यारोपाद्यारोपनिमित्तस्य माधुर्यस्येषद्समाप्तत्वात् गुडादिभ्यः प्रत्ययोत्पत्तिरविरुद्धा। द्रव्यमपीति। इयता माधुर्येण द्राक्षा गुड उच्यते इत्येवमपरिज्ञानादेतदभेदेन च गुडस्य भेदात् कुं गुडमपेक्ष्य द्राक्षा गुड ईषद्समाप्त उच्यत इत्येवमपरिज्ञाने कृतकल्पमिति आशंसायां भूतवच्चेति भविष्यति प्रत्ययविधानादस्ति क्रियाया ईषद्समाप्तिरूपारिति भावः इतरेतरयोक्रममभिप्रायमप्रतिपद्याह कांतादिति। क्रिया

इदंतर्हि गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना। पयस्कल्पाय वागूरिति। द्रव्यमपि निर्ज्ञातं। इदंतर्हि कृतकल्पं भुक्तकल्पं पीतकल्पं॥ कांतात्प्रत्यय विधानानुपपत्तिः कस्य भूतकाललक्षणत्वात् कल्पादीनां चासमाप्तिवचनात्॥ कांतात्प्रत्ययविधेरनुपपत्तिः किंकारणं। कस्य भूतकाललक्षणत्वात् कल्पादीनां चासमाप्तिवचनात्॥ विसमाप्तिवचनाश्च कल्पादयः। नचास्ति संभवः यद्भूतकालं च स्यात्॥ असमाप्तिश्चेति सिद्धं तु आशंसायां भूतवद्वचनात्॥ सिद्धमेतत्कथं॥ आशंसायां भूतवच्चेति एवमत्र क्तो भविष्यति। इदंचाप्युदाहरणं॥ यज्ञुकल्पो [redacted]म उकल्प इति॥ ननु चोक्तं निर्ज्ञातस्यार्थस्य समाप्तिर्वा भवति समाप्तिर्वा गुणश्चानिर्ज्ञात इति॥ ॥ ॥

फलनिर्वृत्तौ क्रियापवर्गो भवति सति च क्रियापवर्गे न कुतः क्रियाया ईषद्समाप्तिरित्यर्थः सिद्धं त्विति। भविष्यत्कालाया ईषद्समाप्तायाः क्रियाया आशंसमानत्वादिसध्ये जीतः क्तो मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमानकालविषयः क्तो नादपि प्रत्ययैर्भाव्यं ज्ञातकल्पं पूजितकल्पमिति तथा निरं तादपि पचतिकल्पमिति यदपि क्रियैकदेशापवर्गोश्रयेण भूते क्तो विधीयते तदापि कल्पादयो भवंति कृतकल्पं वस्त्रमिति। एवं च कृता कृतादयः एकदेशाकरणेऽपि [illegible] अयाः प्रयोगा उपपन्नाः। सकलक्रियापवर्गाश्रये भूतकालविषयक्त प्रत्ययापेक्षे तु चोद्यमिति समाधाने। एवं च कालत्रयविषयेभ्यस्तिङंतेभ्यः कल्पादयो भवंति। पचतिकल्पं पक्ष्यतिकल्पमपाक्षीत्कल्प

भा॰कै॰५ लोकत इति यावता माधुर्य्येण लोके द्राक्षायां गुडव्यवहारस्तावद्य अयमर्थ इष्टसमाप्तिसंभवः अथ वा गुडगतमाधुर्य्याश्रयेण द्राक्षायां गुडत्वारोपात् गुडजातिसम्भावाच्चेष

८४ द समाप्तं गुडत्वं द्राक्षायां गुड इयं द्राक्षा गुडकल्पा द्राक्षेति प्रयोगः विभा। अथ सुबन्तग्रहणमिति सुबन्तस्य प्रियकुत्सनादिषु वर्त्तनादर्थे लभ्यं सुबन्तत्वमिति प्रश्नः। प्रा

तिपदिकान्मा भूदिति अन्वयव्यतिरेकाभ्यां प्रत्ययानामिह शास्त्रे अर्थवत्तापरिकल्पनात्प्राति पदिकमपि स्वार्थादि पंचके प्रवर्त्तमानं प्रियकुत्सनादिषु प्र

वर्त्तेत इति ततोपि प्रत्ययप्रसंग इति भावः नास्त्यत्र विशेष इति ननु सुबन्तादुत्पन्नो ऽसंख्यो बहुसे च इत्यादौ सात्पदाद्योरिति षत्वप्रतिषेधः स्यात् प्रातिपदिका

=अयंभावः। घटं पटे नेसाहेप्रत्ययत्वागत्स्य कर्त्रादिबोधकत्वं अन्वयव्यतिरेकाभ्यां कल्पितं शास्त्रेणाश्रीयते इति परिपूर्णत्वात् तस्य प्रियकुत्सनादिभियोगो भवति यच्च तु अलदधीसादौ प्रत्ययोनास्ति तत्रालुग्भावः प्रातिपदिकस्यैव कर्मादिबोधकत्वात् परिपूर्णत्वं स्यादिति

लोकतो व्यवहारं दृष्ट्वा गुणस्य निर्ज्ञानं॥ तद्यथा पटुरयं ब्राह्मण इत्युच्यते। यो लघुनोपायेनार्थान् साधयति॥ पटुकल्पोयमित्यु

च्यते॥ यो न तथा साधयति॥ इदं चाप्युदाहरणं गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना पयस्कल्पा यवागूरिति। ननु चोक्तं॥ द्रव्यमनि

र्ज्ञातं इति॥ लोकतो द्रव्यमपि निर्ज्ञातं। विभाषा सुपो बहुच् पुरस्तात्तु विभाषाग्रहणं किमर्थं विभाषा बहुच् यथा स्यात् बहुचा मुक्ते वा

ऽकपमपि यथा स्यात्॥ ॥ ॥

न्नसन्नौ षत्वप्रसंगः नैष दोषः सुबन्ताद् उत्पन्नो ऽव्ययसंज्ञानिबंधनकुत्वादिनिषेधार्थोपलः कर्त्तव्यो बहुच् पूर्वे सत्त्वमताल्प्ये पदादिविधौ प्रत्ययलक्षणमि

तितन्नियमार्थं पदादिविधावेव न पदांतविधाविति एवं च प्रातिपदिकात् उत्पन्नो यत्नः क्रियते सात्पदाद्योर्बहुच्प्रे ति अत एव तुल्यन्यायतया सुपश्चात्म एम॰

नः क्यजित्यस्य सुग्रहणस्याक्षेपः॥ पूर्वेत्र तिङो विधिरिति अस्य ज्ञापनार्थमिह सुग्रहणं तेन पूर्वेत्र प्रातिपदिकात्तिङः ताच्च कल्पादयः सिद्ध्यंतीत्यर्थः॥ ८४

नैतदस्तीति॥ ज्ञापकमंतरेणापि तिङोनुवृत्तिः सिध्यतीत्यर्थः॥ ॥ श्री ॥ श्री श्री श्री

नैतदस्ति प्रयोजनं। प्रकृतामहविभाषा तया वाक्यमपि भविष्यति॥ इदं तर्हि प्रयोजनं। कल्पादयोपि यथा स्युरिति। ननु च बहुजप्युच्यते। कल्पादयोप्युच्यंते। तदुभयं वचनाद्भविष्यति॥ नैवं शक्यं। अक्रियमाणे हि विभाषाग्रहणे अनवकाशो बहुच्कल्पादीन्बाधेत। कल्पादयोप्यनवकाशाः ते वचनाद्भविष्यंति। सावकाशाः कल्पादयः। कोवकाशः। तिङंतान्यवकाशः॥ अथ सुब्ग्रहणं किमर्थं। सुबंतादुत्पत्तिर्यथा स्यात्॥ प्रातिपदिकान्माभूदिति॥ नैतदस्ति प्रयोजनं॥ नास्त्यत्र विशेषः सुबंतादुत्पत्तौ सत्यां प्रातिपदिकाद्वा यद्येवं इहापि नार्थः सुब्ग्रहणेन स्यात् पचात्मनः कपजिति॥ इहापि नास्ति विशेषः सुबंतादुत्पत्तौ सत्यां प्रातिपदिकाद्वा। अयमस्ति विशेषः सुबंतादुत्पत्तौ सत्यां पदसंज्ञा सिद्धा भवति॥ प्रातिपदिकादुत्पत्तौ सत्यां पदसंज्ञा न प्राप्नोति॥ ननु च प्रातिपदिकादुत्पत्तौ सत्यां पदसंज्ञा सिद्धा। कथमारभ्यते नःक्य इति॥ नह्यावश्यं वक्तव्यं॥ सुबंतादुत्पत्तौ सत्यां नियमार्थं॥ तदेव प्रातिपदिकादुत्पत्तौ सत्यां विध्यर्थं भविष्यति॥ इदं तर्हि प्रयोजनं। सुबंतादुत्पत्तिर्यथा स्यात् तिङंतान्माभूदिति। एतदपि नास्ति प्रयोजनं॥ प्रातिपदिका वर्त्तते। अत उत्तरं पठति॥ बहुचि सुब्ग्रहणं सर्वत्र तिङो विधानं बहुचि सुब्ग्रहणं क्रियते। सर्वत्र तिङो विधिर्यथा विज्ञायेत॥ नैतदस्ति प्रयोजनं। प्रकृतं तिङ्ग्रहणमनुवर्त्तते। क्व प्रकृतं। अतिशायने तमबिष्ठनौ तिङश्चेति। एवं तर्हि बहुचि सुब्ग्रहणं सर्वत्र तिङो विधानात् बहुचि सुब्ग्रहणं क्रियते सर्वत्र तिङो विधानात्। सर्वत्र तिङश्चेत्यनुवर्त्तते। तदिहापि प्राप्नोति॥ ननु च तिङ्ग्रहणं निवर्त्तते। अवश्यमुत्तरार्थमनुवर्त्यं॥ अव्ययसर्वनाम्नामकच् प्राक् टेरिति। पचतकि जल्पतकीत्येवमर्थं। यदि सुब्ग्रहणं क्रियते सुप एव सिध्यति॥ ॥ ॥ ॥

मा०कौ०५ एवं स्वर इति जस उदात्तत्वं स्यात् पटुशब्दोकारस्य चेष्यत इत्यर्थः॥ स्वरः प्रातिपदिकत्वादिति। बहुचि कृते प्रकृतिप्रत्ययसमुदायस्यार्थवत्त्वात् समुदायाच्च जसोऽविधा
८५ नात्तस्याप्रसक्तेन्तत्वात्प्रातिपदिकसंज्ञायां समासाप्रवृत्तौ सन्न्याया विभक्तेर्लुकि कृते पटुशब्दस्योकारस्योदात्तत्वं भवति यात्वन्या विभक्तिरुत्पद्यते न सा प्रकृतेः स्व
यव इति तस्या उदात्तत्वाप्रसंगः ननु समासग्रहणस्य नियमार्थत्वात् प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोतीति नैष दोषः अप्रत्यय इति प्रति

=इष्यतः पठिष्यतीति भ्रतः कुवचनग्रहणे कृते नेषदो सुकारस्य कर्मस्वरस्यर्थः। ९=

बहुपटवएवं स्वरः प्रसज्येत। बहुपटव इति चेष्यते। पठिष्यति ह्याचार्यः चितः सप्रकृतेर्बह्वकजर्थमिति स्वरः कथं स्वरः
प्रातिपदिकत्वात्॥ सुब्लुकि कृते प्रातिपदिकत्वात्स्वरो भविष्यति। अथ तुग्रहणं किमर्थं। तुग्रहणं नित्यपूर्वार्थं। तुग्रहणं क्रि
यते। नित्यपूर्वो यथा स्यात्॥ विभाषा माभूदिति। नैतदस्ति प्रयोजनं। न विभाषाग्रहणेन पूर्वे समभिसंबध्यते॥ किं तर्हि
बहुजभिसंबध्यते। विभाषा बहुज् भवतीति। यदा च भवति तदा पूर्वो भवतीति इदं तर्हि प्रयोजनं॥ ॥ ॥

षेधो ज्ञापयति प्रकृतिप्रत्ययसमुदायस्य समासग्रहणेन प्रातिपदिकसंज्ञा न निवर्त्यत इति अन्यथा अप्रत्यय इति प्रतिषेधो नर्थकः स्यात्। नित्यपूर्वार्थमि
ति॥ पुरस्तादेवैष एव मवधारणार्थं तु ग्रहणमित्यर्थः अन्यथा प्रत्ययवत्पूर्वत्वस्यापि विधेयत्वात्प्राधान्याद्विभाषाग्रहणेन संबन्धः स्यादिति भावः॥ किं तर्हि
बहुजिति बहुजेव विधेयत्वात् प्रधानं विभाषाग्रहणेन संबध्यते तस्य तु परदेशव्यावृत्तये पुरस्तादिने न विशेषणे न देशविशेषो निर्दिश्यते ततश्च विभाषा एम० ८५
९ ग्रहणेन पुरस्तादित्यस्य संबंधाभावेन नांचपरार्थत्वादसंबन्धः समत्वात्स्यादिति न्यायात्॥

प्रागुत्पन्नेरितितु शब्दो नियमार्थः। पुरस्तादेव सर्वं भवतीति तेन लिंगसंख्ये प्रकृतिगते भवतः प्रयोगस्तु प्राक् प्रकृतेः पटुकल्पतर इतिन तु परत्वात् कल्पवादिभिर्बाधितत्वा
त्तरप्तमपः स्यान्न भाष्ये नैषदोषः कल्पवादिभिः प्रकर्षस्याद्योतनात्पुनः प्रसंगविज्ञानात् कल्पवाद्यंतात्प्रकर्षद्योतनाय तरप्तमपौ भवतः प्रकृतेरेवेति कल्पवादी

प्रागुत्पन्नेर्ये लिंगवचने च तदुत्पन्नेपि यथास्यात् बहुगुडो द्राक्षा बहुतैलं प्रसन्ना। बहुपयो यवागूरिति। एतदपि नास्ति प्रयोजनं। स्वा
र्थिकोयं स्वार्थिकाश्च प्रकृतितो लिंगवचनान्यनुवर्त्तंते। एवं तर्हि सिद्धे सति यत्तु ग्रहणं करोति तत् ज्ञापयत्याचार्यः। स्वार्थिका अतिवर्त्तं
ते अपि लिंगवचनानीति। किमेतस्य ज्ञापने प्रयोजनं गुडकल्पा द्राक्षा। तैलकल्पा प्रसन्ना पयस्कल्पा यवागूरिखेतत्सिद्धं भवति। तमादि
भ्यः कल्पादयो विप्रतिषेधेन। तमादिभ्यः कल्पादयो भवंति विप्रतिषेधेन॥ तमादीनामवकाशः प्रकर्षस्य वचने ईषदसमाप्ते रवचनं।
पटुतरः पटुतमः कल्पादीनामवकाशः ईषदसमाप्तेर्वचने प्रकर्षस्यावचनं पटुकल्पो मृदुकल्पः उभयवचने उभयं प्राप्नोति। पटु
कल्पतरो मृदुकल्पतरः। कल्पादयो भवंति विप्रतिषेधेन। यद्येवं ईषदसमाप्तेः प्रकर्षे तमादिः प्रत्ययः प्राप्नोति। प्रकृतेरेव च प्रकर्ष इ
ष्यते। तमादिरीषत् प्रधानादपि भवन् यस्य प्रकर्षोस्ति तस्य प्रकर्षं भविष्यति कस्य च प्रकर्षोस्ति। प्रकृतेरेव॥ ॥ ॥

नाप्रातः तमादिरीषत्प्रधा

नायाप्रकृतिः यद्यपि तदर्थस्यैव प्रकर्षः संभवति न त्वीषदसमाप्तेः। असमाप्तिप्रकर्षे समाप्तावीषदर्थाभावान्नास्तीषदसमाप्तेः प्रकर्षः॥ ॥८॥

भा० कौ० ५ अव्ययमन्यतरस्यामिति। प्रातिपदिकस्य प्राक् टेरकज्भवति। सुबन्तस्य वा प्राक् टेः। सेवं प्राक् टेः। सनेनान्यतरस्यां कुत्सिते विशेषेण स्थापयितुमित्यर्थः। तूष्णीमः काम्इति तूष्णीमि

८६ त्वादचौं सा सहः कां भवति अज्ञाताद्यर्थविवक्षायां तूष्णीमित्येव भवति शीले क इति। शीलं स्वभावो नियमश्च अज्ञाताद्यपवादः शीलं शश्वत्स्वभावाश्चेत तद्वास्तूष्णी

=कं कौं टिन्यग्रामात् १=

अव्ययसर्वनाम्नामकच्प्राक्टेः कस्य च दः॥ किमयं सुबन्तस्य प्राक्टेर्भवति। अहोस्वित् प्रातिपदिकस्य। कुतः संदेहः॥ उभयं प्रकृतं अन्यतरस्यां

कं विशेषयितुं। किं चातः। यदि सुबन्तस्य युष्मकाभिः अस्मकाभिः युष्मकासु अस्मकासु युवकयोः आवकयोरिति न सिध्यति। अथ प्राति

पदिकस्य त्वयका मयका॥ त्वयकि मयकि इत्यत्रापि प्राप्नोति॥ अस्तु सुबन्तस्य॥ कथं युष्मकाभिः अस्मकाभिः॥ युष्मकासु अस्मकासु।

युवकयोः आवकयोरिति॥ अनोकारसकारभकारादाविति वक्तव्यं॥ अप्रकरणे तूष्णीमः कां॥ अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः॥ आसि

तव्यं किल तूष्णीकां। शीले कोमलोपश्च। शीले कोमलोपश्च वक्तव्यः॥ तूष्णीशीलः तूष्णीकः॥ इह भिनत्ति छिनत्तीति। अप्रमिकृते शप्राप्नो

ति॥ बहुभुक्तं बहुपीतं बहुचिकृते कल्पादयः प्राप्नुवन्ति। उच्चकैः नीचकैः अकच्चिकृते कादयः प्राप्नुवन्ति। ननु च अन्बहुज्कचोपवादास्ते

बाधका भविष्यन्ति। अन्बहुज्कयोः नानादेशत्वादुत्सर्गप्रतिषेधः। अन्बहुज्कयोः नानादेशत्वादुत्सर्गस्य प्रतिषेधो वक्तव्यः॥ समा

नदेशैरपवादैरुत्सर्गाणां बाधनं भवति॥ नानादेशत्वान्न प्राप्नोति ॥ ॥ ॥ ॥

कउच्यते। इह भिनत्तीति भिन्नदेशत्वाद्विरोधाभावादनेकेनापि प्रत्ययेन प्रदीपेनेव घटादेर्गार्ग्यायणपांचकडीप्प्रत्ययास्तीत्वस्येवाज्ञातादेरेकस्यार्थस्य द्योतनमविरुद्धम् एम०

न्यमानो वार्तिककार उत्सर्गप्रतिषेधं शास्ति भाष्यकारस्तु विरोधमन्तरेणापि सामान्यविशेषभावे बाधकं विशेषविधिमन्यत्रादीदृशत्॥ ॥ ॥ ८६

कविधेरिति अज्ञातः प्रकृष्टः पट्वीसदृश्ये इयविवक्षायां पटुतमक इति भवति छिन्नकतरमिति अनन्तगतौ कारितिक निकनेतरः अर्द्धपिप्पलिकेति कुत्सितमर्द्धपि
प्पल्या इस्वाद्यर्थे विवक्षायां समासे कनेततः कप्रत्ययः नवग्रामक इति समासात्संज्ञायां कन्निति कुत्सायां क्रस्वले वा कनिस सा द्युरा नत्वं भवति पूर्वं तु कनिसति

कविधेस्तमादयः पूर्वविप्रतिषिद्धं। कविधेस्तमादयो भवंति। पूर्वविप्रतिषेधेन। कविधेरवकाशः कुत्सादीनां वचनं प्रकर्षस्यावचनं। पटु
कः। तमादीनामवकाशः प्रकर्षस्य वचनं कुत्सादीनामवचनं पटुतरः पटुतमः उभयवचने उभयं प्राप्नोति। पटुतरकः। पटुतमकः।
तमादयो भवंति पूर्वविप्रतिषेधेन। कदाचिच्छिन्नकतरादयः। कदाचिच्छिन्नकतरादयो भवंति विप्रतिषेधेन। छिन्नकतरं छिन्नकतमं। ए
कदेशिप्रधानस्य समासः। एकदेशिप्रधानस्य समासः कविधेर्भवति पूर्वविप्रतिषेधेन। अर्द्धपिप्पलिका। अर्द्धकोशातकिका। उत्तरप
दार्थप्रधानस्य संज्ञायां कन्विधेः। उत्तरपदार्थप्रधानस्य समासो भवति। पूर्वविप्रतिषेधेन। किं प्रयोजनं। संज्ञायां कन् विधेः संज्ञायां
कन्प्राप्यास्यात्। नवग्रामकं नवनगरकं कदाचित् द्वंद्वः कविधेर्भवति पूर्वविप्रतिषेधेन। प्लक्षकन्यग्रोधकाविति ॥प्लक्षन्यग्रोधकाविति॥

पश्चात्समासे क्रियमाणे अंतोदात्तत्वप्रसंगः अत्र संज्ञाकुत्सनादिहेतुकाविषयभावे नास्ति सामानाधिकरण्यं च पदयोरिति युगपत्कार्ये द्वयप्रसंगादस्ति

भा०कै०५
८७

कुत्सिते॥ स्वशब्देनोक्तत्वादिति अनिर्धारितविशेषेऽर्थे यदा प्रकृतिर्वर्त्तते तदा तद्विशेषद्योतनाय स्वार्थिकः प्रत्ययो विधीयते यदा तु निर्ज्ञातविशेषएवार्थे कुत्सितादयः शब्दा वर्त्तन्ते तदा विशिष्टस्यार्थस्य प्रतीतत्वात् चरितार्थत्वात् प्रत्ययाप्रसंगः प्रतीतप्रत्यायने नवस्थाप्रसंगादिति भावः। कुत्सितस्येति। अर्थांतराश्रयः प्रत्ययइत्यर्थः। अथवे ति। कुत्सितकुत्सायामपि कुत्सितकइति भवतीत्यर्थः। [redacted] स्वशब्देनात्मीयवचनो [redacted] र्थे शब्देभिधेयवचनः स्वोर्थः स्वार्थः स चानेकप्रकारो जातिगुणक्रियासंबंधस्वरूपलक्षणः गोः शुक्लः पाचको राजपुरुषो डित्थ इति तं स्वार्थमभिधाय तेन स्वार्थेन समवेतं संख्यं द्रव्यमाह शब्दः निरपे

कुत्सिते॥ इह कुत्सित कः अनुकंपितकइति स्वशब्देनोक्तत्वात् तस्यार्थे स्य प्रत्ययो न प्राप्नोति। नैष दोषः। कुत्सितस्यानुकंपायां अनुकंपितस्य कुत्सायां। अथवा स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतं॥ ॥ ॥

=वर्त्तत इति जातिं विशेष्यत्वेनावष्टभ्येत्यर्थः॥२= =शब्दान्निष्प्रकारकोपस्थितेरभावादित्यर्थः। निमित्तांतरमिति। शब्दस्वरूपादिरिसंगोत्वत्वादिकमित्यर्थः॥१= [redacted]

स्तइत्यनेनैतत् दर्शयति यथा द्रव्येभिधातव्ये स्वार्थोपेक्ष्यते न तथा स्वार्थेभिधातव्ये यो गतं निमित्तांतरमपेक्षते द्रव्यशब्दे न च इदंतदिति परामर्शयोग्यं वस्त्वभिधीयते तेन जातिशब्दो यदा जातौ वर्त्तते तदा तेपि न स्वरूपं स्वरूपेणैव कीदृशीं जातिमाहेति तदा तेषां स्वरूपं स्वार्थः जातिस्तु द्रव्यं यदा तु जातिविशिष्टं द्रव्यमाह तदा जातिः स्वार्थः शुक्लादयो यदा गुणजातौ वर्त्तन्ते तदा तेषां स्वरूपं स्वार्थः जातिर्द्रव्यं यदा तु गुणे वर्त्तन्ते तदा गुणसामान्यं स्वार्थो गुणो द्रव्यं यदा द्रव्ये वर्त्तन्ते तदा गुणः स्वार्थः समवेतस्य द्रव्य एम०
स्याभिधाने समितिर्लिंगं वचनं विभक्तिं चाहेति संबंधः॥ ॥ ॥ ८७

=स्वरूपं स्वार्थ इति एतेनेतदुक्तं गोः शुक्लः चलो डित्थ इत्यादौ विशेषणतया भासमानस्यासत्वन्तस्य जातिगुणादेः स्वरूपेण नतु व्यन्यायात्तन्तु गोत्वत्वादिनेत्याहुः॥३= =लिंगसंख्यान्वयिनी जातिर्विशेष्यतया भासत इत्यर्थः॥२=

तान्विशेषानिति लिंगादीनामेव परामर्शः॥ लिंगं स्त्रीत्वादि वचनं संख्या विभक्तिः कारकं कर्म्मादि क्वचिल्लिंगसंख्याकारका एव स्वार्थो यथा। स्त्री पुमान्नपुंसकमेको द्वौ बहवः क
र्म करणं संप्रदानमिति। प्रवृत्तिनिमित्तलिंगसंख्याव्यतिरिक्तलिंगसंख्याभिधानं यत्र यथा सनपुंसको भवत गावो विंशतिरिति तत्रायमेव क्रमोपपत्रत प्रवृत्तिनिमित्तव्यतिरि
क्तलिंगसंख्यासंभवः स्त्री पुमानेको द्वौ बहव इति तत्र पुनर्लिंगसंख्ययोरभिधानाभावः यद्यपि लोके पदादुच्चरिताद्युगपत्पंचार्थाः प्रतीयंते शब्दस्य विरम्य व्यापाराभावात्त
थाप्यन्वयव्यतिरेकाभ्यां शास्त्रे संव्यवहाराय कल्पिताभ्यां प्रातिपदिकस्य प्रयोगार्हस्य कल्पितामर्थवत्तां कल्पितन्यायव्युत्पत्तिक्रमवतीमाश्रित्य समुच्यते तथाहि नागृहीतवि
शेषणा विशेष्ये बुद्धिरिति न्यायात् पूर्वं स्वार्थाभिधानेन भाव्यं पश्चात्तद्विशिष्टस्य लिंगाद्याश्रयस्य द्रव्यस्याभिधानेन। ततो भेदापेक्षबहिरंगसंख्यापेक्षया लिंगमंत
रंगमिति तदभिधीयते ततः संख्या सा हि विजातीयक्रियापेक्षसाधनापेक्षया तुल्यजाती[redacted]यापेक्षा अंतरंगा संख्याभिधानानंतरं तु कारकाभिधानं। एतान्विशेषानभि

ति

=एकत्वाद्यपेक्षाद्वित्वादिरूपा=२

समवेतस्य च वचने लिंगं वचनं विभक्तिं च अभिधाय तान्विशेषानपेक्षमाणः स्वं कृत्स्नमात्मानं प्रियकुत्सनादिषु पुनः प्रवर्तन्ते सोविभक्त्यंतः॥ ० ॥

=स्वार्थादिपंचकस्यार्णसेन २ एवं तेनेत्तिरित्युपपादनस्य प्रकृतोपयोगं दर्शयति। तत्रेति।५=

=स्वार्थादिपंचकरूनः विभक्त्यंतस्तस्मात्कात्मानमपेक्षमाणः प्रियकुत्सनादिषु प्रवर्तन्त इत्यन्वयः।९=

धाय स्वार्थादिपंचकवृत्तं कृत्स्नमात्मानमपेक्षमाणः शब्दः प्रियकुत्सनादिषु विभक्त्यंतः पुनः प्रवर्तन्ते[redacted]पुनः शब्दस्तु शब्दस्यार्थे वर्तन्ते विभक्त्यंतास्तिस यः। तत्र कु
त्सितशब्दप्रवृत्तिनिमित्तव्यतिरिक्तायां कुत्सितत्वस्य कुत्सायां कप्रत्यय उपपन्नो भवति यथा प्रकृष्टतम इति प्रकृष्टस्य प्रकर्षे तमप्प्रत्ययः तथा कुत्सितत्वं यदा कुत्स्यते तदास्य संप्र
कुत्सितत्व मिति तदा प्रत्ययः अन्ये त्वाहुः कुत्सानिर्धारितविशेषधर्म्मनिबंधना कुत्सा कुत्सितशब्दप्रवृत्तिनिमित्तं ब्रह्महत्यादिविशेषनिबंधना तु कुत्सा प्रत्यय निबंधनं अनु
कंपितकः इत्यत्रापि प्रयोक्तृधर्म्मेनुकंपायां प्रवृत्तिनिमित्तव्यतिरिक्तायां कप्रत्ययः केचित्तु निरपेक्षत्वं शब्दस्य स्वार्थादिपंचकाभिधाने मुख्यसन्नानपेक्षणात् बुद्ध्युपारूढो
पचरितार्थसत्तामात्रापेक्षणाद्याचक्षते तत्र परिसमाप्तस्वार्थादिपंचकस्य परस्य कुत्सादिषु प्रवृत्तिर्यस्मात्स्वार्थादयः कुत्सादिहेतवः तथाहि कश्चित्स्वार्थं कुत्स्यते पटुकः
पंडितक इति कश्चिल्लिंगेन यथा प्राप्य गां दीवधत्वानं विद्विकोरवकान्द्विपद इति कदाचित्संख्यया यथेदमेकमेव शतमिति शतभरणीय उः खं तदेकस्यैव भरणमिति शतत्वेन पे
ण कुत्सा यत्र तु प्रवृत्तिनिमित्तकुत्सा न संभवेदेवरत्नको दिल्लीकद इति तत्राभिधेयसहचरितधर्म्मान्तराश्रयकुत्साश्रयः प्रत्ययः॥ ॥ त्सायां कुः२ ॥

ति

भा० कै० ५ कथं पुनरिति यदा कुत्सित शब्दो भावसाधनः कुत्सा कुत्सितमिति तदा प्रत्ययार्थपक्षः पदार्थानुक्रमो साधनः कुत्स्यत इति कुत्सितमस्मादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वा

८८ त् वर्त्तमाने कः क्रियावयवव्यपवर्गाश्रयो भूते वा तदा कुत्सितार्थवाचिनः कप्रत्ययो भवतीति समानाधिकरणपक्षोपपत्तिः कः पुनर्वक्ष्यमाणस्य प्रकृत्यर्थविशेषणपक्षस्य समा

नाधिकरणपक्षस्य च विशेषः उच्यते। समानाधिकरणपक्षे उत्पन्नकुत्सो न तु पात्तकुत्सो वा कुत्सितत्वोपलक्षणार्थवृत्तिः प्रत्ययमुत्पादयति प्रकृत्यर्थविशेषणपक्षे तु अङ्गीकृतकु

त्सादेव प्रत्ययेन भाव्यं तत्र प्रकृत्यर्थविशेषणपक्षे अगृहीतकुत्सापदसामानाधिकरण्ये व्यपसर्वनामशब्देभ्यः प्रत्ययेन भाव्यं यदुकोनीचैरसौ देवदत्त इति पदात्वं गीकृत

=नतुकुत्सार्थपदेनवाच्ये:१= नत्वव्यमिति:समानाधिकरणपरे नकुत्सायाउक्तत्वात्प्रकृते:कुत्सादिविशिष्टवाभावादिति भाव:।१=

कथं पुनरिदं विज्ञायते। कुत्सितादीनामर्थे इति। आहोस्वित्कुत्सितादिसमानाधिकरणात् प्रातिपदिकादिति। कश्चात्र विशेषः। कुत्सितादीनामर्थे

चेत् लिंगवचनानुपपत्तिः। कुत्सितादीनामर्थे चेल्लिंगवचनयोरनुपपत्तिः। पटुकं। पटुकः पटुका। पटुकौ। पटुका इति। एकोयमर्थः। कुत्सि

तं नाम। तस्यैकत्वादेकवचनमेव प्राप्नोति। अस्तु तर्हि कुत्सितादिसमानाधिकरणात् प्रातिपदिकादिति। कुत्सितादिसमानाधिकरणादिति चेदति

प्रसंगो यथा टाबादिषु कुत्सितादिसमानाधिकरणादिति चेदतिप्रसंगो भवति यथा टाबादिषु। कथं च टाबादिषु उक्तं तत्र। स्त्रीसमानाधिकर

णादिति चेद्भूतादिष्वतिप्रसंग इति॥ एवमिहाप्यतिप्रसंगो भवति॥ ॥ ॥

कुत्स्यपदान्तप्रयोगः तदा ते भ्य एवाश्रितकुत्सेभ्यः प्रत्ययो भवति नीचैरसकौ देवदत्तक इति लिंगवचनानुपपत्तिरितिपर्यवेष्टलिंगवचनानुपपत्तिरित्यर्थः। एतच्चोपलक्ष

णं कुत्सनमात्रस्य प्रत्ययेनाभिधाने षष्ठ्यपि द्रव्यवाचिनः प्राप्नोतीयर्थः गुणगुणिनोरत्र सर्वदा सोपमित समभेदसंबंधेन षष्ठ्या अप्रसंगे गुणवचनानां चाश्र एाम०

यतो लिंगवचनानि इति दोषपरिहारोप्यत्ति तथापि निर्दोषप्रकृत्यर्थविशेषणपक्षसंभवात्प्रत्ययार्थपक्षो भाष्यकारेणनाश्रितः॥ ॥ ॥ ८८

=पटो:कुत्सेतितावात्येन कुत्सायांप्रत्ययत्वनःसंबंधिविशेषविवक्षायांदेवदत्तस्यपटुक इतिप्रयोगोतिप्रसंगवकुदितिवादितिभाव:।२=

इदं शब्दादि कुत्सितत्वयुक्तार्थवृत्तित्वात्तस्मात्सिद्धं त्विति। येनेधमैणाकुत्सादयस्तद्धर्मयुक्ता योऽभिधायिनः स्वार्थे प्रत्ययविधानमित्यर्थः॥ ठाजा। अप्रत्यय इति प्रत्ययाभावेऽपि पूर्व
पदोत्तरपदयोरन्यतरस्य वा लोप इत्यर्थः॥ भाष्ये तु पूर्वपदलोप उदा हरणमात्रं उ[redacted]वर्णादिति लोपस्य ल इति पूर्वाचार्यसंज्ञानत्वादेः परस्येति इकारलोपः॥ कादेश्यो न भव

=यथाभ्यासाभ्यासनादेः सम्यगनकुशानादिना अन्यकरसादौ॰ घनादिरा इत्यनिधाने इदंश इः भलक्षविषयत्वे नैवबोधकोनत्वकड घनत्वादिमेसिभावः॥ २=

इदं घनकं इदं तैलकं इदं शब्दादिभ्यः प्राप्नोति सिद्धं तु येन कुत्सितादिवचनं तद्युक्तात् स्वार्थे प्रत्ययविधानात्॥ सिद्धमेतत्कथं। येन कुत्सितादयोऽर्था गम्यंते नद्युक्ता
त्स्वार्थे प्रत्ययो भवतीति वक्तव्यं सिध्यति सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु॥ ननु चोक्तं कुत्सितादीनामर्थे चेल्लिंगवचनानुपपत्तिरिति॥ नैष दोषः। नायं प्रत्य
यार्थः। किं तर्हि प्रकृत्य[redacted]र्थविशेषणमेतत् कुत्सितादिषु यत्त्वाति पदिकं वर्त्तते तस्मात्कादयो भवंति। कस्मिन्नर्थे स्वार्थ इति स्वार्थिकाश्च प्रकृतो लिंगवचनान्य
नुवर्त्तंते॥ ठाजादावूर्ध्वं द्वितीयादचः चतुर्थीचतुर्थ्योर्लोपो वक्तव्यः। इह स्यादित्य[redacted]र हस्यतिकः भजापतिदत्तः प्रजा अनजादौ च॥ अनजादौ च लोपो वक्तव्यः।
देवदत्तको देवकः। यज्ञदत्तको यज्ञ[redacted]कः लोपः पूर्वपदस्य च लोपो वक्तव्यः देवदत्तको [redacted]दत्तकः॥ यज्ञदत्तको [redacted]दत्तकः। अप्रत्यये तथैवेष्टः देवदत्तो दत्तः उव
र्णाल्ल इलस्य च। उवर्णादिलस्य च लोपो वक्तव्यः। भानुदत्तको भानुलः। वसुदत्तको वसुलः अथ ठग्रहणं किमर्थं न इकेकृते अजादावित्येव सिद्धं॥ ठग्रहणमु
को द्वितीयत्वे कविधानार्थं। ठग्रहणं क्रियते॥ उक्तः द्वितीयत्वे कविधिर्यथा स्यात्। वायुदत्तको वायुकः। पितृदत्तकः पितृकः॥ अजादि[redacted]लक्षणे हि माथितिं
कादिवत् प्रसंगः॥ अजादिलक्षणे हि माथितिकादिवत् प्रसज्येत॥ तद्यथा। माथितं पण्यमस्य माथितिक इति अकारलोपे कृते तांतादिति कादेशो न भवति॥ एवमिहा
पि न स्यात् द्वितीयादचो लोपे संध्यक्षरस्य द्वितीयत्वे तदादेर्लोपो वक्तव्यः। लहोडः। लहिकः। कहोडः कहिकः॥ ॥ ॥ ॥

नीतिसिंनिपातलक्षणपरिभाषाया अप्रमाणात् यदा चेदेवमान्वादिम्पृष्ठज्विधीयते तदेकादेश्या भावाद जादिलक्षणलोपाप्रसंगान्नार्थमपि ठग्रहणां नदादेरितिसंध्यक्षरात्पर
॥स्य लोपे प्राप्ते तदादेर्लोपवचनं॥ ॥७॥ ॥

तिउ
भतिकः ४

भा०कै०५ शेवलादग्रणादीनामिति॥आदिशब्दः प्रकारे एकसूत्रोपात्तत्वंच साहश्यनिमित्तं स्रुपरिक इति संहिताकार्येनुक्तते लोपे सति स्रुपर्यिक इति स्यात्॥ जश्त्वं नस्यादिति भसंज्ञ
८७ यापदसंज्ञाया अनेन वर्त्निविभक्ताश्रयाया स्तद्धिताश्रयाया श्च द्विविधाया अप्येकसंज्ञा धिकारात् बाधितत्वात्॥ सिद्धमच इति षडंगुलिशब्दे ड.गुलिशब्दस्या
नेन लोपेकृते य स्येति चेसकारलोपः क्रियते न स्यस्थानिवत्वात् भसंज्ञा प्रसकारांतमेनन्नभवति॥ अंतवर्त्निविभक्त्याश्रयात्तु षकारांतस्य पदसंज्ञा ततो भिन्नाव धिक

शेवल स्रुपरि॥ वग्रुणादीनां चतृतीयात्स्वाकृतसंधीनां॥ वग्रुणादीनां च तृतीयाल्लोप उच्यते॥ स्वाकृतसंधीनां वक्तव्यः॥ स्रुप
र्योश्रीः सुपरिकः॥ स्रुपरिलः॥ इह षडंगुलिः षडिक इत्यजादिलोपेकृते पदसंज्ञा न प्राप्नोति॥ तत्र कोरेषः॥ जश्त्वं न स्यात्॥ षडिके ज
श्त्व उक्तं॥ किमुक्तं सिद्धमचः स्थानिवत्वादिति॥ यद्येवं वाचिकादिषु पदहन्तप्रतिषेधः॥ वाचिकादिषु पदहन्तस्य प्रतिषेधो वक्तव्यः
१ वागाशीः वाचिक इति॥ ॥ श्री

त्वात् भसंज्ञा न वाध्यत इति तन्निबंधन जश्त्वप्रवृत्तिः यानुस्वारोपदमिति पद[redacted]संज्ञा सैवैकावधिकत्वात् भसंज्ञा या वाध्यते न च पदांतविधिं प्रति न स्थानिवदिति स्थानिवत्व रा०म०
निषेधो ज्ञावतरतीति विधिशब्दस्य भावसाधनस्य तत्राश्रयणात्॥ इह पदांतस्य कस्यचिद्विधेयत्वात्॥ पदहन्तप्रतिषेध इति परस्य यदुक्तं कार्यं तत्प्रतिषेध इत्यर्थः॥१०॥ ८७

सिद्धमिति। उत्तरपदस्याकृत्स्नसमुदायत्वात्तल्लोपप्रसङ्गानजादेशत्वादृष्ट्या निवृत्तानुत्पत्यावधिकयामसंज्ञाया द्विविधापि परसंज्ञावाच्यत इति पदनिबंधनकार्यो प्रसंगः। अपत्ये दंचो घते संज्ञा शादैकदेशे लुप्ते संज्ञा स्वरूपानुपलंभात्कथं संज्ञिनोवगमः। नहि यस्य देवदत्त इति संज्ञाकृता स देवशब्दाद्दत्तशब्दाद्वा प्रतीयते। न चैकदेशेन समुदायोनुमीयते समुदायस्त्वर्थस्य वाचक इति सूक्तं कल्पयितुमुच्चार्यमाणस्य प्रसादपकत्वादेवं तर्ह्येतु निष्पन्नत्वादवयवानामपि संज्ञात्वं तत्र वर्णानामनुनिष्पादिनां शास्त्रेणानन्वाख्यानादसाधुत्वं। पदानामेवं तु संहतैकदेशानां साधुत्वमिष्यत इति लोपविधानेद्वारेण तदभ्यनुज्ञायते। तदुक्तं। तुल्यायामनुनिष्पत्तौ यो ज्यायान् स साधवः॥ न त्वन्वाख्या

=दयसोऽइतिपाठः। देवदत्तमद्रदत्तसोमदत्तस्तेभ्यो वा ...

सिद्धमेकाक्षरपूर्वपदानामुत्तरपदलोपवचनात्॥ सिद्धमेतत्। कथं। एकाक्षरपूर्वपदानामुत्तरपदस्य लोपो वक्तव्यः। वाचिकः। इह। पित्तं ह्रिप्राप्नोति। षडंगुलिः प्रदिक इति॥ षषष्ठाजादिवचनात्सिद्धं। षषष्ठाजादिवचनात्सिद्धमेतत्। अल्पे ह्रस्वे। किमर्थमिमावुभावर्थौ निर्दिश्येते। न यदल्पं ह्रस्वमपि तद्भवति ॥ यच्च ह्रस्वमल्पमपि तद्भवति॥ नैतयोरावश्यकः समावेशः। अल्पं घृतं अल्पं तैलमित्युच्यते॥ न कश्चिदाह॥ ह्रस्वं घृतं ह्रस्वं तैलमिति॥ तथा ह्रस्वः पटः ह्रस्वः शाटक उच्यते॥ नहि कश्चिदाह अल्पः पटः अल्पः शाटक इति॥०

=अनाख्यायकंशकानितस्यर्थः। अन्वाख्यायते इति क्रियते इत्यर्थः।०= शादिवादिति ...

पते शास्त्रे तेषु दत्तादिवत्स्मृतिरिति॥ दृष्टश्चायं लोके व्यवहारो यत्समुदायस्य संज्ञात्वे तदेकदेशः प्रयुज्यते तत्र समुदायस्य मुख्यसंज्ञात्वमवयवानां त्वनुनिष्पन्नत्वं। अल्पे॥ किमर्थमिति। वं शादिष्वल्पत्वह्रस्वत्वयोः समावेशदर्शनादन्यतरोपादाने न सिध्यतीति प्रश्नः॥ न कश्चिदाहाल्पः पट इति ननु चोच्यत एव लोके अल्पः पट इति॥ पघ प्युच्यते॥ तथा प्यायामविस्तारहीनोल्प उच्यते। यस्त्वायामहीनो विस्तीर्णश्च स ह्रस्व उच्यते न त्वल्पोऽपि तु महान्॥ ॥ ॥

भा०कै०५
९०

कुटीपुंवद्वचनमिति प्रकृतिप्रत्ययसमुदायस्यायं पुंवद्भावो न तु प्रकृतेरिति स्त्रीप्रत्ययो न निवर्त्तते॥ वत्सो। काश्र्ये प्रतिषेध इति तनुत्व इति सामान्येनोपादाना दृतिप्रसंग इति भावः प्रत्ययगुणस्येति छत्रंगत्वात् प्रवृत्तिनिमित्तस्यैवतानवे प्रत्यय इति भावः किंप उपाध्यानर्थक्यमिति। अयं भावः द्वयोरित्यनर्थकं बहूनामपि निर्द्धारणे डतरच् इष्टत्वादजा

=गुणवाचिनो गुणवाचित्वं...=

कुटीशमीशुंडाभ्यो रः। कुटी शमी शुंडाभ्यः प्रत्ययसन्नियोगेन पुंवद्वचनं। कुटीशमीशुंडाभ्यः प्रत्ययसंनियोगेन पुंवद्भावो वक्तव्यः॥ कुटी कुटीरः शमी शमीरः शुंडा शुंडारः इति। किं पुनः कारणं न सिध्यति। स्वार्थिकोयं। स्वार्थिकाश्च प्रकृतितो लिंगवचनान्यनुवर्त्तन्ते॥ उक्तं वा किमुक्तं। स्वार्थिकाः प्रतिव र्त्तन्ते [redacted] पि लिंगवचनानीति॥ वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे। वत्सादिभ्यस्तनुत्वे कार्श्ये प्रतिषेधः वत्सादिभ्यस्तनुत्वे कार्श्ये प्रतिषेधो वक्तव्यः॥ कृशो वत्सो वत्सतर इति मा भूदिति। सतर्हि प्रतिषेधो वक्तव्यो न वक्तव्यः॥ यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्व तलौ भिन्नो णो वक्तव्ये प्रत्यये न भवितव्यं। न च कार्श्यस्य भावात् द्रव्ये वत्सशब्दः किंयत्तदो निर्द्धारणे द्वयोरेकस्य डतरच्। वा बहूनां जातिपरिप्रश्ने॥ किमादीनां वे द्व्यर्थप्रत्ययविधा ना उपाध्यानर्थक्यं॥ किमादीनां द्विबह्वर्थे प्रत्ययविधानात् उपाधिग्रहणमनर्थकं। किंकारणं। बहिर्धारणमिति याबद्द्वयोरेकस्यैव बहिर्धारणाभावइति ॥ अपर आह॥ बहूनां जातिपरिप्रश्ने डतमजिसत्र बहुग्रहणमनर्थकं॥ ॥ निर्द्धारण॰ ॥ ॥ ॥

=...= =...अथ येति॰ ९=

तिपरिप्रश्नेपि कतम शब्दे शेनाद्वा बहूनामित्यत्र जातिपरिप्रश्नग्रहणं न कर्त्तव्यं॥ अथ वा द्वयोरित्यस्य निर्द्धारणं षष्ठ्यां तत्रादेकस्येति न वक्तव्यं॥ बहुग्रहणमिति डतमच उ त्सर्गस्य द्वयोरेकस्य निर्द्धारणे डतरचोपवादस्य विधानात् बहूनामेव निर्द्धारणे डतमच्भविष्यतीत्यर्थः॥ ॥ ॥श्री ॥ यम॰
९०

=अत्यंतासंबद्धप्रश्ने इति अयं भावः। परिप्रश्नस्य निर्ज्ञातविषयत्वेपि अनिर्ज्ञातस्य वस्तुविषयत्वं यत्र संख्याविषयः परिप्रश्नः। यत्र तु गुणक्रियादिविषयः प्रपुनर्थे का विवक्षा नित्यत्वं नितदाह। एकाद्विति। १=

किं कारणं। किमेतदित्याद्रिरिहाग्रंथ्यः। किमः संख्यापरिमाणे इति चेत्तत्र स एवायं ग्रंथ इत्याहुः नहीह संख्याग्रहणमस्ति येनात्य ग्रंथस्योपयोगः स्यात् दंसंतासंबद्धप्रश्ने हायं ग्रंथः एकाद्वि विषयस्यापि प्रश्नस्य संभवात् कोभवान्कतरो भवतोः कठ इति। अवक्षे। क एतयोरर्थयोर्विशेष इति यद्यपि क्रकनोः स्वरभेदस्तथाप्यसत्यर्थे भेदे कुत्सिते कं स्वे सेवक एवं न तु पृथग्योग द्वयं। पृथग्योगकरणाज्ज्ञ्नूनमनयोरर्थयोर्भेदः स तु न निश्चीयत इति प्रश्नः॥ अवक्षेपणमिति येनावक्षिप्यते निंद्यते तद्वाचिनः कन्प्रत्ययो यत्तु स्वयं कुत्स्यते ततः क इति

=एकैकस्मेव यत्र एकत्वजर्थे। यथा कोयं भवान् यथा पंचम्यतीयत्तदस्य सत्वं ग्रमेपत्तमो भवको वा कठः स आगद्यति सेवं जनमव इवाक चोपीहस्यात्। २ = नहीह कि। किमः संख्या परिमाणे इत्यनेन सामर्थ्यात् संबंधायत्वे परिप्रश्नस्य निर्ज्ञातविषयत्वात्तस्य वस्तुविषयत्वाद्दर्श

किं कारणं। किमित्येतस्मिन्प्रश्ने वर्त्तते। परिप्रश्नश्चानिर्ज्ञाते। अनिर्ज्ञातं च बहुषु द्वयोर्वा। पुनर्निर्ज्ञातं। निर्ज्ञातत्वात् द्वयोर्वा परिप्रश्नो न। परिप्रश्नाभावात्ति मेव नास्ति कुतः प्रत्ययः। एकाच्च प्राचां॥ प्राग्वचनं किमर्थं विभाषा यथा स्यात्॥ प्राग्वचनानर्थकं च विभाषाप्रकरणात्। प्राग्वचनमनर्थकं किं कारणं विभाषाप्रकरणात्॥ प्रकृता महाविभाषा तयैव सिद्धं। अवक्षेपणे कन् [redacted] अवक्षेपणे कन्विधीयते॥ कुत्सिते कः। क एतयोरर्थयोर्विशेषः। अवक्षेप णं करणं। कुत्सितं कर्म। अवक्षेपणं वै कुत्सितं करणं। तेन यत्कुत्स्यते तदपि कुत्सितं भवति। तत्र कुत्सितमित्येव सिद्धं भवति॥ एवं तर्हि यस्य रस्य कुत्सार्थमु पादीयते तदिहोदाहरणं व्याकरणकेन नामायं गर्वितः॥ याज्ञिक्यकेन नामायं गर्वितः॥ यस्तु कुत्सार्थमुपादीयते तत्रोदाहरणं॥ देवदत्तको यज्ञदत्तकः॥

विषयविभागः॥ अवक्षेपणं वै कुत्सितमिति नहि स्वयमकुत्सितमवक्षेपणं भवति अवक्षेपणस्यापि कुत्सितत्वमस्तीत्यर्थः। यस्य रस्य कुत्सार्थमिति व्याकरणादिकं स्वय मकुत्सितमप्याश्रयविशेषे मदमुपाहरदवक्षेपणं परस्य भवतीति तद्वाचिनः कन्प्रत्ययः॥ ॥ श्री ॥१॥ ॥२॥

भा०कै०५

१८१

लुम्मनुष्ये॥ लिंगसिध्यर्थेपिति॥ वचनं लभिधेयवदेव भवतिचं चेमनुष्याविजितं रुक्तं हरीतक्यादिषुव्यक्तिरितिलुकितुमनुष्ये लिंगप्रसंगः॥ जीविकार्थे। यास्त्वेताः इ
ताः याः परिगृह्य गृहात् गृहमटंति ता खिसर्थः॥ यास्तु विक्रीयंते ता स्तु न भवति शिवकान् विक्रीणीत इति। समानं दिसने नेति इवार्थ छ प्रकृत इति कस्य सर्वना
म्ना परामर्श इति प्रश्नः आचार्य देशीय आह। छ इति कथं पुनरिति सूत्रेने नैव छस्य विधाना छ विषयस्यानुवादानुपपत्तेरित्यर्थः॥ एवं तर्हीवार्थ इति प्रधानस्यापि छस्य
परामर्शस्यायुक्तत्वात् गुणभूतस्येवेवार्थस्य परामर्शः। छे च विधीयमाने अस्मादेवज्ञापकादिवार्थे समासः स्यश्च स्यैतिवा॥ समासेनोक्तत्वादितिव चनसामर्थ्यात्स्यादिति चे

=विकेतुं प्रतिमा शिल्पवंतो मौर्या इति विवरणकाराः॥ क्षत्रियविशेषैर्मुतम सिद्धः॥ र=

लुम्मनुष्ये॥ किमर्थमनुष्ये लुबुच्यते॥ न लुगेवो च्येत। लिंगसिध्यर्थं लुम्मनुष्ये। लिंगसिध्यर्थमनुष्ये लुबुच्यते। चंचेव चं चावधिके वधिका। खर
कुटी वरखरकुटी॥ जीविकार्थे चापण्ये छ पण्ये इत्युच्यते। तत्रेदं न सिध्यति॥ स्कंदो विशाख इति॥ किं कारणं। मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः
भवेत्तास्तु न स्यात्। यास्त्वेताः संप्रति पूजार्थास्तासु भविष्यति॥ समासाच्च तद्विषयात्॥ तदिसनेन किं प्रति निर्दिश्यते॥ छः॥ कथं पुनः समासो ना
म छ विषयः स्यात्। एवं तर्हीवार्थः यदि तर्हि समासोपीवार्थे प्रत्ययोपि। समासेनोक्तत्वान्नसयोन प्राप्नोति॥ एवं तर्हि द्वाविवार्थौ काकागमनमिवता

=समासार्थः काकागमनतालपतनसदृशो देवदत्तागमनदस्युपनिपातौ। तद्धितार्थः काकवधसदृशो देवदत्तवधः॥ ललपतनमिव। काकतालं काकतालमिव काकतालीयं॥ ॥ ॥
=तद्धितार्थस्तु देवदत्तागमनदस्युपनिपातनिष्ठकाकवधनिरूपके काकागमनतालपतनप्रयोज्यकाकवधसदृशो देवदत्तागमनदस्युपनिपातप्रयोज्यो देवदत्तवध इति॥ र=

छस्त्रीश्यामादिभ्यो नित्यप्रसंगः॥ एवं तर्हीति शस्त्रीश्यामादीनां त्वं तर्भूतेवार्थानामुपमेयप्रधानानामुपमेयान्तरेण संबंधाभावाच्छस्याप्रसंगः काकागमनमिवेति। वृत्तिवि
षये काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ तत्र काकागमनं देवदत्तागमनस्योपमानं तालपतनं दस्यूपनिपातस्य तालेन तु यः काकस्य वधः स देवदत्तस्य दस्यु रा०
नावधस्योपमानमिति वधादिः काकतालीयादिशब्दवाच्यः संपद्यते॥ ॥ श्री ॥ ॥ १८१

अभि॥ अणो गोत्रादिति गोत्रेणा। एव शेष्यते। गोत्रे यो विहितो ऽण् तदंतेभ्यो ऽभिजिदादिभ्यो यञ् यथा स्यात्॥ आभिजित इति एकत्र नक्षत्रेणायुक्तः कालः इत्यण्॥ अ
पत्ये सास्य देवतेति॥ गोत्रमिति च वक्तव्यमिति॥ एवमप्यन्यते। गोत्रं चरणाद्वुञ्‌ स्तत्र गोत्रग्रहणस्य स्वरितत्वात् गोत्रे कुंजादिभ्यश्च्फञिति गोत्राधिकारविहितप्रत्यय
[redacted] स्य ग्रहणो सत्यस्य प्रयोग्रहणं न स्यात् गोत्रत्वातिदेशान्न भवति आभिजितक इति आभिजित्यस्यायमिति वुञ्। आपत्यस्य च तद्धितेनातीति यलोपः। गो

=गोत्रसंज्ञकः प्रत्ययो ऽभवतीति वक्तव्यमित्यर्थः॥१८ [redacted]

अभिजिद्विदभृच्छालावत्। अणो गोत्रात् गोत्रवचनं कर्तव्यं। गोत्रादिति वक्तव्यं इहमाभूत्। आभिजितो मुहूर्तः आभिजितः स्थाली
पाक इति। गोत्रमिति च वक्तव्यं। किं प्रयोजनं। आभिजितकः गोत्राश्रयो वुञ् यथा स्यात् गोत्रमिति शक्यमकर्तुं। कथमाभिजितकः।
गोत्राद्यं स्वार्थिको गोत्रमेव भवति॥ ॥ इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये पंचमस्याध्यायस्य तृतीयेपा
१ दे द्वितीयमाह्निकं॥ पादश्च समाप्तः॥ ॥ ॥ ॥

न्यमिति गोत्रं च चरणाद्वुञ्‌ स्तत्र गोत्रग्रहणेनार्थो न गृह्यते॥ तेन तद्वाचिनः प्रत्ययो विधीयमानो ऽस्मादपि यञो भवति गोत्राधिकारविहितप्रत्ययग्रहणे त्वौ
पगवकः इत्यादावणाद्यंताद्वुञ् न स्यात्॥ ॥ इत्युपाध्यायजय्यटपुत्रकैयटकृते भाष्यप्रदीपे पंचमस्याध्यायस्य तृतीयपादे द्वितीयमाह्निकं॥ पादश्च समाप्तः॥

भा०कै०५ पादशतस्य पादशतग्रहणमिति द्वौ द्वौ माषौ ददाती सादृश्यं तिप्रसंगो न भवत्यनभिधानात्। यस्येति लोपेन सिद्धे पुनर्लोपविधानमपरनिमित्त[redacted]कृत्वार्थे। तेनलोपस्यास्था
९२ स्थानिवत्वाद्विपदिकैसाद्यो पादः यदिति यद्भावः सिध्यति। स्थूला। चंचुत्क इति। सादृश्यपस्य द्योतकः कन्यस्ययः अचंचन्नपियश्चंच न्निवत्वप्रत्ययेस चंचत्को यथामतिः स्वदमा
नप्रभत्वात् अवहन्नपिव हन्निवप्रस्ततमत्वाद्योदृश्यपनेसव हत्कः अनसं भिन्नतरकमिति भेदस्य प्रकर्षान संतगस्योर्युगपद्विवक्षायां पूर्वविप्रतिषेधान्तरपि कृते क्तांतत्वा

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च। पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्। पादशतग्रहणमनर्थकं किंकारणं। अन्यत्रापि दर्शनात्॥
अन्यत्रापि हि वुन्दृश्यते। द्विमोदकिकां ददाति। स्थूलादिभ्यः प्रकारवचने कन्। कन्प्रकरणे चंचत्वहतोरुपसंख्यानं॥ कन्प्रकरणे चंचद्वृहतो
रुपसंख्यानं कर्तव्यं। चंचत्कः बृहत्कः। अनसंतगतोक्तात्तमादयः पूर्वविप्रतिषिद्धं॥ अनसंतगतोक्तात्तमादयो भवंति पूर्वविप्रतिषेधेन। अन
संतगतोक्तात् कन्भवतीत्यस्यावकाशः अनंतगते वचनं प्रकर्षस्यावचनं। छिन्नकं भिन्नकं। तमादीनामवकाशः प्रकर्षस्य वचनमसं
तेगते रवचनं॥ पटुतरः। पटुतमः। उभयवचने उभयं प्राप्नोति। भिन्नतरकं। छिन्नतरकं तमादयो भवंति पूर्वविप्रतिषेधेन तदंताच्च स्वार्थे
=अनसंतगतिक्तोवसंबंधस्तदभावोनसंतगतिः।९=भिन्नकमित्यादेनीवक्तिन्नमित्यादि।९= ×अनसंतगतोक्ता×३ ९कन्वचनं। तदंताच्चस्वार्थेकन्वक्तव्यः भिन्नतरकं छिन्नतरकं॥ ॥ ॥

मा वा त्कन्न प्राप्नोतीत्याह। तदंताच्चेति स्वार्थे पुनरनसंतगतियुक्त एवनतु प्रकृतं स्वार्थे हि स्वार्थे कनिसत्यनसंतगतिने द्योतितात्स्यात् नन्वेषस्वार्थे मात्रे कन्प्रतिपादितो राम०
दृश्यते वासीयथैवंसत्युत्तमभिन्नतरकं भवति बहुतरकं व्याप्यते सुकरतरकमन्यत इति॥ ॥ श्री ॥०॥ ॥ ९२
[redacted]

एवं तर्हि न सामिवचन इति प्रतिषेधेन स्वार्थिकः कन्नस्तीति ज्ञाप्यते न हि सामि कृतादिभ्यो न संतगतौ क्तादि स्यकन्नः प्रसंगो। समासे सामिवचने नैवान संतगतेर्द्योतनात्। समा
सेप्यसत्कत्वां नत्वाभावाच्च कृतग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वचनात् सामिशब्दस्य गतिकारकत्वाभावात्॥ तस्मात् स्वार्थिकस्यैवासौ कनो निषेधः स्वार्थिके कनं ज्ञापयति॥
अथ विग्रहाभावादिति। अन्यत्र विग्रहपूर्विका वृत्तिर्दृश्यते यथा वा योयावक इति यत्र तु विग्रहो नेष्यते तत्र नित्यग्रहणं क्रियते। यथात्रैवमन्निस्वमिति। इहतु महाविभाषाधिकारस्य

=ज्ञापयतीति· ननु सामीति सूत्रस्य प्रसारस्यास्य मानत्वात् कथं ज्ञापकमिति चेन्न· तस्य भाष्यस्य पूर्वसूत्र विहितस्य नायं निषेध इत्यर्थमात्रतात्पर्यकत्वात्· तत्र स्वेप्रकृत्यामिहितत्वादि तस्य भाष्यं प्रकृतिसमुच्चरितसामिशब्देनाभिहितत्वादित्यर्थः यावादेरकतिः

न सामिवचने। सामिवचने प्रतिषेधानर्थक्यं प्रकृत्समिहितत्वात्। सामिवचने प्रतिषेधोनर्थकः। किं कारणं। प्रकृत्समिहितत्वात्। प्रकृत्सामिहितः सोर्थ इ
ति कृत्वा कन्न भविष्यति। अषड क्षाशितंगु। अध्युत्तरपदात् प्रत्ययविधानानुपपत्तिर्विग्रहाभावात्। अध्युत्तरपदात् प्रत्ययविधेरनुपपत्तिः। किं कारणं विग्रहा
भावात् विग्रहपूर्विका तद्धितोत्पत्तिः। न चाध्युत्तरपदेन विग्रहो दृश्यते। तस्मादमितिसधीनर्। तस्मात्तत्रेदमितिसधीनर्प्रत्ययो वक्तव्यः। राजनीदं राजा
धीनं यदिसधीनर् क्रियते सकारस्य इत्संज्ञा न प्राप्नोति इह च स्वधीनोऽत्र धीन इत्संगस्येति इयङुवङौ स्यातां। सूत्रं च भिद्यते यथान्यासमेवास्तु। न
नु चोक्तं अध्युत्तरपदात् प्रत्ययविधानानुपपत्तिर्विग्रहाभावादिति। नैष दोषः। अस्ति कारणं येनात्र विग्रहो न भवति। किं कारणं। नित्यप्रत्ययोयं

" के पुनर्नित्यप्रत्ययः॥ " " "

न किंचिन्निवर्त्तकमस्तीति विग्रहः प्राप्नोति न चासौ दृश्यत इति प्रत्ययविधानं नोपपद्यत इत्यर्थः सूत्रमुपालभ्यन्यासांतरं पठति तस्मात्तत्रेदमितितत्रमहाविभाषाधिका
रात् पक्षे वाक्यं भवति राजनीदमापन्नमिति पक्षे प्रत्ययः राजाधीनमिति भाष्यकारो न्यासांतरं दूषयति यदीति। पदसंज्ञा च नलोपाद्यर्थमवश्यमभ्युपेया ॥ "

भा०कौ०५ तमादय इति । अवक्षेपणे कनि तस्मात्कनः प्रागित्यर्थः ॥ अनुक्त इत्युक्ते सामान्यशब्दत्वात्प्रकर्षस्यानवगमात्प्रकर्षाद्युपाधिद्योतनाय यावद्रूपप्रयोज्यास्तमादय इति
९३ सामर्थ्याज्ज्ञेनिसाः । आमादय इति किमेतिङः । व्ययघादिसारूप्यतत् प्रकृतवचनेमयडि ससमात्प्रागित्यर्थः ॥ बहुतीजासंता इति बहुवचननिर्देशादेतत्समत्रविहितस्य
ग्रहणं । किंतर्हि प्रकृतिरितिप्रकृतस्याभावात् प्रत्ययोपिन प्राप्नोति । एतच्च शौंडादिष्वधिशब्दस्य पाठमनपेक्ष्योच्यते एवं तर्हि बहुव्रीहिरितिवक्ति विषयेसाधनक्रियावा

=पाद्यादीनां चेत्यपिबोध्यं ॥१= =बहुल्याआच्छादने आसंता स्वरवंधुनीतिच ॥१=

तमादयः प्राक्कनः । ज्यादयः प्राग्वुनः । आमादयः प्राङ्मयटः ॥ बहुतीजासंताः समासांताश्चेति ॥ एवं तर्हि नायं प्रत्ययविधिरुपाल
भ्यते ॥ किंतर्हि प्रकृतिरुपालभ्यते । अध्युत्तरपदात्प्रकृतिर्नास्ति । किंकारणं । विग्रहाभावात् ॥ विग्रहपूर्विका समासप्रवृत्तिः ॥ नचाधिना
विग्रहो दृश्यते ॥ एवं तर्हि बहुव्रीहिर्भविष्यति ॥ किंकृतं भवति ॥ भवति वैकश्चिद्दस्य पर विग्रहोपि बहुव्रीहिः ॥ तद्यथा ॥ शोभनं मुखमस्या
ः सुमुखीति । नैवं शक्यं । इहमदधीनमित्सालंकस्वमप्रसज्येयातां । एवं तर्ह्यव्ययीभावो भविष्यति । एवमप्यधेः पूर्वनिपातः प्राप्नोति ॥०॥

चित्वादधिशब्दस्य राजाधिकृतो यस्मिंस्तद्राजाधीनमिति बहुव्रीहिः करिष्यते विशेषणत्वविवक्षया च राजादीनां पूर्वनिपातः यदि तर्हि खद्वाद्विद्राजानमधिगत राम०
इति तत्पुरुषः क्रियते तदाधेः पूर्वनिपातः स्यात् । कचेति शेषाद्विभाषेत्यनेन तस्मिंश्च समुत्तरपदत्वाभावात् खोन स्यात् । एवमप्यधेरिति यथाधिस्त्रीति ॥ ॥ ९३

अधिकरणत्वमकेवलधेयाविभाषादेनत्वात्स्वर्याद्धेयंलक्ष्यतेइतिभावः।१

राजदंतादिष्विति ननु विमत्यर्थे वृत्ते रधेरव्ययीभावो विधीयमानोधिकरणप्रधानः स्यान्नाधेयप्रधानः नैष दोषः साहचर्यादाधेयप्रधानो भविष्यति खमस्त्यये चकृते कुटीर दिव
घ्येथेष्टलिंग संख्यं भविष्यति राजदंतादिषु चाधेयेधिरिसेवं विशिष्य पठितव्यं तेनाधिस्त्रीत्यादावधिकरणपरार्थे परनिपाताभावः॥ अधिश्रौंडादिष्विति अधिरीश्वर इति अधेः क
र्मप्रवचनीयत्वात् यस्य चेश्वरवचनमिति सप्तम्यंतात् राजादयोधिना समस्यंते एवं च ब्रह्मदत्तमपि भवति यथाधिब्रह्मदत्ते पंचालाइसेवं राजन्यधि राजाधीनमिति इतिविषये चाधि
शब्दईशितर्यवर्तते॥ अथवाधिकरण एव सप्तमी इति विषये च समासाधनक्रियावचनोऽधिर्न तु वाक्यस्य स्वपदेनयहो राजन्यधिकृतं राजाधीनं राजायत्तमिति सर्थः॥ विभा

राजदंतादिषु पाठः करिष्यते॥ अथवा सप्तमीसमासोयं॥ अधिः श्रौंडादिषु पठ्यते॥ अपरक्षा॥ विभाषांचेरदिक्स्त्रियां दिग्ग्रहणं किमर्थं॥ अस्त्रियामिती
प्रसुच्यमाने प्राचीनाब्राह्मणी प्राचीना शिखेत्यत्रापि प्रसज्येत॥ दिग्ग्रहणे पुनः क्रियमाणे न दोषो भवति॥ [redacted] अथ स्त्रीग्रहणं किमर्थं॥ नयावता दिक्
शब्दः स्त्रीविषय एव भवति वैकल्पिदिक्शब्दः अस्त्रीविषयोपि॥ प्राक् प्राचीनं उदक् उदीचीनं॥ विभाषाणचंस्त्रियां स्त्रीग्रहणं किमर्थं॥ नस्वार्थिको
यं॥ स्वार्थिकश्च प्रकृतितो लिंगवचनान्यनुवर्त्तते॥ एवं तर्हि सिद्धे सति यत् स्त्रीग्रहणं करोति। तद्ज्ञापयत्याचार्यः॥ स्वार्थिका अतिवर्त्तंते लिंगवचनानीति।
किमेतस्य ज्ञापने प्रयोजनं। गुडकल्पा द्राक्षा॥ तैलकल्पा प्रसन्ना॥ पयस्कल्पा यवागूरितिसेतत्सिद्धं भवति। णचंस्त्रि॥ ॥ ॥

षांचे॥ इह विभाषाग्रहणं पूर्वस्य विधेर्नित्यत्वज्ञापनार्थं द्वयोर्विभाषयोर्मध्ये नित्या विधय इति न्यायात्॥ दिग्ग्रहणमिति॥ अंचत्संतः स्त्रियां वर्त्तमानो दिक्शब्दे वर्त्तते न इति प्रश्नः प्रा
चीनाब्राह्मणीति क्रियानिमित्तको दिग्देशकालनिमित्तको वा ब्राह्मणः णरौ स्त्रियां वर्त्तत इति खस्य प्रतिषेधाभावः॥ प्रागिति प्राची शब्दाद्दिग्वाचिनो दिक्शब्देभ्यः इत्यस्तातेरस्य न
स्यांचेर्लुगिति लुक्कृतं ततो व्ययत्वात् स्त्रीत्वाभावः एवं तु कृते शब्दान्तरत्वान्न पुंसकत्वं॥ ॥ श्री ॥५॥ ॥५॥ ॥

भा० कै० ५ एकस्य सकृदादेश इति॥ अभ्यावृत्तिगणने पञ्चद्वस्य सामर्थ्यात् पुनः पुनरावृत्तिः क्रियायाः क्रियाभ्यावृत्तिस्तद्गणने वर्त्तमानात्संख्याशब्दात्कृत्वसुजित्येवं पूर्वसूत्रार्थमाश्रित्ये
९४ दमुच्यते यदा त्वभिमुखी वृत्तिरभ्यावृत्तिर्जन्म तल्लक्षणोच्यते तदा तदनुवर्त्तनावधी हृदोषाभावः अस्मिन्पक्षे धात्वर्थस्यानुवादक आङ्। यथा अधिपरी अनर्थकाविति। अभिमुखी
वृत्तिरभ्यावृत्तिरित्यस्यार्थेन दोष इति प्रश्नः न चैकस्येति ननु चैकस्यैव पुनः पुनरावृत्तिर्यथा पंच कृत्वो भुंक्ते इति॥ एकैवात्र भुजिक्रिया निवृत्तभेदा आख्यातेनाभिधीयते तस्याः पं
चावृत्तयः पंचसंख्यया गण्यंते सत्यमेवमेतत्॥ अयं त्वत्रार्थः न चैकस्य पुनः पुनरावृत्तिर्भवतीति इह सकृद्भुंक्ते इति भोजनमेककालं विवक्षितं तस्यैककालस्यैकशब्दवाच्यस्य का
लभेदादप्यलब्धभेदस्य पुनरावृत्त्यभावात् अभ्यावृत्त्यभावस्तत्र यथा साधु पचतीति भवसेव मेकं भुंक्ते इति प्राप्ते सकृच्छब्दप्रयोगार्थमिदं सूत्रं॥ अथ क्रियाग्रहणमिति प्रधाने

एकस्य सकृच्च। सकृदादेशोऽभ्यावृत्तिग्रहणं निवृत्तं। किं प्रयोजनं। पुनः पुनरावृत्तिरभ्यावृत्तिः। न चैकस्य पुनः पुनरावृत्तिरभ्यावृत्ति[redacted]
भवति॥ अथ क्रियाग्रहणमनुवर्त्तते उताहो न किं चार्थो उत्तरसा। वाऽमर्थः। इहमाभूत्॥ एको भुंक्ते इति अथानुवर्त्तमानेपि क्रियाग्रहणे इह कस्मान्न
भवति॥ एकः पाक इति। पूर्वयोश्चापि योगयोः कस्मान्न भवति द्वौ पाकौ त्रयः पाकाः चत्वारः पाकाः पंच पाकाः दश पाका इति परिहृतमेतत्॥ ॥

= वन्वैकस्य पाकस्यं वर्थमनन आह ननेदादिति ४८

निवर्त्तमाने गुणस्यापि निवृत्तसामान्यमिति मत्वा प्रश्नः किं चार्थे यदि प्रयोजनमस्ति ननु स्वरितत्वात्क्रियाग्रहणं निवर्त्तमानेप्यभ्यावृत्तिग्रहणेनानुवर्त्तिष्यत इति भावः एको भुंक्ते इति
अनेकोपि भुंक्ते इति तन्निवृत्त्यर्थे एकशब्दप्रयोगः अनुवर्त्तमानेपीति यथा तुमुण्ण्वुलौ क्रियायां क्रियार्थायामित्यादिषु क्रियाप्रदेशेषु पाकादेर्ग्रहणं भोक्तुं पाक इत्यादि सिद्ध
र्थं [redacted] तथेहापि ग्रहणे न भाव्यमिति मत्वा प्रश्नः द्वौ पाकाविति यदैकमेव पाकं द्विष्कृतं तदैतदुदाहरणं स्त्रवणस्य द्वौ पाकाविति एवं राम०
स्यभ्यावृत्तिर्भवतीति तेनैदाच्च पाकस्य भेदो यदा तु पाकस्य द्रव्यभेदात्पाकभेदस्तदाभ्यावृत्त्यभावादेव पूर्वयोगाभ्यां प्रसंगः॥ ॥ ॥ ९४

नैतत्क्रियागणानमिति। अभ्यावृत्तिग्रहणादेव क्रियासंप्रत्ययः सिद्धो न हि द्रव्यगुणयोः स्वभावसिद्धयोः शब्देन प्रतिपाद्यमानयोः [redacted] रभ्यावृत्तिं संभवति साध्यार्थेवि
षयत्वात्तस्याः तस्मात् क्रियाविशेषप्रतिपत्त्यर्थं क्रियाग्रहणं कृतं तेन साध्यस्वभावैव क्रिया गृह्यते पाकादिभिस्तु शब्दैः सिद्धस्वभावाभिधीयते सिद्धतायां घञादिविधाना
त् यद्यपि धातुना साध्यस्वभावा क्रियाभिधीयते तथापि प्रत्ययार्थसम्प्राधान्यात्साध्यत्वं गुणभूतमिति क्रियाग्रहणादिह सिद्धताधर्मयुक्तपाकाद्यग्रहोऽन्यत्र तु धातुवाच्या क्रि

नैतत्क्रियागणानं। किं तर्हि द्रव्यगणनमेतत्। कथं कृत्वाभिहितो भावो द्रव्यवद्भवतीति। इहापि तर्हि द्रव्यगणना [illegible] न्न प्राप्नोति सकृद्भुक्त्वा सकृद्भो
क्तुमिति। पूर्वयोस्त्वपि योगयोः द्विर्भुक्त्वा द्विर्भोक्तुं पंचकृत्वो भुक्त्वा पंचकृत्वो भोक्तुं दशकृत्वो भुक्त्वा दशकृत्वो भोक्तुमिति द्रव्यगणनान्न
प्राप्नोति। यदि खल्वपि पुनः पुनरावृत्तिरभ्यावृत्तिर्द्विरावृत्तेः सकृदिति स्यात्॥ त्रिरावृत्तेर्द्विरिति। एवं तर्हि अनुवर्तते अभ्यावृत्तिग्रहणं न
तु पुनः पुनरावृत्तिरभ्यावृत्तिः॥ ॥ ॥ ॥

याश्रयं पाकादिष्वपि कार्यं भवति। यादृशी च पूर्वसूत्रे क्रियागृहीता तादृश्येवेहानुवर्तेत इत्येकः पाकादिस्त्वापि त्वयं परिहारः उपपन्नः यथोक्तन्यायमप्रतिपद्यमानकृदभिहित इति सामा
न्येनाभिधानात् घञादीनामव्ययकृतां च विशेषमबुध्वा पृच्छति इहापि तर्हीति दोषान्तरं चाह यदि खल्वपीति॥ आद्या हि क्रियाप्रवृत्तिरभ्यावृत्तिर्न भवति॥ ॥ ॥
=आवृत्तिशब्दस्य वृत्तिशब्दपर्यायत्वमुक्तं तदाभिप्रायकः ।१।

=इति यावहारे इत्यर्थः ।१= नन्वेवमपि इत्संत... अभिमुख्यस्यैकप्रस्तावत्वाद्वा कथमत्रानुवर्तते ... स्वरूपमात्रे ... व्यवहारे लोके प्रतीत इत्यर्थः ।२ =प्रत्यय इति जन्मा ।नीत्यर्थः । एकसाध्यकालिसेनैव ... मिलत्कर्तृकर्मत्वे अभ्यावृत्तिव्यवहाराभाव इति ।१=
=ननु गणनेन इति संख्याशब्दानामेवेति पूर्वत्र संख्याग्रहणं व्यर्थमत आह पूर्वसूत्र इति अनियतेति अनियतसंख्याविशेषवाची इत्यर्थः ।४= ननु गणनग्रहणं व्यर्थं पावत्तासंख्यागणनात्मिकैव ... साधकतमत्वात् इत्यर्थः वा ... गाभ्यावृत्ते ... संख्यायाः इत्यत

भा॰कै॰५ किं तर्ह्यभिमुखीति एतच्चाभिग्रहणाल्लभ्यते अन्यथा क्रियावृत्तिगणन इति ब्रूयात् वा चेति अस्ति हि तासां प्रवृत्तीनामेकसाधनानां परस्परापेक्षा एताव स एताः प्रवृत्तय

९५ इति सकृद्भुंक्त इत्यादौ लेकस्या अपि प्रवृत्तेः स्वरूपलाभं प्रत्यभिमुख्यमस्ति ॥ द्रव्यवदपीति । यथा द्रव्यं लिंगसंख्यासाधनैः संबध्यते तथा घञाद्यभिहितो भाव इत्यर्थः अ

व्ययकृदभिहितस्तु भावो लिंगसंख्यासाधनसंबंधाभावात् साध्यस्वभाव एव प्रतीयते न तु सिद्धस्वभाव इति क्रियावदेवासौ भवति न तु द्रव्यवदिति तत्र क्रियाभ्यावृत्तिसद्भावा

त्स एव प्रत्ययः अविप्रतिपत्तिविषयत्वात्तद्वाच्यक्रियापेक्षः स्यात् क्रियावदि सतिदेशः पूर्वसूत्रे संख्याग्रहणमनियतविशेषवाचिभूर्यादिनिवृत्त्यर्थं तेन हि बहुगणशब्दाभ्यां

न्नियमार्थाभ्यां संख्याप्रदेशेषु निखिलग्रहणम् ॥ अभ्यावृत्तिग्रहणं किमर्थं पंचपाका इत्यत्र क्रियामात्रगणने मा भूदभ्यावृत्तिग्रहणे च क्रियमाणे क्रियाग्रहणं क्रियाविशेषो

किं तर्हि अभिमुखी प्रवृत्तिरभ्यावृत्तिः पूर्वा च परे प्रत्यभिमुखी परे च पूर्वां प्रत्यभिमुखी । यदप्युच्यते अनुवर्तमानेऽपि क्रियाग्रहणे इह कस्मान्न भवति ॥ एकः पा

क इति पूर्वयोश्चापि योगयोः द्वौ पाकौ त्रयः पाकाः चत्वारः पाकाः पंचपाकाः दश पाका इति परिहृतमेतत् । नैतत् क्रियागणनं किं तर्हि द्रव्यगणनमेतत् ॥ कृदभिहि

तो भावो द्रव्यवद्भवतीति ॥ ननु चोक्तमिहापि तर्हि द्रव्यगणनान्न प्राप्नोति सकृद्भुक्त्वा सकृद्भोक्तुमिति पूर्वयोश्चापि योगयोः ॥ द्विर्भुक्त्वा द्विर्भोक्तुं पंचकृत्वो भुक्त्वा

पंचकृत्वो भोक्तुं दशकृत्वो भुक्त्वा दशकृत्वो भोक्तुमिति द्रव्यगणनान्न प्राप्नोति । नैष दोषः क्रियागणनाद्भविष्यति कथं । कृदभिहितो भावो द्रव्यवदपि क्रियावदपि ॥

=यथालंभनक्रियायाः प्रतिपशु ... अभिमुख्यत्वेनाभ्यावृत्तिविषये संख्यावाचकात्प्रत्ययः इत्येवार्थः स्यादिति भावः ।४=

गृह्यते नान्यथा तत्रैवं यदेकस्या एव क्रियायाः जन्मलक्षणाः प्रवृत्तयो गण्यंते तदा कृत्वसुजादयो भवंति नान्यदा । यदि तर्हि घञाद्यंतप्रयोगे कृत्वसुजादयो न भवंति कथं द्विरावृत्तिः

द्विः प्रयोगो द्विर्वचनमित्यादयः प्रयोगाः द्विर्वचनेऽचीति ज्ञापकात् क्वचिद्घञाद्यंतप्रयोगेऽपि कृत्वोर्थप्रत्ययो भवतीत्यदोषः गणनग्रहणं यत्र साक्षादभ्यावृत्तिगणनं तत्र प्रत्ययार्थ

मन्यथा क्रियाभ्यावृत्तावविमुच्यमाने सप्तदश प्राजापत्यान् अजांस्तूपराने कवर्णानालभेतेत्यत्राप्यालंभनक्रियाया अभिमुख्येन प्रवृत्तिसंभवात् साधनभेदसामर्थ्यप्रति रा॰म॰

पन्नभेदालंभनक्रियाभ्यावृत्तिविषये साधनगणनवाचिनोऽपि सप्तदशशब्दात्प्रत्ययः स्यात् इह पंचकृत्वः पाक इत्यादौ करोत्यादिक्रियापेक्षः प्रत्ययः यथा पंचकृत्वः पटोऽनेकृत इति ॥ ९५

=क्रियेत इति शेषः ।१=

देवतां॥ नहिपितर इति देवताशब्दस्य जातिविशेषवाचित्वाद्भिन्नजातीयाभिधायिना सामानाधिकरण्याभावात्समासाभावात्प्रकृतिरेव नास्ति कुतः प्रत्यय इत्यर्थः॥ दि

देवतांतान्नाद्यर्थेयत् देवतांतादिसुच्यते॥ तत्रेदं न सिध्यति। पितृदेवत्यमिति॥ नहि पितरो देवता॥ नैष दोषः दिवे
रैश्वर्यकर्मणो देवः तस्मात्स्वार्थे तल् एवं च प्रकृत्वा देवदेव समपि सिद्धं भवति॥ देवात्तल्॥ तलिस्त्री लिंगवचनात
लिस्त्री लिंगवक्तव्यं॥ देवता॥ किं पुनः कारणं न सिध्यति॥ देवशब्दोयं पुल्लिंगः स्वार्थिकश्चायं॥ स्वार्थिकाश्च प्र
कृतो लिंगवचनान्यनुवर्त्तन्ते॥ उक्तं वा॥ किमुक्तं स्वार्थिका अतिवर्त्तन्तेपि लिंगवचनानीति॥ ॥ ॥
ति२

वेरिति। क्रियाशब्दो देवताशब्दो ननु जातिवाची सत्यर्थः॥ देवदेवत्यमिति जातिशब्दत्वे तु देवताशब्दस्य द्वयोः पर्यायत्वाद्युगपत्प्रयोगो न स्यात्॥ ॥ ॥

१ ॥श्री ॥१॥ ॥श्री श्री श्री

मा०कौ०५ लोहिता। लोहिता इति। प्रति पद विधेर्बलवत्वात् एवमेव कन्स्यात् तथा च लोहिनिके ति न सिध्येदिति वचनं निसे लिङ्गार्थे प्रत्यय वाधे प्राप्ते विकल्पार्थं। स्वार्थे विज्ञानात्सिद्धमिति।

९६ = नतु सुवंतात् कन्विधेः सर्वे लिंगवाधकमस्ये तत्तः कनि लोहितिके तिस्त्री प्रत्ययं ... लोहितिकेति ... = ७ अथ त्र षष्ठ्या अलुगुपसंख्यायते। आद्यो नञादिः॥ अपरो मनोज्ञादिः॥ ४ =

लोहितान्मणौ। लोहितात् लिंगवाधनं वा। लोहितात्लिंगबाधनं वे ति वक्तव्यं। लोहितिका लोहिनिकेति॥ अक्षरसमूहे छंदस उपसंख्यानं॥ अक्षरसमूहे छंदस उपसं

ख्यानं कर्त्तव्यं। आश्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं ये यजामहे इति पंचाक्षरं यजेति द्व्यक्षरो वषट्कारः। एष वै सप्तदशाक्षरः छंदस्यः प्रजापतिर्यज्ञमनुवि

हितः॥ छंदसि बहुभिर्वसव्यैरुपसंख्यानं कर्त्तव्यं॥ हस्तौ पृणस्व बहुभिर्वसव्यैः॥ अग्निरीशे वसव्यस्येति। उक्तं स्वार्थे विज्ञानात्सिद्धमिति। अपस्यो वसानाः अ

पो वसानाः स्वश्लोकः स्वश्लोकः कव्योसि हव्यसूदनः। कविरसि। रौद्रेणानीकेन कव्यताये कवितायै॥ आमुष्यायणस्य॥ अमुष्य पुत्रस्य॥ क्षेम्यस्येशे। क्षेम्यम ध्यवस्यति

वा पुवर्चस्यं वर्च एव वर्चस्यं। निष्केवल्यं। निष्केवलं॥ उक्थ्यं उक्थं जन्यं ताभिः सजन्यं ताभिः जनं ताभिः सोमे जनयामि नव्यं नवं॥ प्रणो नव्येभिर्नवैः ब्रह्म पूर्व्ये

पाथः पूर्व्यं तनुषु पूर्व्यं पूर्व्यः पूर्वो हः पूर्व्यो विप्रः पूर्व्यो सः पूर्वो सः सम पूर्व्यः सम पूर्वः॥ अग्निं वः पूर्व्यं पूर्व्यं तं जुषस्व यविष्ठ्य यविष्ठ। होत्र वा हव्य वि

ष्ठं। यविष्ठं त्वेह यच्च यविष्ठ्य यविष्ठ समावद्वसति॥ समावद्वसन्ति समं वसन्ति समं गच्छन्ति॥ समावदेव यज्ञे हस्तौ समं समावद्वीर्यावहा नि समानि समावद्वी

र्याणि करोति॥ समानि। य ईवते लोके॥ य ईवते ब्रह्मणः। य इवते। नवस्य नू नप्त्र न पूर्व्यो च्च। नवस्य नू इसयमा रे शोव क्तव्यः। नप्त्र न पूर्वा च्च प्रत्यया वक्तव्याः

॥ नूनं नूतनं नवीनं नश्च पुराणे प्रातवक्तव्यः॥ नप्त्र न पूर्वा च्च प्रत्यया वक्तव्याः प्रत्नं प्राणं प्रतनं प्रीणं॥ ॥ ॥ ॥

=ञवकुः प्रत्ययः॥ ३२

वसोः समूहे च सत्रोक्तं। अपस्यो वसाना इति। अपशब्दात्तद्वितीया वहुवचनान्तात्प्रत्ययो विभक्तेश्चालुक्॥ ॥श्री ॥७॥ ॥७॥ ॥ एम० ९६

=वसोरितियोगविभागात्स्वार्थे प्रत्ययः॥ १= यथा भवसमूहे छंदसः छंदसि वहुभिर्वसव्यैरितिवार्त्तिकद्वयं वसोः समूहे च सत्राणुक्तं तथापि ... स्वार्थिकत्वं ... अनयोः ... स्वार्थिकयत्संयोगे ... ॥ १ =

तद्युक्तात्॥ यदेव वाचेति॥ इदं त्वया कर्त्तव्यमिति संदेशवाचं श्रुत्वा यत्कर्म क्रियते तत्कार्मणमित्यर्थः॥ श्री ॥७॥ श्री ॥७॥ ॥

=सान्नाय्यग्रहणमंत्रोदनार्थं अनुपाय्यमान्नाय्यलेवमिदं॥=

तद्युक्तात्कर्मणोऽण्। नदि त्वनेन किं प्रतिनिर्दिश्यते॥ वागेव। यदेव वाचा व्याह्रियते तत्कर्मणा क्रियते। अण्प्रकरणे कुलालवरुडनिषादचंडालामित्रेभ्यश्छंदसि॥
अण्प्रकरणे कुलालवरुडनिषादचंडालामित्रेभ्यश्छंदस्युपसंख्यानं कर्त्तव्यं। कौलालः वारुडः। नैषादः चांडालः। आमित्रः॥ भागरूपनामभ्यो धेयः। भागरूपनामभ्यो
धेयो वक्तव्यः॥ भागधेयं रूपधेयं नामधेयं मित्राच्छंदसि धेयो वक्तव्यः। मित्रधेये यतत्व॥ अण् मित्राच्च। अण् मित्राच्चेति वक्तव्यं॥ मैत्रं मित्रः॥ सान्नाय्यानुजाव-
रानुषूकचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसांतपनाः निपात्यंते॥ सान्नाय्यः। अनुजावरः। आनुषूकः। चातुष्प्राश्यः। राक्षोघ्नः। वै-
यातः। वैकृतः। वारिवस्कृतः॥ आग्रायणः॥ आग्रहायणः। सांतपनः। आग्नीध्रसाधारणादञ्॥ आग्नीध्रसाधारणादञ् वक्तव्यः॥ आग्नीध्रं। साधारणं। अयवसम-
रुद्भ्यां छंदस्यञ् वक्तव्यः। आयवसे वृद्धे तेमारुते शर्द्धः॥ नवसूरमर्त्तयविष्ठेभ्यो यत्। नवसूरमर्त्तयविष्ठेभ्यो यद्वक्तव्यः॥ नव्यः सूर्यः मर्त्यः। यविष्ठ्यः॥ क्षेमाद्यः क्षेमाद्यो नव्यः॥२४
क्रमः क्षेम्यस्तिष्ठन्प्रतरणः सुवीरः॥ बह्वल्पार्थाच्छस्कारकादन्यतरस्यां। बह्वल्पार्थात् मंगलामंगलवचनं॥ बह्वल्पार्थान्मंगलामंगलवचनं कर्त्तव्यं॥ बहुशो
देहि। अनिष्टेषु श्राद्धादिषु माभूत्॥ इष्टेषु प्राशित्रादिषु यथा स्यात्॥ अल्पशो देहि॥ इष्टेषु प्राशित्रादिषु मा भूत्॥ अनिष्टेषु श्राद्धादिषु यथा स्यात्॥ प्रति
योगे पंचम्यास्तसिः तसिप्रकरणे आद्यादिभ्य उपसंख्यानं कर्त्तव्यं। आदितः मध्यतः अंततः॥ ॥७॥ ॥ ॥

=क्षेम्यस्त्योऽत्रिमर्थं मंत्रेवचनं तु पत्रकरणमध्येपाठात्त्वनितार्थमितिप्रतीयते॥=

राम राम राम॥ श्री श्री ॥ श्री ॥७॥ ॥श्री श्री ॥७॥ ॥७॥

भा०कै०५ कृभ्वस्ति॥ च्विविधाविति॥ अभूततद्भावग्रहणं वार्त्तिके दृष्टान्तैः सूत्रे प्रक्षिप्तं संपद्यते अस्मिन्निति॥ अभूत्वा भवतीति। संपद्यकर्त्तरि च्विरिति च्विप्रसङ्गः एतच्चोपलक्षणं कृभ्वस्ति योगा
९७ भावात्तत्र च्विप्रसङ्गः तस्मादिदमुदाहरणं भवत्यस्मिन्नृक्षे शालय इति॥ प्रकृतिविवक्षाग्रहणं चेति। तेनात्र प्रकृतेरविवक्षितत्वाच्चेरभावः यदा तु प्रकृतिरेव विकारात्मना संपद्य
माना विकारभेदेन भवनक्रियायां कर्त्री विवक्ष्यते तदा च्विप्रत्ययः अंकुरीभवन्ति यवाः सत्राभूततद्भाव एव प्रकृतिविवक्षाग्रहणेन व्याख्यात इत्याहुः येन रूपेण प्रागभूतं

कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः॥ च्विविधावभूततद्भावग्रहणं कर्त्तव्यं। इह मा भूत्। संपद्यन्ते शालय इति॥ अथ क्रियमाणेऽपि वै अभूततद्भावग्रहणे इह कस्मान्न भव
ति॥ संपद्यन्तेऽस्मिन्नृक्षे शालय इति। प्रकृतिविवक्षाग्रहणं च॥ प्रकृतिविवक्षाग्रहणं कर्त्तव्यं॥ समीपादिभ्यः उपसंख्यानं कर्त्तव्यं॥ समीपीभवति॥ अभ्याशीभव
ति॥ अन्तिकीभवति॥ किं पुनः कारणं न भवति॥ न ह्यसमीपं समीपं भवति। किं तर्हि असमीपस्थं समीपस्थं भवति॥ तत्तर्हि वक्तव्यं न वक्तव्यं॥ तात्स्थ्यात् ताच्छब्द्यं
भविष्यति॥ अव्यक्तानुकरणात्॥ किमर्थश्चकारः स्वरार्थः। चितोऽन्त उदात्तो भवतीत्यन्तोदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनं॥ एकाजयं तत्र नार्थः स्वरार्थेन च
कारेणानुबन्धेन प्रत्ययस्वरेणैव सिद्धं। अत उत्तरं पठति॥ डाचि चित्करणं विशेषणार्थं डाचि चित्करणं क्रियते। विशेषणार्थं क विशेषणार्थेनार्थः॥ लोहितादिडाज्
भ्यः क्यषिति। डा इति उच्यमाने इडा इत्येतस्मिन्नपि प्रसज्येत॥ अर्थवद्ग्रहणे नानर्थकस्येत्येवमेतन्न भविष्यति॥ इदं तर्हि नाभाप्टथिव्यानिहितोदविद्युतत्। तस्मा
च्चकारः कर्त्तव्यः॥ मद्रात्परिवापणे॥ मद्राच्चेति वक्तव्यं। मद्राकरोति॥ समासान्ताः॥ अन्तग्रहणं किमर्थं। अन्तो यथा स्यात्॥ ॥ ॥ ॥

कारणं तेन रूपेण तत्स्वभावोऽभूततद्भाव इत्याश्रयणादिति प्रसंगाभावः संपद्यकर्त्तरि त्वादेवाभूततद्भावे लब्धे पुनस्तदुपादानाद्यथोक्तविशेषलाभोऽर्थ वाजन्मग्रहणे कर्त्तव्ये भूतद्भा
वग्रहणाद्यथोक्तार्थपरिग्रहः॥ विकारशब्दाच्च प्रकृतिविकारभेदविवक्षायां प्रकृतौ विकारावस्थां प्राप्नुवत्यां वर्त्तमानात्त्वार्थे च्विप्रत्ययः समीपादिभ्य इति। प्रकृतिविकारभावाभावान्न
प्राप्नोतीति वचनं॥ तात्स्थ्यादिति॥ असमीपस्थस्य समीपस्थत्वभावात्सिद्धं सूत्रेण प्रत्यय इत्यर्थः॥ समासान्तग्रहणमिति समीपवचनमन्तशब्दं मत्वा प्रश्नः अवयववचनाश्रयेणोत एम०
संपद्यमानद्रव्यमिति ... रमाह॥ अन्तो यथा स्यादिति। इतरेतरगृहीताभिप्रायमाह॥ ॥ ॥ ९७
... अभूततद्भावग्रहणं ... संपद्यकर्त्तृग्रहणम् ...

नैतदस्ति प्रयोजनं। प्रत्ययपरत्वेनाप्येतत्सिद्धं॥ इदंतर्हि प्रयोजनं॥ तद्ब्रहणेन यद्ग्रहणं यथा स्यात्॥ कानि पुनस्तद्ग्रहणस्य प्रयोजनानि प्रयोजनमव्ययीभावद्विगुद्वंद्वतत्
पुरुषबहुव्रीहिसंज्ञाः अव्ययीभावः प्रयोजनं प्रतिराजं उपराजं अव्ययीभावश्च समासो नपुंसकलिंगो भवतीति नपुंसकलिंगता यथा स्यात्॥ नैतदस्ति प्रयोजनं॥
लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्य। इदंतर्हि प्रयोजनं। नाव्ययीभावादतोम्त्वपंचम्याः इत्येषु विधिर्यथा स्यात्॥ अव्ययीभाव द्विगु द्विगुसंज्ञा च प्रयोजनं। पंच
गवं दशगवं। द्विगुश्च समासो नपुंसकलिंगो भवतीति नपुंसकलिंगताय था स्यात् नैतदस्ति प्रयोजनं। लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्य॥ इदंतर्हि प्रयोज
नं द्विपुरी त्रिपुरी द्विगोरकारांतादिति ईकारो यथा स्यात्॥ एतदपि नास्ति प्रयोजनं। पुरशब्दो यमकारांतः। नेन समासो भविष्यति॥ आनश्चाकारांतः॥ एवं स्याह। इमे
मेस्त भिक्षे कृतसंचयानि पुराणि राज्ञां विनयंति कोप मिति॥ इदंतर्हि प्रयोजनं द्विधुरी त्रिधुरी। द्विगोरकारांतादिति ङीप् यथा स्यात् द्विगुद्वंद्व। द्वंद्वसंज्ञा
च प्रयोजनं। वाक्त्वचं। स्रक्त्वचं। द्वंद्वश्च समासो नपुंसकलिंगो भवतीति नपुंसकलिंगता यथा स्यात्। नैतदस्ति प्रयोजनं लिंगमशिष्यं लोकाश्रयत्वा
ल्लिंगस्य॥ इदंतर्हि प्रयोजनं॥ कोशश्च निषच्च कोशनिषदं [redacted] कोशनिषदिनी द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिरिति इनिर्यथा स्यात्॥ द्वंद्व।
तत्पुरुष। तत्पुरुषसंज्ञा च प्रयोजनं॥ परमधुरा उत्तमधुरा परवल्लिंगं द्वंद्वतत्पुरुषयोरिति परवल्लिंगता यथा स्यात्॥ नैतदस्ति प्रयोजनं॥ उत्तरपदार्थ
प्रधानस्तत्पुरुषः॥ इदंतर्हि प्रयोजनं अर्द्धधुरा॥ एतदपि नास्ति प्रयोजनं। लिंगमशिष्यं लोकाश्रयत्वात् लिंगस्य इदंतर्हि निर्धुरः॥ अव्ययं तत्पुरुषे
प्रकृतिस्वरं भवतीत्येष स्वरो यथा स्यात् तत्पुरुष॥ बहुव्रीहि॥ बहुव्रीहिसंज्ञा च प्रयोजनं उच्चधुरः नीचधुरः॥ बहुव्रीहौ प्रकृत्या पूर्वपदं भवतीत्ये

=किं क्षेपे इत्यनेन विहितः समासोऽन्यस्तेन तु षष्ठी सूत्रेण विहितः ।५=   =बहुव्रीहौ संख्येये डजबहुगणात्‌ ॥२=

न पूजनात्‌ । इदं विप्रतिषिद्धं को विप्रतिषेधः । परिगणिताभ्यः प्रकृतिभ्यः समासांतो विधीयते । न च तत्र काचित्पूजनांता प्रकृतिर्निर्दिश्यते ।
नैतद्विप्रतिषिद्धं । नैवं विज्ञायते । याभ्यः प्रकृतिभ्यः समासांतो विधीयते न चेत्ताः पूजनांता भवंतीति । कथं तर्हि न चेत्ताः पूजनात्परा भवं
तीति ॥ पूजायां स्वतिग्रहणं कर्त्तव्यं । सुराजा अतिराजा । क्रमाभूत्परमगावः । उत्तमगावः ॥ प्राक्‌ बहुव्रीहिग्रहणं च । प्राक्‌ बहुव्रीहिग्र
हणं च कर्त्तव्यं । इह माभूत्‌ । स्वक्षः अत्यक्षः इति । किमः क्षेपे । क्षेप इति किमर्थं । कस्य राजा किंराजः । क्षेप इति शक्यमकर्त्तुं कस्मान्न
भवति कस्य राजा किंराज इति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति । बहुव्रीहौ संख्येये ड अकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं
निस्त्रिंशाद्यर्थं । ड अकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं कर्त्तव्यं ॥ किं प्रयोजनं ॥ निस्त्रिंशाद्यर्थं निस्त्रिंशानि वर्षाणि निश्चत्वा
रिंशानि वर्षाणि । अन्यत्राधिकलोपात्‌ । अन्यत्राधिकलोपादिति वक्तव्यं ॥ इह माभूत्‌ । एकाधिका विंशतिः ॥ एकविंशतिः द्व्यधिका
विंशतिः । द्वाविंशतिः अव्ययादेरिति च वक्तव्यं । इह माभूत्‌ ॥ गोचत्वारिंशदिति ॥ न तर्हि वक्तव्यं । यद्यप्येतदुच्यते ॥ अथ वै तर्हि अन्य
त्राधिकलोपादित्येतन्न क्रियते ॥ ॥ श्री ॥ श्री ॥

ऋक्पूरब्धूः॥ कथमिति॥ यद्यक्ष इति स्वरूपग्रहणम् अक्षे एवं पदे धुरंतात् समासांतो न भवतीति तदा नचेदक्षधुरं तः समास इत्ययं प्रश्नो भवति॥ यदा त्वक्ष इत्यर्थग्रहणं तदा नचेद

क्षः समासार्थ इत्ययं पक्षउभययथा च दोषप्रसंग इति प्रश्नः॥ अक्षधुरंत इत्स्यायमर्थोऽक्षशब्दस्य यः समीपे धूः शब्दः तदंतः समास इति॥ नचेदक्षस्य धूरिति अक्षस्य स्वरूपे क्षया

धिकरणत्वात् अनक्ष इत्यधिकरणसप्तमी चक्रसंबद्धः काष्ठविशेषः शकटावयवोऽक्षः॥ अक्षो॥ अदर्शनादितिवचनाद् छ्रीवाक्षीस स्थितदशार्थग्रहः जितिरिहाक्षिशब्द उपात्तः

ऋक्पूरब्धूः॥ अनक्ष इति कथमिदं विज्ञायते॥ नचेदक्षधुरंतस्समास इति॥ आहोस्वित् नचेदक्षः समासार्थ इति किं चातः॥ यदि विज्ञायते॥ नचेदक्षधुरंतः

समास इति॥ सिद्धमक्षस्य धूः अक्षधूरिति॥ इदं तु न सिध्यति॥ दृढधूरयमक्षः॥ अस्तु तर्हि नचेदक्षः समासार्थ इति सिद्धं दृढधूरक्ष इति॥ इदं तु न सिध्यति

॥ अक्षस्य धूः अक्षधूरिति॥ एवं तर्हि नैवं विज्ञायते अक्षधुरंतः समास इति नापि नचेदक्षः समासार्थ इति॥ कथं तर्हि नचेदक्षस्य धूरिति॥ एवं च कृत्वा ना

पि नचेदक्षधुरंतस्समास इति विज्ञायते नाप्यक्षः समासार्थ इति॥ [redacted] अथ चोभयोर्न भव

ति॥ अक्ष्णोऽदर्शनात्॥ अदर्शनादित्युच्यते॥ तत्रेदं न सिध्यति॥ कंबलाक्षं अदर्शना दितिशक्यमवक्तुं॥ कथं ब्राह्मणाक्षि॥ अप्राण्यंगादिति वक्तव्यं॥

=लवणमक्षीवेसुपनितसमासः॥ ९२

लवणाक्षमिसाद्युदाहरणं दर्शनवाचिलेतु ब्राह्मणाक्षी साटोसमासांताभावः कंबराक्षमिति॥ अप्राणांब दुछिद्रकं मुखावरणमुच्यते तेनाक्ष्णाः पश्यंतीति दर्शनत्वात् समा

सांताप्रसंगः एवं गवाक्षेपि॥ अप्राण्यंगादिति॥ तेन गवाक्षकं बराक्षे सिध्यतः॥ श्री ॥श्री ॥ श्री॥ ॥श्री॥ ०॥

भा०कै०५ अच॥ अदृष्टा चतुर्णामिति। अर्थप्रदर्शनमेतद्दृष्टानि चत्वार्यस्येति। अन्यपदार्थे बहुव्रीहयः आद्यास्त्रयः कृत्वा। अह्नो। अहृचचुनार्थकमिति॥ अन्हए
९९ नेष्वद्इसेनावत्तत्सूत्रमज्विधानार्थं कर्त्तव्यं टजचोरत्र विप्रोपाभावात्॥ एत्रान्हाहाः पुंसीति वचनात् स्त्रियां वृत्त्यभावात् तत्रान्हष्टखोरेवेति नियमाद्धि लोपाभावात् द्वलो

अचतुरविचतुरसुचतुर। आद्यास्त्रयो बहुव्रीहयः। अदृष्टाश्चतुर्णां अचतुरः। विदृष्टाश्चतुर्णां विचतुरः। सुदृष्टाश्चतुर्णां सुचतुरः। ततः परे एकादश
द्वंद्वाः। स्त्रीपुंसधेन्वनडुहऋक्सामवाङ्मनसअक्षिभ्रुवदारगवऊर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवअहर्दिव ततोऽव्ययीभावः। सहरजसा सर
जसं। ततस्तत्पुरुषः। निश्चितं श्रेयो निःश्रेयसं। ततः षष्ठीसमासः। पुरुषस्यायुः पुरुषायुषं। ततो द्विगुर्द्वे आयुषी द्व्यायुषं त्रीण्यायूंषि त्र्यायुषं।
ततो द्वंद्वः ऋक्च यजुश्च ऋग्यजुषं। जातादय उक्षांताः समानाधिकरणाः। जातः उक्षा जातोक्षः। महानुक्षा महोक्षः। वृद्ध उक्षा वृद्धोक्षः॥
ततोऽव्ययीभावः। शुनः समीपं उपशुनं। ततः सप्तमीसमासः। गोष्ठे श्वा गोष्ठश्वः। चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानं॥ चतुरः अच्प्रकर
णे त्र्युपाभ्यामुपसंख्यानं कर्त्तव्यं॥ त्रिचतुराः। उपचतुराः। ब्रह्महस्तिभ्यां वर्चसः। पल्यराजभ्यां चेति वक्तव्यं। पल्यवर्चसं। राजवर्चसं। अहः
सर्वैकदेश। अहर्ग्रहणं द्वंद्वार्थं द्रष्टव्यं किमुच्यते द्वंद्वार्थमिति॥ न पुनस्तत्पुरुषार्थमपि स्यात्। तत्पुरुषाभावात्॥ न हि राज्यंतोऽहरादिस्तत्पु
रुषोस्ति। अपन्होन्हएतेभ्यः। अन्होन्हवचनार्थं कं चान्हष्टखोर्नियमवचनात्। अन्होन्हवचनमनर्थकं। किं कारणं। अन्हष्टखोर्नियमवच
नात्। अन्हष्टखोरेवेति नियमार्थं भविष्यति। अनसंतान्नपुंसकाच्छंदसि। अनसंतान्नपुंसकाच्छंदसि चेति वक्तव्यं। ब्रह्मसामं ब्रह्मसामं देवच्छंदसं
देवच्छंदसः॥ ॥ श्री ॥७॥ राम०

पेन प्रवो ह्लादयः सिद्धा इति नार्थोऽन्हादेशविधानेनेत्यर्थः॥ ॥श्री ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥ ९९

बहु । अन्तोदात्तार्थमिति सक्थ्यं चाक्रान्तादिति विभाषांतोदात्तत्वं विधीयते नत्वान्तोदात्तात् ङी. षङी. षोन्तोस्ति विशेषो ङी. पउदात्त निवृत्ति स्वरे गोदात्तत्वाद्युदात्तपूर्वपदप्रकृतिस्वरे
गानुदात्तत्वं तदा ङी. विसर्जनीकारस्योदात्तत्वं भवति ङी. पित्स्वस्वनुदात्तईकारः स्यादिति सर्थः । चक्रसक्थीति अयुक्तोयं पाठो त्रय क्रान्तादिति विकल्पनिषेधाच्चित्वान्निसेनां
तोदात्तत्वेन भाव्यं तस्माज्ञौरसक्थीसंतोदात्तत्वाभावपक्षउदाहार्यः ॥ ॥द्वित्रिभ्यां॥ ॥द्विमूर्द्ध इति यद्यत्र षच् स्यात्तदा चित्वान्निसमंतोदात्तत्वं स्यात् द्वित्रिभ्यां

=समासशब्देषु अंतोतोदात्तो वा न भवति कपः दंतास्वरश्चैव न भवतीति सक्थ्यं चाक्रान्तादिति स्यादर्थः ।२=

बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच् । किमर्थं षच्प्रत्ययान्तरं विधीयते । नटच्प्रकृतः सोनुवर्तेत । अन्तउत्तरं पठति । षचि प्र
त्ययान्तकरणमन्तोदात्तार्थं । षचि प्रत्ययान्तरं क्रियते । अन्तोदात्तार्थं । अन्तोदात्ताः प्रयोजयंति चक्रसक्थं चक्रसक्थी
॥ ॥द्वित्रिभ्यां षमूर्द्ध्नः किमर्थं मूर्द्ध्नः षः प्रत्ययान्तरं क्रियते न षप्रकृतः सोनुवर्तते मूर्द्ध्नः षवचनं किं । अन्तोदा
त्तार्थमिसेवं द्विमूर्द्धः त्रिमूर्द्धः ॥ ॥श्री॥ ॥०॥

=वितरणसामर्थ्यात्सर्वंपदप्रकृतिस्वरमात्रं बाध्यते.१=

याद्वत मूर्द्धस्य बहुव्रीहाविति नु विभाषांतोदात्तत्वं यदा समासांतविधेरनित्यत्वात् द्विमूर्द्धेति समासान्ताभावः तदा सावकाशं षेतु सति समासान्ते पक्षेपि पक्षे तोदात्तत्वं प
क्षे पूर्वपदप्रकृतिस्वरो गाद्युदात्तत्वमिति स्वाद्यसिद्धेः ॥ ॥श्री ॥श्री॥ ॥श्री॥ ॥श्री॥ ❀

अप्पूरणी। कल्याणपंचमीकः पक्ष इति। अत्र वृत्तिपदार्थे एव पूरणी न त्वन्यपदार्थेः पक्षस्य तिरोहितावयवभेदस्यान्यपदार्थत्वात् यथा रक्ष इत्यस्य शब्दस्यावयवाभिधेयो न
तु शाखादयोवयवा अनुमीयमानस्य शब्दार्थत्वादित्यप्राधान्यं पूरण्याः कल्याणीपंचमा इति अत्रावयवे विग्रहः समुदायो भेदः समासार्थः इति रात्रिषु पंचम्यां अंतर्भावात्
उद्भुतावयव

अप्पूरणीप्रमाण्योः। अपिप्राधानपूरणीग्रहणं। अपिप्रधानपूरणीग्रहणं कर्तव्यं। प्रधानया पूरणीति वक्तव्यं। इह माभूत्। कल्याणी
पंचमी अस्य पक्षस्य कल्याणपंचमीकः पक्षः। अथेह कथं भवितव्यं। कल्याणी पंचमी आसां रात्रीणामिति कल्याणीपंचमा रात्रय इति
भवितव्यं। रात्रयो अत्र प्रधाना। नेतुर्नक्षत्रे उपसंख्यानं। नेतुर्नक्षत्रे उपसंख्यानं कर्तव्यं। पुष्यनेत्राः मृगनेत्राः छंदसि च। नेतुरुपसं
ख्यानं कर्तव्यं। बृहस्पतिनेत्राः सोमनेत्राः। मासात् भृतिप्रत्ययपूर्वपदाट्ठञ्विधिः मासात् भृतिप्रत्ययपूर्वपदात् ठञ् विधेयः। पंचकमा
सिकः षट्कमासिकः। दशकमासिकः। अजनासिकायाः संज्ञायां। खरखुराभ्यां नस् वक्तव्यः। खरणाः खुरणाः शितिनाः अर्चनाः अ
हिना इति नैगमाः। शितिनाः अर्चनाः अहिनाः। उपसर्गाच्च वेग्रो वक्तव्यः। विग्रः। ख्यश्च वक्तव्यः। विख्यः। ऊर्ध्वसोनद इ. ऊर्ध्वसोनदि.
स्त्रीग्रहणं कर्तव्यं॥ इह माभूत। महोधाः पर्जन्य इति॥ ॥ ॥

न्यपदार्थत्वात् प्राधान्यं पूरण्याः पंचकमासिक इति पंचमतिरस्य मासस्य पंचको मासः सोस्यांशवस्नभृतय इति संख्यायाः कन् पंचको मासोस्येति बहुव्रीहौ कृते स्वार्थे ठञ्॥ एम०
अप्नासिखरखुराभ्यामिति आदेशप्रत्ययोः प्रसंगे केवलादेशविधानार्थं वचनं उपविग्र इति। विगतानासिकाय स्य सविग्रः॥ ॥ ॥ १००

गंधस्य। गंधशब्दोऽस्ति द्रव्यवाची गंधान्पिनष्टीति। अस्ति च गुणवाची चंदनस्य गंध इति॥ तत्र गुणवाचिग्रहणार्थमाह गंधस्येत्त्व इति। रूपादिसमुदायात्मकस्य द्रव्यस्य गंधत्वल
क्षणो गुण एकांतो भवति। रूपादिव्यतिरिक्तावयविद्रव्यवादिपक्षे त्वेकांत इवैकांतस्तत्स्थस्योपलंभादित्याश्रीयते॥ यदनुगतमिति। अनुगतं निलीनमविभागापन्नं
कुंकुमादिपदादेवदत्तादेर्भवति। तदा तत्स्थत्वात् गंधस्यैकांतत्वादित्वं भवति। प्रविशीर्णमिति विभागेनावस्थितं देवदत्तादेः पृथगुपलभ्यमित्यर्थः। शेषा॥ कः शेष इ

=आपणे निमुक्तः।१=

गंधस्येदुत्पूति। गंधस्येत्वे तदेकांतग्रहणं। गंधस्येत्वे तदेकांतग्रहणं कर्त्तव्यं इह माभूत्। शोभना गंधा अस्य सुगंधः आपणिक इति। अथानुलिप्ते
कथं भवितव्यं॥ यदि तावद्यदनुगतं तदभिसमीक्षितं सुगंधिरिति भवितव्यं। अथ यत्प्रविशीर्णं सुगंध इति भवितव्यं। शेषाद्विभाषा॥ शेषादि
त्युच्यते। कः शेषः याभ्यः प्रकृतिभ्यः समासांतो न विधीयते स शेषः। किमर्थं पुनः शेषग्रहणं क्रियते। याभ्यः प्रकृतिभ्यः समासांता वि
धीयंते ताभ्यः कप्मा भूदिति॥ नैतदस्ति प्रयोजनं॥ ये प्रतिपदं विधीयंते ते तत्र बाधका भविष्यंति॥ अनवकाशा हि विधयो बाधका भवंति॥
सावकाशाश्च समासांताः कोऽवकाशः विभाषा कप्॥ यदा न कप् सोऽवकाशः। कपः प्रसंगे उभयं प्राप्नोति। परत्वात्कप् प्राप्नोति तस्माच्छे

=तस्याश्चैवल्पमाणत्वात्।१=

ति॥ अनेकस्योपयुक्तत्वाल्लिंगमपेक्ष्य शेष आश्रीयत इति प्रश्नः इतरः सामान्येनाह याभ्य इति। समासांतविशेषस्तु न प्रदर्शितः किमर्थमिति सामान्येन विभाषाक
प्विधीयतां तत्र विशेषसमासांता बाधका भविष्यंतीति प्रश्नः॥ परत्वात्कप् प्राप्नोतीति उपदेशः इत्यादिषु निसंडजादय इष्यंते॥ ॥ श्री

भा०कै०५ १०१

किंपुनरिति॥ पूर्वयाप्यः प्रकृतिम्यः इतिसामान्येनोक्तं ततोविशेषज्ञापनाय प्रश्नः यद्यपि कबपेक्षे शेषत्वे शेषग्रहणमनर्थकं अंतरेणापि शेषग्रहणमशेषान्नित्यं कब्विधानसामर्थ्याद्विभाषितकप्प्रसंगाभावात् छेषादेवकबिकल्पविज्ञानात्तथापिविचारमात्रं क्रियते। अन्नचइति। ऋगंतात्कप्नविहितइति शेषत्वात्पक्षे परत्वात्कप्प्रसंगः कबभावपक्षस्तु कारस्यावकाशः समासांतरंच विशेषएतदितितत एवविशेषविषयाद्वचनादन्नकप्न भविष्यतीत्यर्थः॥ तस्मिन्क्रियमाणेपी

=शिष्यबुद्धिवैशद्यायेत्यर्थः।१=

किंपुनरिदंशेषग्रहणंकबपेक्षंयस्माद्बहुव्रीहेःकप्नविहितइति। आहोस्वित्समासांतापेक्षं। यस्माद्बहुव्रीहेःसमासांतोनविहित

यत्रापिर इति॥ किंचातः यदिविज्ञायतेकबपेक्षं अनृचोबह्वृचश्चप्राप्नोति अथसमासांतापेक्षं अनृक्कं सामबह्वृक्कं सूक्तमिति नसिध्य

ति। अस्तुकबपेक्षं। कथमनृचोबह्वृचइतिविशेषएतद्वक्तव्यं अनृचोमाणवेबह्वृचश्चरणाख्यायामिति। इदं तर्हिउधसोन

(१८)ङि- स्त्रीग्रहणंचोदितं। तस्मिन्क्रियमाणेपिप्राप्नोति॥ ॥ ॥

तिञक्रियमाणेस्त्रीग्रहणेकुंडोध्नीसत्रपक्षेपरत्वात्कप्प्राप्नोतिक्रियमाणेपिस्त्रीग्रहणेतस्यपुंनपुंसकनिवृत्त्यर्थत्वात् पक्षेपरत्वात्कपः प्रसंगएवएतच्चोद राम०
हरणमात्रमुपदर्शादिषुपक्षेकप्प्रसंगात्॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ १०१

भा०कै०५ १०२ नैवकबुपेक्ष्यमिति। शेषग्रहणानर्थक्यप्रसंगात् यस्माद्विनिसः कश्चिद्विहितस्तस्माद्विभाषा न प्राप्नोतीति विरोधादिनिपूर्वो ऽनन्यायात्समासान्तापेक्षमपि न भवति अनृक्बह्वृक्मिसत्र कपो
प्रसंगात्। अनन्तरबहुव्रीह्यधिकार इति। एवंच दुधसोनडि सनन्तरे बहुव्रीह्यधिकारे नडो विधानात् कुडो ध्वीसारैस्त्रियां कप्त्र भवति। कथमनृच इति॥ बहुव्रीह्यधिकारा
त्प्राग कारविधाना च्छेषत्वात्पक्षे कप्प्रसंगः। वक्तव्यमेवैतदिति॥ यद्येवं समासान्तापेक्षे पि शेषत्वेनर्चबह्वृचयोर्विशेषवचनादन्यत्रानृक्बह्वृक्योः पक्षे कपः
सिद्धत्वात् कस्यचिद्दोषस्याप्रसंगात् किमर्थमनन्तरबहुव्रीह्यधिकारापेक्षः शेष आश्रीयते बहुव्रीह्यधिकाराच्च तत्पुरुषादिभ्यः कपो प्रसंगः किं चोपदशाइसा
दौ पक्षे कप्प्राप्नोति। अनन्तरे बहुव्रीह्यधिकारे ऽचो विधानादन्यत्र प्रियपथः प्रियधुर इत्यत्रापि प्राप्नोतीति तस्मात्समासान्तापेक्षमेव शेषत्वमाश्रयणीयमितिचिं

एवं तर्हि नैव कबपेक्षं शेषग्रहणं॥ नापि समासान्तापेक्षं किं तर्हि अनन्तरो बहुव्रीह्यधिकारः सोपेक्ष्यते। अनन्तरे बहुव्रीह्यधिकारे यस्माद्बहुव्रीहेः समासान्तो न विहित इति॥ कथमनृचो बह्वृच इति वक्तव्यमेवैतत् अनृचो माणवे बह्वृचश्चरणाख्यायामिति॥ ईयसश्च। ईयस उपसर्जनदीर्घत्वं च। ईयस उपसर्जनदीर्घत्वं चेति वक्तव्यं बह्व्यः श्रेयस्यो ऽस्य बहुश्रेयसी विद्यमानश्रेयसी। पुंवद्वचनात्सिद्धं। पुंवद्भावो ऽत्र भवति ईयसो बहुव्रीहौ पुंवद्वचनमिति॥ ॥इति भगवंते श्रीव्याकरणमहाभाष्ये पंचमाध्यायस्य चतुर्थे पादे प्रथममाह्निकं॥ पादश्च संपूर्णः पंचमो ऽध्यायः॥

समेतज्ज्ञाप्यं। ईयः। उपसर्जनदीर्घत्वमिति। ङ्याप्प्रत्ययान्तयोरीर्घत्वं विधेयं। पुंवद्वचनादिति। गोस्त्रियोरुपसर्जनस्येति ह्रस्वः प्राप्तं पुंवद्भावेन निवर्त्यते यथा पुंविषयस्ये कारस्य ह्रस्वो
न भवत्येवमीयसः प्रत्यस्येति श्रवणं भवति बहुश्रेयसी सत्र हल्ङ्यादिलोपे पि वर्द्धितेके चिदाहुः हल्ङ्यादिलोपे न नभा वं ङ्यापोः ह्रीप्रत्यययोः ग्रहणात्स्त्रीप्रत्ययेचानुपसर्जे
नेतदादिनियमाभावात् ङ्योपसर्जनत्वाद्धीप्रत्ययादिनियमाद्धल्ङ्यादिलोपस्य प्रसंगाभावादन्ये त्वाहुः दीर्घग्रहणं तत्र ह्रस्वनिवृत्त्यर्थं कृतं ज्ञापयति खट्वा इत्यादौ लोपो
मा भूदिति चोपसर्जनेतरादिनियमः स्यात्तदा ऽकृत्स्नाञ्चोपस्य प्रसंगाभावान्न ह्यावत्नमेदीर्घग्रहणं न कुर्यात् कृतं तु यथेष्टमुपसर्जनार्थमपि दीर्घोल्लोपं ज्ञापयतीति एम०
बहुश्रेयसीति सिद्धमिष्टं। श्रीसुपाध्याय जय्यटपुत्रकैय्यट कृते भाष्यप्रदीपे पंचमो ऽध्यायः॥ ॥समाप्तः॥ ॥शुभमस्तु॥ शुभकल्याणः॥ ॐ॥ १०२



